व/८४

up 1.R

२४७

व३/२४

64

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

२✓

२५७

१

जीवन स्मृतिः

श्री १०८ ... मठ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हा
ांकंपर
ंकःपरमा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥श्रीगणेशायनमः॥श्रीगुरुभ्योनमः॥यस्यनिःश्वसितंवेदायो
वेदेभ्योऽखिलंजगत्॥निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥
१॥ॐवक्ष्येविविदिषान्यासंविद्वन्न्यासंचभेदतः॥हेतूविदेह
मुक्तेश्चजीवन्मुक्तेश्चतौक्रमात्॥१॥संन्यासहेतुर्वैराग्यंयदह
र्विरजेत्तदा॥प्रव्रजेदितिवेदोक्तेस्तद्भेदस्तुपुराणगः॥२॥विरक्ति
र्द्विविधाप्रोक्तातीव्रातीव्रतरेतिच॥सत्यामेवतुतीव्रायांन्यसेद्यो
गीकुटीचके॥३॥शक्तोबहूदकेतीव्रतरायांहंससंज्ञिते॥मुमुक्षुः
परमेहंसेसाक्षाद्विज्ञानसाधने॥४॥पुत्रदारगृहादीनांनाशेता
त्कालिकीमतिः॥धिक्संसारमितीदृक्स्याद्विरक्तेर्मंदताहिसा
॥५॥अस्मिन्जन्मनिमाभूवन्पुत्रदारादयोमम॥इतियासुस्थिरा
बुद्धिःसावैराग्यस्यतीव्रता॥६॥पुनरावृत्तिसहितोलोकोमेमास्तुक
श्चन॥इतितीव्रतरत्वंस्यान्मंदेन्यासोनकोपिहि॥७॥यात्राद्यश
क्तिशक्तिभ्यांतीव्रेन्यासद्वयंभवेत्॥कुटीचकोबहूदश्चैतत्तुभावे
तौत्रिदंडिनौ॥८॥द्वयंतीव्रतरेब्रह्मलोकमोक्षविभेदतः॥त
त्रलोकेतत्त्वविद्धंसोलोकेस्मिन्परहंसकः॥९॥एतेषांतुसमाचाराः
प्रोक्ताःपाराशरस्मृतौ॥व्याख्यानेस्माभिरत्रायंपरहंसोविविच्यते
॥१०॥जिज्ञासुर्ज्ञानवांश्चेतिपरहंसोद्विधामतः॥प्राहुर्ज्ञानायजि
ज्ञासोर्न्यासंवाजसनेयिनः॥११॥प्रव्राजिनोलोकमेतमिच्छंतःप्र
व्रजंतिहि॥एतस्यार्थस्तुगद्येनवक्ष्यतेमंदबुद्धये॥१२॥लोकोहि
द्विविधः॥आत्मलोकोऽनात्मलोकश्चेति॥तत्रआत्मलोकस्यत्रै
विध्यंबृहदारण्यकेतृतीयाध्यायेश्रूयते॥अथत्रयोवावलोकाम
नुष्यलोकःपितृलोकोदेवलोकइतिसोयंमनुष्यलोकःपुत्रेणैव
जय्योनान्येनकर्मणाकर्मणापितृलोकोविद्ययादेवलोकइति॥
आत्मलोकश्चतत्रैवश्रूयते॥योहवाअस्माल्लोकात्स्वंलोकमदृ
ष्ट्वाप्रैतिसएनमविदितोनभुनक्ति॥आत्मानमेवलोकमुपासी
तसयआत्मानमेवलोकमुपा नानुष्ठानोत्तरमक्षीयतइतिच॥यो
मांसादिकपिंडलक्षणात्स्वं पविद्वत्संन्यासांप्स अहंब्रह्मास्मी
त्यविदित्वाम्रियतेसःस्वले इतःअ द्यया

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्ववहितःसन्नेनंअवेतारंप्रेतंमृतंनभुनक्तिशोकमोहादिदोषाप
नयनेननपालयति॥उपासकस्यहनिश्चितंकर्मनक्षीयतेएकफ
लदानेनउपक्षीणंनभवतिकामितसर्वफलंमोक्षंचददातीत्यर्थः
॥षष्ठाध्यायेपि॥किमर्थंवयमध्येष्यामहेकिमर्थंवयंयक्ष्याम
हे॥किंप्रजयाकरिष्यामोयेषांनोयमात्मायंलोकइति॥येप्रज्ञा
मीषिरेतेश्मशानानिभेजिरे॥येप्रज्ञानेषिरेतेऽमृतत्वंहिभेजि
रे॥एवंसतिएतमेवप्रव्राजिनोलोकमिच्छंतःप्रव्रजंतीत्यत्रात्म
लोकोविवक्षितइतिगम्यते॥सवाएषमहानजआत्मेतिप्रक्रां
तस्यात्मनएतच्छब्देनपरामृष्टत्वात्॥लोक्यतेऽनुभूयतइति
लोकः॥तथाचात्मानुभवमिच्छंतःप्रव्रजंतीतिश्रुतेरक्षरार्थः
संपद्यते॥स्मृतिश्च॥ब्रह्मविज्ञानलाभायपरहंससमाह्वयः॥शां
तिदांत्यादिभिःसर्वैःसाधनैःसहितोभवेदिति॥इहजन्मनिज
न्मांतरेवासम्यगनुष्ठितैर्वेदानुवचनादिभिरुत्पन्नयाविविदिष
यासंपादितत्वादयंविविदिषासंन्यासइतिअभिधीयते॥अयं
त्ववेदनहेतुः॥संन्यासोद्विविधः॥जन्मापादककाम्यकर्मादित्या
गमात्रात्मकः॥प्रैषोच्चारणपूर्वकदंडधारणाद्याश्रमरूपश्चेति॥पुं
जन्मलभतेमातापत्नीचप्रेषमात्रतः॥ब्रह्मनिष्ठंसुशीलञ्चज्ञानंचैत
न्मभावतः॥त्यागश्चतैत्तिरीयादौश्रूयते॥नकर्मणानप्रजयाधने।
नत्यागेनैकेअमृतत्वमानशुरिति॥अस्मिंश्चत्यागेस्त्रियोप्यधिकि
यंते॥भिक्षुकीत्यनेनस्त्रीणामपिप्राग्विवाहाद्वावैधव्यादूर्ध्वंसंन्या
सेऽधिकारोऽस्तीतिदर्शितं॥तेनभिक्षाचर्यंमोक्षशास्त्रश्रवणंए
कांतेआत्मध्यानंचताभिःकर्तव्यंत्रिदंडादिकंचधार्यं॥इतिमो
क्षधर्मेचतुर्द्धरटीकायांसुलभाजनकसंवादः॥शारीरकभाष्ये
वाचक्नवीत्यादिश्रूयते॥देवताधिकरणन्यायेनविधुरस्यअधि
कारप्रसंगत्वेनतृतीयाध्यायेचतुर्थपादे॥अतएवमैत्रेयीवा।
क्यमाम्नायते॥येनाऽहं [illegible] ।किमहंतेनकुर्यांयदेवभगव
न्वेत्थतदेवमेब्रूहीकंपर [illegible] गृहस्थवानप्रस्थानांकेनचिन्नि
मित्तेनसंन्यासाकः परम [illegible] बंधेसतिस्वाश्रमधर्मेष्वनुष्ठी

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निषेधात् पापवदनाशो मानसः कर्मादित्यागो न विरुध्यते॥ श्रुतिस्मृ
तीतिहासपुराणेषु लोके च तादृशां तत्त्वविदां बहूनामुपलंभात्॥
यस्तु दंडधारणादिरूपो वेदनहेतुः परमहंसाश्रमः पूर्वैराचार्यैर्बहु
विधा प्रपंचित इत्यस्माभिरुपरम्यते॥ इति विविदिषासंन्यासः॥
अथ विद्वत्संन्यासं निरूपयामः॥ सम्यगनुष्ठितैः श्रवणमनननिदि
ध्यासनैः परतत्त्वं विदितवद्भिः संपाद्यमानो विद्वत्संन्यासः॥ तं च
याज्ञवल्क्यः संपादयामास॥ तथा हि विद्वच्छिरोमणिर्भगवान्याज्ञ
वल्क्यो विजिगीषुकथायां बहुविधेन तत्त्वनिरूपणेनाश्वलप्रभृ
तीन्विप्रान्विजित्य वीतरागकथायां संक्षेपविस्तराभ्यां अनेक
धा जनकं बोधयित्वा मैत्रेयीं बुबोधयिषुस्तस्यास्त्वरयात —
त्वाभिमुख्याय स्वकर्तव्यं संन्यासं प्रतिजज्ञे॥ ततस्तां बोधयित्वा
संन्यासं चकार तदुभयं मैत्रेयीब्राह्मणस्याद्यंतयोराम्नायते॥ अ
थाह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन्मैत्रेयीति होवाच याज्ञव
ल्क्यः प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मीति एतावदरे ख
ल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजेति च॥ कहोलब्रा
ह्मणेऽपि विद्वत्संन्यास आम्नायते॥ एतं वै तमात्मानं विदित्वा ब्राह्म
णाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भि
क्षाचर्यं चरंतीति॥ न चैतद्वाक्यं विविदिषासंन्यासपरमिति शंक
नीयं॥ पूर्वकालवाचिनो विदित्वेति क्त्वा प्रत्ययस्य ब्रह्मविद्वाचिनो
ब्राह्मणशब्दस्य च बाधप्रसंगात्॥ न चात्र ब्राह्मणशब्दो जाति
वाचकः॥ वाक्यशेषे पांडित्यबाल्यमौनशब्दाभिधेयैः श्रवण
मनननिदिध्यासनैः साध्यं ब्रह्मसाक्षात्कारमभिप्रेत्याथ ब्राह्म
णशब्दस्याभिहितत्वात्॥ ननु तत्र विविदिषासंन्यासोपेतः पां
डित्यादौ प्रवर्तमानोऽपि ब्राह्मणशब्देन परामृष्टः तस्माद्ब्राह्म
णः पांडित्यं निर्विद्य बाल्येन तिष्ठासेदिति चेत्॥ मैवं॥ भावि
नीं वृत्तिमाश्रित्य तत्र ब्राह्मणशब्दस्य प्रयुक्तत्वात्॥ अन्यथा क
थं अथ ब्राह्मण इति साधनानुष्ठानोत्तरकालवाचिनमथशब्दं
प्रयुंजीत॥ शारीरब्राह्मणेऽपि विद्वत्संन्यासविविदिषासंन्यासौ स्प

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्टंनिर्दिशति ।। एतमेवविदित्वामुनिर्भवत्येतमेवप्रव्राजिनोलोकमि
च्छंतःप्रव्रजंतीतिमुनित्वंमननशीलत्वंतच्चासतिकर्तव्यांतरेफलीभ
वतीत्यर्थात्संन्यासएवाभिधीयते ।। एतच्चवाक्यशेषेस्पष्टीकृतं ।।
एतद्धस्मवैतत्पूर्वेविद्वांसःप्रजांनकामयंतेकिंप्रजयाकरिष्यामो
येषांनोयमात्मायंलोकइति ।। तेहस्मपुत्रैषणायाश्चवित्तैषणाया
श्चलोकैषणायाश्चव्युत्थायाथभिक्षाचर्यंचरंतीति ।। अयंलोकइ
त्यपरोक्षेणानुभूयतइत्यर्थः ।। नन्वत्रमुनित्वेनफलेनप्रलोभ्यवि
विदिषासंन्यासंविधायवाक्यशेषेसएवप्रपंचितः ।। अतोनसं
न्यासांतरंकल्पनीयं ।। मैवं ।। वेदनस्येवविविदिषासंन्यासफल
त्वात् ।। नचवेदनमुनित्वयोरेकत्वंशंकनीयंविदित्वामुनिर्भवतीति
पूर्वोत्तरकालीनयोःतयोःसाध्यसाधनभावप्रतीतेः ।। ननुवेदनस्यै
वपरिपाकातिशयरूपमवस्थांतरंमुनित्वं ।। अतोवेदनहेतुःपूर्व
संन्यासस्यैवैतत्फलमितिचेत् ।। बाढं ।। अतएवसाधनरूपात्संन्या
सादन्यंफलरूपमेतंसंन्यासंब्रूमः ।। यथाविविदिषासंन्यासिना
तत्वज्ञानायश्रवणादीनिसंपादनीयानि ।। तथाविद्वत्संन्यासिना
पिजीवन्मुक्तयेमनोनाशवासनाक्षयौसंपादनीयौएतच्चोपरिष्टा
त्प्रपंचयिष्यामः ।। सत्यप्यनयोःसंन्यासयोरवांतरभेदेपरमहंस
त्वाकारेणैकीकृत्यचतुर्विधाभिक्षवइतिस्मृतिषुचतुःसंख्योक्ता ।।
पूर्वोत्तरयोरुभयोःसंन्यासयोःपरमहंसत्वंजाबालश्रुतावगम्यते
तत्रहिजनकेनसंन्यासेपृष्टेसतियाज्ञवल्क्योऽधिकारविशेषविधाने
नोत्तरकालानुष्ठेयेनचसहितंविविदिषासंन्यासमभिधायपश्चादत्रि
णायज्ञोपवीतरहितस्याक्षिप्तेऽब्राह्मण्येसतिपश्चादात्मज्ञानमेव
यज्ञोपवीतमितिसमादधौ ।। अतोबाह्योपवीताभावात्परमहंसत्वं
निश्चीयते ।। तथान्यस्यांकंडिकायांतत्रपरमहंसोनामेत्युपक्रम्यसं
वर्तकादीन्बहून्ब्रह्मविदोजीवन्मुक्तानुदाहृत्याव्यक्तलिंगाअव्य
क्ताचाराअनुन्मत्ताउन्मत्तवदाचरंतइतिविद्वत्संन्यासिनोदर्शिताः
तथात्रिदंडंकमंडलुंशिक्यंपात्रंजलपवित्रंशिखांयज्ञोपवीतंचेत्ये
तत्सर्वंभूःस्वाहेत्यप्सुपरित्यज्यात्मानमन्विच्छेदितित्रिदंडिनःसतःएक
दंडलक्षणविविदिषासंन्यासं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भिधाय तत्फलरूपं विद्वत्संन्यासमेवमुदाजहार ॥ यथाजातरूप
धरो निर्द्वंद्वो निष्परिग्रहस्तत्त्वब्रह्ममार्गे सम्यक्संपन्नः शुद्धमान
सः प्राणसंधारणार्थं यथोक्तकाले विमुक्तो भैक्ष्यमाचरन्नुदरपा
त्रेण लाभालाभौ समौ कृत्वा शून्यागारदेवतागृहतृणकूटवल्मी
कवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुहरकंदर
कोटरनिर्झरस्थंडिलेष्वनिकेतवास्यप्रयत्नो निर्ममः शुक्लध्यान
परायणोऽध्यात्मनिष्ठः शुभाशुभकर्मनिर्मूलनपरः संन्यासेन दे
हत्यागं करोति स परमहंसो नामेति ॥ तस्मादनयोरुभयोः परमहं
सत्वं सिद्धं ॥ समानेपि परमहंसत्वे विरुद्धधर्माक्रांतत्वादवांतर
भेदोप्यभ्युपगंतव्यः ॥ विरुद्धधर्मत्वं चारुण्युपनिषत्परमहंसोप
निषदोः पर्यालोचनायामवगम्यते ॥ केन भगवन्कर्माण्यशेषतो विसृ
जामीति शिखायज्ञोपवीतस्वाध्यायगायत्रीजपाद्यशेषकर्मसा
गरूपे विविदिषासंन्यासे शिष्येणारुणिना पृष्टे सति गुरुः प्रजाप
तिः शिखां यज्ञोपवीतमित्यादिना सर्वत्यागमभिधाय दंडमाच्छाद
नं कौपीनं च परिग्रहेदिति दंडादिस्वीकारं विधाय त्रिसंध्यादौ स्ना
नमाचरेत् ॥ संधिं समाधावात्मन्याचरेत्सर्वेषु वेदेष्वारण्यमावर्तये
त् ॥ उपनिषदमावर्तयेदिति वेदनहेतूनाश्रमधर्माननुष्ठेयतयाभि
धत्ते ॥ अथ योगिनां परमहंसानां कोयं मार्ग इति विद्वत्संन्यासे नारदे
न पृष्टे सति गुरुर्भगवान्प्रजापतिः स्वपुत्रमित्रेत्यादिना पूर्ववत्सर्व
त्यागमभिधाय कौपीनं दंडमाच्छादनं च स्वशरीरोपभोगार्थाय च
परिग्रहेदिति दंडादिस्वीकारस्य लौकिकत्वमभिधाय तच्च न मु
ख्योस्तीति शास्त्रीयत्वं प्रतिषिध्य कोयं मुख्य इति चेदयं मुख्यो न
दंडं न शिखां न यज्ञोपवीतं न चाच्छादनं चरति परमहंस इति दंडा
दिलिंगराहित्यस्य शास्त्रीयतामुक्त्वा न शीतं न चोष्णमित्यादिवाक्ये
नाप्रणवेरो न न नमस्कार इत्यादिवाक्येन च लौकिकव्यवहारातीतत्व
मभिधायांते यत्पूर्णानंदैकबोधस्तद्ब्रह्माहमस्मीति कृतकृत्यो
भवतीत्यंतेन ग्रंथेन ब्रह्मानुभवमात्रपर्यवसानमाचष्टे ॥ अतो
विरुद्धधर्मोपेतत्वादनयोर्महान्भेदः स्मृतिष्वप्ययं भेद उक्तः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति द्रष्टव्यं॥संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया॥प्रव्रजंत्यकृतोद्वा
हाः परं वैराग्यमाश्रिताः॥प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणं॥
तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान् इत्यादि विविदिषासं
न्यासः॥यदा तु विदितं तत्त्वं परं ब्रह्म सनातनं॥तदैकदंडं संगृह्योप
वीतं शिखां त्यजेत्॥ज्ञात्वा सम्यक् परं ब्रह्म सर्वं त्यक्त्वा परिव्रजे
त्॥इत्यादि विद्वत्संन्यासः॥ननु कस्ताविद्यास्ति च कदाचित् औ
त्सुक्यमात्रेणापि वेदितुमिच्छा संभवत्येवं विद्वत्ताप्यापातदर्शिनः
पंडितंमन्यमानस्याप्यवलोक्यते न च तौ प्रव्रजंतौ दृष्टौ अतो विविदिषा
विद्वत्ते कीदृशौ विवक्षितौ इति चेत्॥उच्यते॥यथा तीव्रायां बुभुक्षा
यामुत्पन्नायां भोजनादन्यो व्यापारो न रोचते भोजने च विलंबो न
सोढुं शक्यते॥तथा यदा जन्महेतुषु कर्मस्वत्यंतमरुचिर्वेदन
साधनेषु च श्रवणादिषु त्वरामहती संपद्यते तादृशी विविदिषा
संन्यासहेतुः विद्वत्ताया अवधिरुपदेशसाहस्र्यामभिहितः॥ दे
हात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकं॥आत्मन्येव भवेद्यस्य स
नेच्छन्नपि मुच्यत इति॥श्रुतावपि॥भिद्यते हृदयग्रंथिश्छिद्यंते
सर्वसंशयाः॥क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावर इति॥परम
पि हैरण्यगर्भादिकं पदं अवरं यस्मात् असौ परावरः हृदये बुद्धौ
साक्षिणस्तादात्म्याध्यासोऽनाद्यविद्यानिर्मितत्वेन ग्रंथिवद्दृढसं
श्लेषरूपत्वाद्ग्रंथिरित्युच्यते॥आत्मा साक्षी कर्त्ता वा आत्मनः सर्व
साक्षित्वेपि अस्य ब्रह्मत्वं अस्ति वा न वा ब्रह्मत्वेपि तद्बुध्या वेदितुं
शक्यं न वा शक्यत्वेपि तद्वेदनमात्रेण मुक्तिरस्ति न वेत्यादयः संश
याः कर्माण्यनारब्धान्यागामिजन्मकारणानि तदेतद्ग्रंथ्यादित्रयम
विद्यानिर्मितत्वादात्मदर्शनेन निवर्त्तते॥स्मृतावप्ययमर्थ उपल
भ्यते॥यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते॥हत्वापि स इमा
ल्लोकान्न हंति न निबध्यत इति॥यस्य ब्रह्मविदो भावः सत्ता स्वभा
व आत्मा नाहंकृतो अहंकारेण तादात्म्याध्यासादंतर्नाच्छादितः।
बुद्धिलेपः संशयः तदभावे त्रैलोक्यवधेनापि न बध्यते किमुता
न्येन कर्मणेत्यर्थः॥नन्वेवं सति विविदिषासंन्यासफलेन तत्त्वज्ञा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नेनैवागामिजन्मनो निवारितत्वात्॥वर्तमानजन्मप्रेरकस्य भोगमंत
रेण निवारयितुमशक्यत्वात् किमनेन विद्वत्संन्यासप्रयासेनेति चेत्
॥मैवं॥विद्वत्संन्यासस्य जीवन्मुक्तिहेतुत्वात् तस्माद्वेदनाय विवि
दिषासंन्यास इव जीवन्मुक्तये विद्वत्संन्यासः संपादनीयः॥अथ के
यं जीवन्मुक्तिः किं वा तत्र प्रमाणं कथं वा तत्सिद्धिः सिध्या वा किं प्र
योजनमिति चेत्॥उच्यते॥जीवतः पुरुषस्य कर्तृत्वभोक्तृत्वसुख
दुःखादिलक्षणश्चित्तधर्मः क्लेशरूपत्वाद्बंधो भवति तस्य निवारणं
जीवन्मुक्तिः॥नन्वयं बंधः किं साक्षिणो निवार्यते किं वा चित्तात्॥
नाद्यः॥तत्त्वज्ञानेनैव निवारितत्वात्॥न द्वितीयः॥असंभवात्॥य
दा तु जलाद्द्रवत्वं निवार्येत वह्नेरुष्णत्वं॥तदा चित्तात्कर्तृत्वादिनि
वारणसंभवः स्वाभाविकत्वं तु सर्वत्र समानं॥मैवं॥आत्यंतिकनि
वारणासंभवेपि अभिभवस्य संभवात्॥यथा जलगतं द्रवत्वं मृ
त्तिकामेलनेनाभिभूयते॥वह्नेरौष्ण्यं मणिमंत्रादिना तथा सर्वा
श्चित्तवृत्तयो योगाभ्यासेनाभिभवितुं शक्यते॥ननु प्रारब्धं कर्मा
त्माविद्यातत्कार्यनाशने प्रवृत्तस्य तत्त्वज्ञानस्य प्रतिबंधं कृत्वा
स्वफलदानाय देहेंद्रियादिकमवस्थापयति नच सुखदुःखादि
भोगश्चित्तवृत्तिं विना संपादयितुं शक्यते॥ततः कथमभिभवः॥मैवं
॥अभिभवसाध्याया जीवन्मुक्तेरपि सुखावाप्तिरूपत्वेन प्रारब्ध
फलएवांतर्भावात् तर्हि कर्मैव जीवन्मुक्तिं संपादयिष्यति मा भू
त्पुरुषप्रयत्नः इति चेत्॥कृषिवाणिज्यादावपि समानः पर्यनुयो
गः॥कर्मणः स्वयमदृष्टरूपस्य दृष्टसाधनसंपत्तिमंतरेण फलज
ननासमर्थत्वादपेक्षितः कृष्यादौ पुरुषप्रयत्न इति चेत् जीव
न्मुक्तावपि समं समाधानं॥सत्यपि पुरुषप्रयत्ने कृष्यादेः फलपर्य
वसानं यत्र न दृश्यते तत्र प्रबलेन कर्मांतरेण प्रतिबंधः कल्पनीयः
॥तच्च प्रबलं कर्म स्वानुकूलवृष्ट्याभावादिरूपां दृष्टसामग्रीं संपा
द्यैव प्रतिबध्नाति॥स च प्रतिबंधो विरोधिना प्रबलतरेणोत्तंभके
न कारीरीष्ट्यादिरूपेण कर्मणाऽपनीयते॥तच्च कर्म स्वानुकूलां
वृष्टिलक्षणां दृष्टसामग्रीं संपाद्यैव प्रतिबंधमपनयति॥किं बहु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नाप्रारब्धकर्मण्येवासंतभक्तेन भवतायोगाभ्यासरूपस्यपुरुषप्र
यत्नस्यवैयर्थ्यंमनसापिचिंतयितुमशक्यं अथवाप्रारब्धं कर्म
यथातत्वज्ञानस्यबलं॥तथातस्मादपिकर्मणोयोगाभ्यासःप्रब
लोऽस्तुतथाचयोगिनामुद्दालकवीतहव्यादीनांस्वेच्छयादेहत्या
गउपपद्यते॥यद्यप्यल्पायुषामस्माकंतादृशोयोगोनसंभवति॥
तथापिकामादिरूपचित्तवृत्तिनिरोधमात्रेयोगेकोनामप्रयासः।
यदिशास्त्रीयस्यप्रयत्नस्यप्राबल्यंनांगीक्रियेततदाचिकित्साशा
स्त्रमोक्षशास्त्रपर्यंतानांसर्वेषामानर्थक्यंप्रसज्येत॥नहिकदा
चित्कर्मफलविसंवादमात्रेणदौर्बल्यमापादयितुंशक्यं अन्य
थाकादाचित्कंपराजयंदृष्ट्वासर्वैर्भूपैर्गजाश्वादिसेनोपेक्ष्येत॥अत
एव आनंदबोधाचार्या आहुः॥नह्यजीर्णभयादाहारपरित्यागः॥भि
क्षुकभयाद्वास्थाल्या अनधिश्रयणं यूकाभयाद्वाप्रावरणपरित्याग
इति॥शास्त्रीयप्रयत्नस्यप्राबल्यंवसिष्ठरामसंवादेविस्पष्टमव
गम्यते॥सर्वमेवेहहिसदेत्यारभ्यतदनुतदप्यवमुच्यसाधुतिष्ठत्वं
तमंथेन॥वसिष्ठः॥सर्वमेवेहहिसदासंसारेरघुनंदन॥सम्यक्
प्रयुक्तात्सर्वेणपौरुषात्समवाप्यते॥सर्वंपुत्रवित्तस्वर्गलोकब्र
ह्मलोकादिफलंपौरुषंपुत्रकामेष्टिकृषिवाणिज्यज्योतिष्टोमब्र
ह्मोपासनालक्षणःपुरुषप्रयत्नः॥उच्छास्त्रंशास्त्रितंचेतिपौरुषं
द्विविधंस्मृतं॥तत्रोच्छास्त्रमनर्थायपरमार्थायशास्त्रितम्॥उच्छा
स्त्रंपरद्रव्यापहारपरस्त्रीगमनादि॥शास्त्रितंनित्यनैमित्तिकानुष्ठाना
दि॥अनर्थोनरकः॥अर्थेषुस्वर्गादिषुपरमोमोक्षःपरमार्थः॥आबा
ल्यादलमभ्यस्तैःशास्त्रसत्संगमादिभिः॥गुणैःपुरुषयत्नेनसोऽर्थः
संपाद्यतेहितः॥अलंसंपूर्णसम्यगित्यर्थः॥गुणैर्युक्तेनेत्याध्याहा
रः॥हितःश्रेयोरूपः॥ श्रीरामः ॥प्राक्तनं वासनाजालंनियोजयति
मांयथा॥मुनेतथैवतिष्ठामिकृपणःकिंकरोम्यहं॥वासनाधर्माध
र्मरूपाजीवगतसंस्काराः॥वसिष्ठः॥अतएवहिहेरामश्रेयःप्राप्नो
षिशाश्वतं॥स्वप्रयत्नोपनीतेनपौरुषेणैवनान्यथा॥यतोवासनाप
रतंत्रोभवान् अतएवपारतंत्र्यनिवारणायस्वोत्साहःसंपादितोमनो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वाङ्कायजन्यःपुरुषव्यापारोपेक्षितः॥द्विविधोवासनाव्यूहःशुभश्चै
वाशुभश्चते॥प्राक्तनोविद्यतेरामद्वयोरेकतरोथवा॥किंधर्माधर्मौ
उभावपित्वांनियोजयतउतैकतरद्इतिविकल्पःएकतरपक्षेपिशुभोऽ
शुभोवेत्यर्थात्सिद्धोविकल्पः॥वासनौघेनशुद्धेनतत्रचेदपनीयसे
॥तत्क्रमेणाशुतेनैवपदंप्राप्स्यसिशाश्वतं॥तत्रतेषुपक्षेषुतत्तस्ल
हितेनैवक्रमेणशुभवासनाप्रापितेनैवाचरणेनप्रयत्नांतरनिरपेक्षे
णशाश्वतंपदंमोक्षं॥अथचेदशुभोभावस्त्वांयोजयतिसंकटे॥प्रा
क्तनस्तदसौयत्नाज्जेतव्योभवतास्वयं॥भावोवासनातत्तर्हियत्नोऽ
शुभविरोधिशास्त्रीयधर्मानुष्ठानंतेनस्वयंजेतव्यः॥ननुशुद्धेभृत्य
सुखेनैवपुरुषांतरसुखेनजेतुंशक्यः॥शुभाशुभाभ्यांमार्गाभ्यांवहं
तीवासनासरित्॥पौरुषेणप्रयत्नेनयोजनीयाशुभेपथि॥उभयप
क्षेतुशुभभागस्यप्रयत्ननैरपेक्ष्येप्यशुभभागंशास्त्रीयप्रयत्नेननिवा
र्यशुभमेवतस्यस्थानेसमाचरेत्॥अशुभेषुसमाविष्टंशुभेष्वेवावता
रयेत्॥स्वमनःपुरुषार्थेनुबलेनबलिनांवर॥अशुभेषुपरस्त्रीद्र
व्यादिषुशुभेषुशास्त्रार्थदेवताध्यानादिषुपुरुषार्थेनपुरुषप्रयत्ने
नबलेनप्रबलेन॥अशुभाच्चालितंयातिशुभंतस्मादपीतरत्॥जंतोश्चित्तंतु
शिशुवत्तस्मात्तच्चालयेद्बलात्॥यथाशिशुःमृद्भक्षणान्निवार्यफ
लभक्षणेयोज्यते॥मणिमुक्ता — कर्षेणान्निवार्यकंदुकाद्याकर्ष
णेयोज्यते॥तथाचित्तमपिसत्संगेनदुःसंगात्तद्विपरीतविषयाऽ
न्निवारयितुंशक्यं॥समतासांत्वनेनाशुनद्रागितिशनैःशनैः॥पौरु
षेणप्रयत्नेनलालयेच्चित्तबालकं॥चपलस्यपशोःबंधनस्यानेप्र
वेशनायद्वावुपायौभवतः॥हरितत्तृणप्रदर्शनंकंडूयनादिकंवाक्
पारुष्यदंडादिभर्त्सनंचेति॥तत्राद्येनसहसाप्रवेश्यतेद्वितीयेनेतस्त
तोधावन्शनैःशनैःप्रवेश्यते॥तथाशत्रुमित्रादिसमत्वसुखबोध
नं॥प्राणायामप्रत्याहारादिपुरुषप्रयत्नश्चेत्येतौद्वौचित्तपशूपायौ
तत्राद्येनमृदुयोगेनशीघ्रंलालयेत्॥द्वितीयेहठयोगेनद्रागितिन
लालयेत् किंतुशनैःशनैः॥द्रागभ्यासवशाच्चातिप्रदातेवासनोद
यं॥तदाभ्यासस्यसाफल्यंविद्धित्वमरिमर्दन॥मृदुयोगाभ्यासाच्छीघ्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मेवसद्भावबोदयेसतिसाफल्यमभ्यासस्यवक्तव्यंनत्वल्पकालत्वे
नासंभावनाशंकनीया॥संदिग्धायामपिभूयःसुभामेवसमाहर॥एवं
सुभायांवासनावृद्धौतातदोषोनकश्चन॥सुभवासनाभ्यस्यमानासं
पूर्णानवेतिसंदेहस्तदपिसुभामभ्यसेदेव॥तद्यथा॥सहस्रजपे
प्रवृत्तस्यदशमीप्रतसंख्यायदासंदिग्धातदापुनरपिशतंजपेत्
असंपूर्तौसंपूर्तिःफलिष्यतिसंपूर्तौनहृध्यानसहस्रजपोदुष्य
ति॥अव्युत्पन्नमनायावद्भवानज्ञाततत्पदः॥गुरुप्रास्त्रप्रमाणै॥
स्तुनिर्णीतंतावदाचर॥ततःपक्ककषायेणनूनंविज्ञातवस्तुना॥शु
भोप्यसौत्वयात्याज्योवासनौघोनिरोधिना॥यदपिशुभमगमार्यसे
वितंतच्छुभमनुसत्यमनोज्ञभावबुध्या॥अधिगमपदंपदद्विती
यंतदनुतदप्यवमुच्यसाधुतिष्ठ॥इतिस्लोकेऽर्थः॥तस्माद्योगाभ्या
सेनकामाद्यभिभवसंभवात्॥जीवन्मुक्तौनविवदितव्यम्॥ ॥
इतिजीवन्मुक्तिस्वरूपम्॥श्रुतिस्मृतिवाक्यानिजीवन्मुक्तिसद्भा
वेप्रमाणानितानिचकठवल्ल्यादिषुपठ्यन्ते॥विमुक्तश्चविमुच्य
तइति॥जीवन्नेवहृष्टबंधात्कामादेर्विप्रोषेणमुक्तःसन्देहपाते
भाविवंधाद्विप्रेषेणमुच्यते॥वेदनात्प्रागपिशमदमादिसंपादने
नकामादिभ्योमुच्यएवतथाप्युत्पन्नानांकामादीनांतत्रप्रयत्नेन
निरोधः॥अत्रतुधीहृत्स्वभावादत्पत्तिरेवतत्तोविशेषेणोमुच्यते॥१
तथामलयेदेहपातेचसतिकंचित्कालंभाविदेहवंधान्मुच्यते॥
अत्रात्यंतिकमोक्षइत्यभिप्रेत्यविशेषेणोत्युक्तं॥बृहदारण्यकेप॥
ठ्यते॥यदासर्वेप्रमुच्यंतेकामायेस्यहृदिश्रिताः॥अथमर्त्योमृ
तोभवत्यत्रब्रह्मसमश्नुतइति॥श्रुत्यंतरेपि॥सचक्षुरचक्षुरिव
सकर्णोऽकर्णइवसमनाअमनाइवेति॥एवमन्यत्रापिउदाहा
र्यं॥स्मृतिषुजीवन्मुक्तविदेहमुक्तस्थितप्रज्ञभगवद्भक्तगुणाती
तब्राह्मणातिवर्णाश्रम्यादिनामभिस्तत्रतत्रव्यवह्रियते॥वसिष्ठ
रामसंवादेनणांज्ञानैकनिष्ठानामित्यारभ्यसक्तिंचिदवशिष्यते
इत्यंतेनग्रंथेनजीवन्मुक्तःपठ्यते॥वसिष्ठः॥नणांज्ञानैकनिष्ठाना
मात्मज्ञानविचारिणां॥साजीवन्मुक्ततोदेतिविदेहमुक्ततेवया॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यानैकनिष्ठत्वंलौकिकवैदिककर्मत्यागः।देहेंद्रियसदसद्भावमात्रे
णमुक्तिद्वयस्यविशेषोनत्वनुभवतः द्वैतप्रतीतेरुभयत्राभावात्॥
॥श्रीरामः॥ब्रह्मन्विदेहमुक्तस्यजीवन्मुक्तस्यलक्षणं॥ब्रूहियेनत
थैवाहंयतेशास्त्रगयादृशा॥वसिष्ठः॥यथास्थितमिदंयस्यव्यवहा
रवतोपिच॥अस्तंगतंस्थितंव्योमसजीवन्मुक्तउच्यते॥इदंप्रतीय
मानंगिरिनदीसमुद्रादिकंजगत्प्रतिपत्तुर्देहेंद्रियव्यवहारेणसह
महाप्रलयेपरमेश्वरेणोपसंहृतंसत्स्वरूपोपमर्देनास्तंगतंभवति॥
अत्रतुनतथा॥किंतुविद्यतएवदेहेंद्रियादिव्यवहारः॥गिरिनद्या
दिकंचेश्वरेणानुपसंहृतत्वात्॥यथापूर्वंप्रवर्तिष्यमानंसर्वैरन्यैः
प्राणिभिर्विस्पष्टमवलोक्यते॥जीवन्मुक्तस्यतत्प्रत्यायकत्वस्याभा
वात्सुषुप्ताविवसर्वमस्तंगतंभवति॥स्वयंप्रकाशमानंचिद्व्योमके
वलमवशिष्यते वहस्यसुषुप्तौतात्कालिकत्वस्वभावसाम्येपिभा
विधीवृत्तिबीजसद्भावान्नजीवन्मुक्तत्वं॥नोदेतिनास्तमायातिसुख
दुःखेसुखप्रभा॥यथाप्राप्तस्थितिर्यस्यजीवन्मुक्तउच्यते॥सुखप्रभा
हर्षःस्रक्चंदनसत्कारादिसुखेप्राप्तेपिसंसारिणइवहर्षोनोदेति॥
सुखप्रभास्तमयोदैन्यंधनहानिधिक्कारादिदुःखेप्राप्तेपिनदीनोभव
ति॥इदानींतनस्वप्रयत्नविशेषमंतरेणप्रारब्धकर्मोपादितपूर्वप्रवा
हागतभिक्षान्नादिकंयथाप्राप्तंतस्मिन्स्थितिर्देहरक्षा॥समाधिदा
र्ढ्येनस्रक्चंदनादिप्रतीत्यभावात्॥कदाचिद्व्युत्थानदशायांआपात
तःप्रतीतावपिविवेकदार्ढ्येनैवहेयोपादेयत्वबुद्ध्यभावात् हर्षा
दिराहित्यंउपपद्यते॥योजागर्तिसुषुप्तस्थोयस्यजाग्रन्नविद्यते॥
यस्यनिर्वासनोबोधःसजीवन्मुक्तउच्यते॥चक्षुरादींद्रियाणांस्वस्व
गोलकेष्ववस्थानेनोपरत्यभावात्जागर्ति ॥ मनोवृत्तिरहितत्वा
त्सुषुप्तिस्थः॥अतएवइंद्रियैरर्थोपलब्धिरस्त्येतस्यजागरणलक्ष
णाभावात् जाग्रन्नविद्यते॥सत्यपिबोधेजायमानेब्रह्मवित्त्वाभि
मानादिर्भोगार्थोपादितकामादिस्वधीदोषवासनावृत्तिरहिते
नतद्दोषाभावान्निर्वासनत्वं॥रागद्वेषभयादीनामनुरूपंचरन्नपि
॥योंतर्व्योमवदत्यच्छःसजीवन्मुक्तउच्यते॥रागानुरूपंभोजनादि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रवृत्तिः द्वेषानुरूपंबौद्धकापालिकादिभ्योविमुखत्वंभयानुरूपं
सर्पव्याघ्रादिभ्योपसर्पणं॥आदिशब्देनमात्सर्यादिमात्सर्यानुरू
प्यमितरयोगिभ्यः आधिक्येनसमाध्याद्यनुष्ठानं॥सत्स्वपिव्युत्थान
दशायांईदृशआचारेणपूर्वाभ्यासेनप्रापितेविश्रांतचित्तस्यकालु
ष्यरहितत्वादंतःस्वच्छत्वं॥यथाव्योम्निधूमधूलिमेघादियुक्तेपि
निर्लेप स्वभाव त्वातिशयेनस्वच्छत्वंतद्वत्॥यस्यनाहंकृतोभावो
बुद्धिर्यस्यनलिप्यते॥कुर्वतोऽकुर्वतोवापिसजीवन्मुक्तउच्यते॥पू
र्वार्द्धंविद्वत्संन्यासप्रस्तावेव्याख्यातं॥लोकेबद्धस्यपुरुषस्यशास्त्री
यंकर्मकुर्वतोहंकर्तेतितदाचिदात्माहंकर्ताभवति॥स्वर्गंप्राप्स्या
मीतिहर्षेणबुद्धिर्लिप्यते॥अकुर्वतस्तुसक्तवानस्मीतिअहंकृत
त्वंस्वर्गलाभविषादोलेपः एवंप्रतिषिद्धकर्मणिलौकिककर्मणिचय
थासंभवंयोजनीयं॥मुक्तस्यतुतादात्म्याध्यासाभावाद्धर्षाद्यभावाच्च
नदोषद्वयम्॥यस्मान्नोद्विजतेलोकोलोकान्नोद्विजतेचयः॥हर्षाम
र्षभयान्मुक्तःसजीवन्मुक्तउच्यते॥अधिक्षेपताडनादावप्रवृत्तत्वात्
तस्माल्लोकोनोद्विजते अतएवैतस्मिन्लोकस्याधिक्षेपाद्यप्रवृत्तेः
कस्यचिद्दुष्टस्यतत्प्रवृत्तावपिएतच्चित्तेतादृशविकल्पानुदया
च्चायमपिनोद्विजते॥शांतसंसारकलनःकलावानपिनिष्कलः॥
यःसचित्तोपिनिश्चित्तः सजीवन्मुक्तउच्यते॥शत्रुमित्रमानावमा
नादिविकल्पाःसंसारकलनाचतुःषष्टिविद्याःकलाःतत्सद्भावेपि
तदभिमानव्यवहारयोरभावान्निष्कलत्वं॥चित्तस्यस्वरूपेणसद्भा
वेपिलौकिकभावदृश्यभावान्निश्चित्तत्वं॥चित्तेतिपाठेवासना
वशादात्मध्यानवृत्तिसद्भावेपिलौकिकवृत्त्यभावान्निश्चिंत्यत्वं॥
यःसमस्तार्थजातेषुव्यवहार्यपिशीतलः॥परार्थेष्विवपूर्णात्मा
जीवन्मुक्तःसउच्यते॥परगृहेविवाहोत्सवादौस्वयंगत्वातत्प्रीत्ये
तदीयकार्येव्यवहरन्नपिलाभालाभयोर्हर्षविषादरूपंबुद्धिसं
तापंनप्राप्नोति॥एवमयमुक्तःस्वकार्येपिशीतलःनकेवलंसंता
पाभावाच्छीतलत्वंकिंतुपरिपूर्णस्वरूपानुसंधानादपि॥इति
जीवन्मुक्तलक्षणम्॥अथविदेहमुक्तलक्षणम्॥जीवन्मुक्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पदंत्यक्त्वास्वदेहेकालसात्कृते॥ विशत्यदेहमुक्तत्वंपवनोस्पंद
तामिव॥ यथावायुःकदाचिच्चलनंत्यक्त्वा निश्चलरूपेणावतिष्ठते
॥ तथामुक्तात्मापिउपाधिकृतसंसारंत्यक्त्वा स्वरूपेणावतिष्ठते॥
विदेहमुक्तोनोदेतिनास्तमेतिनशाम्यति॥ नसन्नासन्नदूरस्थोनचा
हंनचनेतरः॥ उदयास्तमयोर्हर्षविषादौ नचशाम्यति नचतेत्परित्या
गी लिंगदेहस्यात्रैवलीनत्वात्सद्व्योजगद्धेतुरविद्यामायोपाधि
नैमायेश्वरः॥ असद्व्याच्योनापिभूतभौतिकः नदूरस्थइत्युक्त्यान
मायातीतः॥ नचेत्युक्त्यास्थूलसूक्ष्मसमीपस्थत्वंनिषिध्यते अहंन
चेतिनसमष्टिश्चनेतरइतिव्यष्टिव्यवहारयोग्योविकल्पः कोपिना
स्तीत्यर्थः॥ तदास्तिमितगंभीरंनतेजोनतमस्ततं॥ अनाख्यमनभि
व्यक्तंसत्किंचिदवशिष्यते॥ एवंविधयाविदेहमुक्त्यासहपरत्वा
त्कर्षत्वोक्तेजीवन्मुक्तावपियावद्यावन्निर्विकल्पाभ्यासस्तावत्ता
वदुत्तमत्वंद्रष्टव्यं॥ भगवद्गीतासुद्वितीयेध्यायेस्थितप्रज्ञःपठ्य
ते॥ अर्जुनउवाच॰॥ स्थितप्रज्ञस्यकाभाषासमाधिस्थस्यकेश
व॥ स्थितधीःकिंप्रभाषेतकिमासीतव्रजेतकिं॥ प्रज्ञातत्त्वज्ञा
नंतद्द्विविधं॥ स्थितमस्थितंचेति॥ यथाजारेनुरक्तनार्याःसर्वेष्वपि
व्यवहारेषुबुद्धिर्जारमेवध्यायतिप्रमाणप्रतीतानिक्रियमाणा
न्यपिगृहकर्माणिसद्यएवविस्मर्यंते तथापरवैराग्योपेतस्ययो
गाभ्यासपाटवेनात्यंतवशीकृतचित्तस्योत्पन्ने तत्त्वज्ञानेतद्बु
द्धिर्जारमिवनैरंतर्येणतत्त्वंध्यायति तदिदंस्थितप्रज्ञानं॥ उक्तगु
णरहितस्यकेनापिपुण्यविशेषेणकदाचिदुत्पन्नेपितत्त्वज्ञाने
गृहकर्मवत्तन्नैवतत्त्वंविस्मर्यते तदिदंअस्थितंप्रज्ञानं॥ एतदेवा
भिप्रेत्यवसिष्ठआह॥ परव्यसनिनीनारीव्यग्रापिगृहकर्मणि॥ तदे
वास्वादयत्यंतःपरसंगरसायनं॥ एवंतत्त्वेपरेशुद्धेधीरोविश्रांति
मागतः॥ तदेवास्वादयत्यंतर्बहिर्व्यवहरन्नपीति॥ तत्रस्थितप्रज्ञः
कालभेदाद्द्विविधः॥ समाहितोव्युत्थितश्च॥ तयोरुभयोर्लक्षणंपू
र्वोत्तराभ्यामर्द्धाभ्यांपृच्छति॥ समाधिस्थस्यस्थितप्रज्ञस्यकाभा
षाकीदृशीलक्षणवाचकैःशब्दैःसर्वैरयंभाष्यते॥ व्युत्थितःस्थि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तप्रज्ञः कीदृग्वाग्व्यवहारं करोति॥ तस्योपवेशनगमने मूढेभ्यो
विलक्षणे कीदृशे॥ श्रीभगवानुवाच॥ प्रजहाति यदा कामान्स
र्वान्पार्थ मनोगतान्॥ आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्य
ते॥ कामास्त्रिविधाः बाह्या आंतरा वासनामात्ररूपाश्चेति॥ उप
जितमोदकादयो बाह्याः॥ आशामोदकादयो आंतराः॥ पथिगत
तृणादिवदापाततः प्रतीता वासनारूपाः॥ समाहितो योगी धी
वृत्तिसंक्षयात्सर्वान्परित्यजति॥ अस्ति चास्य मुखप्रसादलिंगग
म्यः संतोषः स च न कामेषु किंतु आत्मन्येव कामानां त्यक्तत्वात्॥
बुद्धेः परमानंदरूपात्माभिमुखत्वाच्च॥ न चात्रासंप्रज्ञातसमाधावि
वात्मानंदो मनोवृत्त्योल्लिख्यते किंतु स्वप्रकाशचिद्रूपेणात्मना
॥ संतोषश्च न वृत्तिरूपः किंतु संस्काररूपः॥ एवंविधैर्लक्षणवा
क्यैः शब्दैः समाहितो भाष्यते॥ दुःखेष्वनुद्विग्नमनाः सुखेषु विगत
स्पृहः॥ वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥ दुःखं रोगादि
निमित्तजन्या रजोगुणविकाररूपा संतापात्मिका प्रतिकूला चित्त
वृत्तिः तादृशे दुःखे प्राप्ते सत्यहं पापी धिङ्मां दुरात्मानमित्यनुतापात्मि
का तमोगुणविकारत्वेन भ्रांतिरूपा चित्तवृत्तिरुद्वेगः॥ यद्यप्ययं
विवेक इवाभाति तथापि पूर्वस्मिञ्जन्मनि चेत् तत्पापप्रवृत्तिप्रतिबंध
कत्वात्सप्रयोजनो भवति॥ इदानीं तु निष्प्रयोजनत्वाद्भ्रांतित्वं द्र
ष्टव्यं॥ सुखं राज्यपुत्रलाभादिजन्या सात्त्विकी प्रीतिरूपानुकूला चि
त्तवृत्तिः तस्मिन्सुखे सत्यागामिनस्तादृशस्य सुखस्य कारणं पुण्यम
नुष्ठाय दृष्ट्यैव तदपेक्षा तामसी वृत्तिः स्पृहा॥ तत्र च सुखदुःखयोः
प्रारब्धकर्मप्रापितत्वात् व्युत्थितचित्तस्य वृत्तिसंभवाच्च तदुभयं
समुत्पद्यते॥ उद्वेगस्पृहे तु न विवेकिनः संभवतः॥ तथा रागभय
क्रोधाश्च तामसत्वेन कर्मप्रापितत्वाभावान्नास्य विद्यंते॥ एवं
लक्षणलक्षितस्थितधीः स्वानुभवप्रकटनेन शिष्यशिक्षार्थम
नुद्वेगनिःस्पृहत्वादिगमकं वचो भाषत इत्यभिप्रायः॥ यः सर्वत्रा
नभिस्नेहस्तत्तत्प्राप्य शुभाशुभं॥ नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्र
तिष्ठिता॥ यस्मिन्सत्यन्यदीये हानिवृद्धी स्वस्मिन्नारोप्येते तादृशो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्यविषयस्तामसवृत्तिविशेषः स्नेहः सुखहेतुः शुभः कलत्रादिः शुभंतद्गुणकथनादिप्रवर्तिकाधीवृत्तिरभिनंदः ॥ अत्रगुणकथनस्यपरप्ररोचनार्थत्वाभावेनव्यर्थत्वात् तद्धेतुरभिनंदस्तामसः ॥ असूयोत्पादनेनदुःखहेतुः परकीयविद्यादिरेनंप्रति अशुभोविषयः तन्निंदाप्रवर्तिकाबुद्धिवृत्तिर्द्वेषः सोपितामसः ॥ तन्निंदायाः निवारणार्थत्वाभावेनव्यर्थत्वात एतेतामसाधर्माः कथंविवेकिनिसंभवेयुः ॥ यदासंहरतेचायंकूर्मोंगानीवसर्वशः ॥ इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता ॥ सुस्थितस्यसमस्ततामसवृत्त्यभावः पूर्वश्लोकाभ्यामभिहितः समाहितस्यतुवृत्तयएवनसंतिकुतस्तामसत्वशंकेत्यभिप्रायः ॥ विषयाविनिवर्त्ततेनिराहारस्यदेहिनः ॥ रसवर्जंरसोप्यस्यपरंदृष्ट्वानिवर्त्तते ॥ प्रारब्धंकर्मसुखदुःखहेतून्कांश्चिद्विषयांश्चंद्रोदयांधकारादिरूपान्स्वयमेवसंपादयति ॥ अन्यांस्तुगृहक्षेत्रादीन्पुरुषोद्योगद्वारेण ॥ तत्रचंद्रोदयादयः पूर्वेणेंद्रियसंहारलक्षणेनसमाधिनैवनिवर्त्ततेनान्यथा ॥ गृहादयस्तुसमाधिमंतरेणापिनिवर्त्तते ॥ आहरणमाहारः उद्योगः निरुद्योगस्यगृहादिविषयानिवर्त्तते ॥ रसस्तुननिवर्त्तते ॥ रसोमानसीतृष्णासोपिपरमानंदरूपस्यपरस्यब्रह्मणोदर्शनेसतिस्वस्यानंदहेतुभ्योनिवर्त्तते ॥ किंप्रजयाकरिष्यामोयेषांनोयमात्मायंलोकइतिश्रुतेः ॥ यततोह्यपिकौंतेयपुरुषस्यविपश्चितः ॥ इंद्रियाणिप्रमाथीनिहरंतिप्रसभंमनः ॥ तानिसर्वाणिसंयम्ययुक्तआसीतमत्परः ॥ वशेहियस्येंद्रियाणितस्यप्रज्ञाप्रतिष्ठिता ॥ उद्योगत्यागब्रह्मदर्शनप्रयत्नंकुर्वतोपिकादाचित्कप्रमादपरिहारायसमाध्यभ्यासः ॥ तदेतत्किमासीतेतिप्रश्नोत्तरम् ॥ ध्यायतोविषयान्पुंसः संगस्तेषूपजायते ॥ संगात्संजायतेकामः कामात्क्रोधोभिजायते ॥ क्रोधाद्भवतिसंमोहः संमोहात्स्मृतिविभ्रमः ॥ स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धिनाशात्प्रणश्यति ॥ असतिसमाध्यभ्यासेप्रमादप्रकारउपन्यस्तः ॥ संगोध्येयविषयसंनिधिः ॥ संमोहोविवेकपराङ्मुखत्वं ॥ स्मृतिविभ्रमस्तत्त्वानुसंधानाभावः ॥ बुद्धिविनाशोविपरीतभावनोपचयदोषेणप्रतिबद्धसज्ज्ञानस्यमोक्षम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्त्वसामर्थ्याभावः॥रागद्वेषवियुक्तैस्तुविषयानिंद्रियैश्चरन्॥आ
त्मवश्यैर्विधेयात्माप्रसादमधिगच्छति॥विधेयात्मत्वंवशीकृत
मनस्त्वंप्रसादोनैर्मल्यंबंधराहित्यंसमाध्यभ्यासयुक्तस्तद्वास
नाबलाद्व्युत्थानदशायामिंद्रियैर्व्यवहरन्नपिप्रसादंसम्यक्प्रा
प्नोतीतिदेतत्किंप्रजेत्यस्यप्रश्नोत्तरं॥उपरितनेनापिबहुनाग्रंथेन
स्थितप्रज्ञःप्रपंचितः॥ननुप्रज्ञायाःस्थित्युत्पत्तिभ्यांप्रागपिसाध
नत्वेनरागद्वेषादिराहित्यमपेक्षितं॥बाढं॥तथाप्यस्तिविशेषः॥
सचश्रेयोमार्गकारैर्दर्शितः॥विद्यास्थितयेप्रागेयेसाधनभूताःप्र
यत्ननिष्पाद्याःलक्षणभूतास्तुपुनःस्वभावतस्तेस्थिताःस्थितप्रज्ञे
॥जीवन्मुक्तिरितीमांवदंत्यवस्थांस्थितात्मसंबोधां॥बाधितभेदप्र
तिभासमबाधितात्मावबोधसामर्थ्यादिति॥भगवद्भक्तोद्वादशाध्या
येभगवतावर्णितः॥अद्वेष्टासर्वभूतानांमैत्रःकरुणएवच॥निर्म
मोनिरहंकारःसमदुःखसुखःक्षमी॥संतुष्टःसततंयोगीयतात्मा
दृढनिश्चयः॥मय्यर्पितमनोबुद्धिर्योमद्भक्तःसमेप्रियः॥ईश्वरार्पित
मनस्त्वेनसमाहितस्यान्यानुसंधानाभावात्॥सुस्थितस्याप्युदासी
नानुसंधानेनहर्षविषादाभावाच्चसुखदुःखसाम्यंएवंवक्ष्यमाणे
ष्वपिद्रष्टव्यं॥यस्मान्नोद्विजतेलोकोलोकान्नोद्विजतेच
यः॥हर्षामर्षभयोद्वेगैर्मुक्तोयःसचमेप्रियः॥अनपेक्षःशुचिर्द
क्षउदासीनोगतव्यथः॥सर्वारंभपरित्यागीयोमद्भक्तःसमेप्रियः
॥योनहृष्यतिनद्वेष्टिनशोचतिनकांक्षति॥शुभाशुभपरित्यागीभ
क्तिमान्यःसमेप्रियः॥समःशत्रौचमित्रेचतथामानापमानयोः॥शी
तोष्णसुखदुःखेषुसमःसंगविवर्जितः॥तुल्यनिंदास्तुतिर्मौनी
संतुष्टोयेनकेनचित्॥अनिकेतःस्थिरमतिर्भक्तिमान्मेप्रियोनर
इति॥अत्रापिपूर्ववद्विशेषोवार्त्तिककारैर्दर्शितः॥उत्पन्नात्मप्र
बोधस्यह्यद्वेष्टृत्वादयोगुणाः॥अयत्नतोभवंत्यस्यनतुसाधन
रूपिणइति॥गुणातीतश्चतुर्दशाध्यायेवर्णितः॥अर्जुनः॥कै
र्लिंगैस्त्रीन्गुणानेतानतीतोभवतिप्रभो॥किमाचारःकथंचैतां
स्त्रीन्गुणानतिवर्तते॥त्रयोगुणाःसत्त्वरजस्तमांसितेषांपरिणाम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विशेषात्सर्वःसंसारःप्रवर्त्तते॥ अतोगुणातीतत्वमसंसारित्वंजी
वन्मुक्तत्वमितियावत्॥ लिंगानिपरेषामेतदीयगुणातीतत्वबो
धकानिआचारआचरणं तदीयमनःसंचारप्रकारःकथमिति
साधनप्रकारप्रश्नः॥ श्रीभगवानुवाच॥ प्रकाशंचप्रवृत्तिंचमोहमेव
चपांडव॥ नद्वेष्टिसंप्रवृत्तानिननिवृत्तानिकांक्षति॥ उदासीनवदा
सीनोगुणैर्योनविचाल्यते॥ गुणावर्त्ततइत्येवयोवतिष्ठतिनेंगते॥ स
मदुःखसुखःस्वस्थःसमलोष्टाश्मकांचनः॥ तुल्यप्रियाप्रियो
धीरस्तुल्यनिंदात्मसंस्तुतिः॥ मानापमानयोस्तुल्यस्तुल्योमित्रा
रिपक्षयोः॥ सर्वारंभपरित्यागीगुणातीतःसउच्यते॥ मांचयोव्य
भिचारेणभक्तियोगेनसेवते॥ सगुणान्समतीत्यैतान्ब्रह्मभूयायक
ल्पते॥ प्रकाशप्रवृत्तिमोहाःसत्वरजस्तमोगुणाः॥ तेचजाग्रत्स्वप्न
योःप्रवर्त्तंते॥ सुषुप्तिसमाधिमूर्च्छाचित्तावस्थासुनिवर्त्तंते॥ प्रवृत्ति
श्चद्विविधा॥ अनुकूलाप्रतिकूलाचेति॥ तत्रमूढोजागरणेप्रतिकू
लप्रवृत्तिंद्वेष्टि॥ अनुकूलप्रवृत्तिंकांक्षति॥ गुणातीतस्यत्वनुकू
लप्रतिकूलाध्यासाभावाद्द्वेषाकांक्षेनस्तः॥ यथाद्वयोःकलहंकुर्व
तोरवलोकयिताकश्चित्तटस्थःस्वयंकेवलमुदास्ते॥ नतुजयपरा
जयाभ्यामितस्ततश्चाल्यते॥ तथागुणातीतोविवेकीस्वयमुदा
स्तेगुणागुणेषुवर्त्तंते॥ नत्वहमितिविवेकः॥ औदासीन्यंअहमेव
करोमीत्यध्यासस्खलितत्वंनचास्यतदस्ति॥ तदिदंकिमाचारइ
त्यस्यप्रश्नस्योत्तरं॥ समसुखदुःखादीनिलिंगानिअव्यभिचरित
भक्तिसहितस्तानध्यानाभ्यासेनपरमात्मसेवागुणात्ययसाधनम्
॥ ब्राह्मणोव्यासादिभिर्वर्णितः॥ अनुत्तरीयवसनमनुपस्तीर्णशायि
नं॥ बाहूपधायिनंशांतंतंदेवाब्राह्मणंविदुः॥ ब्राह्मणशब्दोब्रह्म
विद्वाचीत्यत्रब्राह्मणइतिश्रुत्यावर्णितं॥ ब्रह्मविदश्चविद्वत्संन्यासा
धिकाराद्यथाजातरूपधरोनाच्छादनंचरतिपरमहंसइत्यादिश्रुत्या
परिग्रहराहित्यस्यमुख्यत्वाभिधानादनुत्तरीयत्वादिकंतस्ययुक्तं॥
येनकेनचिदाच्छन्नोयेनकेनचिदाशितः॥ यत्रक्वचनशायीस्यात्तं
देवाब्राह्मणंविदुः॥ देहनिर्वाहमात्राशनाच्छादनशयनस्थानापेक्षा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यामप्यशनादिगतौगुणदोषौनउत्पद्येते॥उदरपूरणबुध्यादिरूपस्य
निर्वाहस्यसमत्वान्निष्प्रयोजनस्यगुणदोषविचारस्यचित्तदोषत्वा
त्॥अतएवभागवतेपठ्यते॥किंवर्णितेनबहुनालक्षणंगुणदोष
योः॥गुणदोषदृष्टिर्दोषोगुणस्तूभयवर्जितइति॥कंथाकौपीनवा
सास्तुदंडधृक्ध्यानतत्परः॥एकाकीरमतेनित्यंतंदेवाब्राह्मणंवि
दुः॥ब्रह्मोपदेशादिनाप्राण्यनुजिघृक्षयाप्युत्तमत्वज्ञापनेनश्रद्धा
मुत्पादयितुंदंडकौपीनादिलिंगंधारयेत्॥कौपीनंदंडमाच्छादनंच
स्वशरीरोपभोगार्थायचलोकोपकारार्थायचपरिग्रहेदितिस्मृतेः॥अ
नुजिघृक्षयापितदीयगृहकृत्यादिवार्तांनकुर्यात्किंतुध्यानपरोभ
वेत्॥तमेवैकंजानथात्मानमन्यावाचोविमुंचथेतिश्रुतेः॥तमेवधी
रोविज्ञायप्रज्ञांकुर्वीतब्राह्मणः॥नानुध्यायाद्बहूञ्छब्दान्वाचोवि
ग्लापनंहितदितिश्रुतेश्च॥ब्रह्मोपदेशस्तल्पावाङ्नभवतीतिनविरोधी
तच्चध्यानमेकाकित्वेनिर्विघ्नंभवति॥अतएवस्मृत्यंतरेभिहितम्॥ए
कोभिक्षुर्यथोक्तःस्याद्द्वावेवमिथुनंस्मृतं॥त्रयोग्रामःसमाख्यातऊ
र्ध्वंतुनगरायते॥नगरंनहिकर्तव्यंग्रामोवामिथुनंतथा॥ग्रामवार्ता
हितेषांस्याद्भिक्षावार्तापरस्परमिति॥स्नेहपैशुन्यमात्सर्यंसंनिक
र्षात्प्रवर्तते॥निराशिषमनारंभंनिर्नमस्कारमस्तुतिं॥अक्षीणंक्षी
णकर्माणंतंदेवाब्राह्मणंविदुः॥शिष्टैःसंसारिभिःप्रणमतांपुरुषाणां
आशीर्वादःप्रयुज्यते॥यस्ययदपेक्षितंतंप्रतितदभिवृद्धिप्रार्थनमा
शीः तथाचपुरुषाणांभिन्नरुचित्वात्तदभिमतान्वेषणेनव्यग्र
चित्तस्यलोकवासनावर्द्धते॥साचज्ञानविरोधिनी॥तथाचस्मृत्यं
तरं॥लोकवासनयाजंतोःशास्त्रवासनयापिच॥देहवासनया
ज्ञानंयथावन्नैवजायते॥एतच्चारंभनमस्कारादिष्वपिद्रष्टव्यम्॥
आरंभःस्वार्थंपरोपकारार्थंवागृहक्षेत्रादिसंपादनप्रयत्नस्तावे
तावाशीर्वादारंभौयुक्तेनत्याज्यौ॥नचाशीर्वादाभावेप्रणतानांखे
दःशंकनीयः॥लोकवासनाखेदयोरुभयोःपरिहारायनिखिला
शीर्वादप्रतिनिधित्वेननारायणशब्दप्रयोगात्॥आरंभस्तुसर्वोपि
दुष्टएव॥तथाचस्मृतिः॥सर्वारंभाहिदोषेणधूमेनाग्निरिवावृताः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्ति॥नमस्कारोपिविविदिषासंन्यासेभिहितः॥योभवेत्पूर्वसंन्या
सीतुल्योवैधर्मतोयदि॥तस्मैप्रणामःकर्तव्योनेतरायकदाचनेति
॥तत्रपूर्वत्वधर्मतुल्यत्वविचारेचित्तंविक्षिप्यते॥अतएवनमस्का
रमात्रएवबहवःकलहायमानाउपलभ्यंते॥तत्रनिमित्तंवार्त्तिक
कारैर्दर्शितं॥प्रमादिनोबहिश्चित्ताःपिशुनाःकलहोत्सुकाः॥सं
न्यासिनोपिदृश्यंतेदैवसंदूषिताशयाइति॥मुक्तस्यनमस्काराभा
वोभगवत्पादैर्दर्शितः॥नामादिभ्यःपरेभूम्निस्वाराज्येचेत्स्थितोय
दा॥प्रणमेत्कंतदात्मज्ञोनकार्यंकर्मणातदेति॥चित्तकालुष्य
हेतोर्नमस्कारस्यप्रतिषेधेपिसर्वसाम्यबुद्ध्याप्रसादहेतुर्नमस्कारो
ऽभ्युपेयते॥तथाचस्मृतिः॥ईश्वरोजीवकलयाप्रविष्टोभगवानिति
॥प्रणमेद्दंडवद्भूमावाश्वचंडालगोखरमिति॥स्तुतिर्मनुष्यविषया
प्रतिषिध्यतेनेश्वरविषया॥तथाचस्मृतिः॥आदरेणयथास्तौतिध
नवंतंधनेच्छया॥तथाचेद्विश्वकर्तारंकोनमुच्येतबंधनादिति॥अ
अतएवाऽक्षीणत्वंअदीनत्वं॥अतएवस्मृतिः॥अलाभेनविषादीस्या
ल्लाभश्चैनंनहर्षयेदिति॥अलब्ध्वानविषीदेतकालेकालेऽशनंक्वचित्
लब्ध्वानहृष्येद्धृतिमानुभयंदैवतंत्रितं॥क्षीणकर्मत्वंविधिनिषेधा
नधीनत्वं॥निस्त्रैगुण्येपथिविचरतांकोविधिःकोनिषेधइतिस्मर
णात्॥एतदेवाभिप्रेत्यभगवतोक्तं॥त्रैगुण्यविषयावेदानिस्त्रै
गुण्योभवार्जुन॥निर्द्वंद्वोनित्यसत्त्वस्थोनिर्योगक्षेमआत्मवानिति
॥नारदः॥स्मर्तव्यःसततंविष्णुर्विस्मर्तव्योनजातुचित्॥सर्वेवि
धिनिषेधाःस्युरेतयोरेवकिंकराइति॥योऽहेरिवगणाद्भीतःस
न्मानान्नरकादिव॥कुणपादिवयःस्त्रीभ्यस्तंदेवाब्राह्मणंविदुः
॥राजवार्त्तादितेषांस्यादित्युक्तत्वात्तथैवतद्गुणाद्भीरित्युपपद्यते
सन्मानस्यासक्तिकारणत्वात्पुरुषार्थविरोधित्वान्नरकवद्द्वेष्य
त्वंमरणवदितिवापाठः॥अतएवस्मृतिः॥असन्मानात्तपोवृद्धिः
सन्मानात्तुतपःक्षयः॥अर्चितःपूजितोविप्रोदुग्धागौरिवसीदति
॥एतदेवाभिप्रेत्यावमानउपादेयतयास्मर्यते॥तथाचरेतवैयोगी
सतांधर्ममदूषयन्॥ जनायथावमन्येरन्गच्छेयुर्नैवसंगतमिति॰

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्त्रीपुद्विविधोदोषः॥प्रतिषिद्धंजुगुप्सितत्वंच॥तत्रप्रतिषिद्धमानं
कदाचित्प्रारब्धबलादुल्लंघ्यते॥तदेतदभिप्रेत्याहस्मृतिः॥मात्रा
स्वस्रादुहित्रावानैकशय्यासनोभवेत्॥बलवानिंद्रियग्रामोविद्वां
समपिकर्षति॥तथाचस्मृतिभिर्जुगुप्सादर्शिता॥स्त्रीणामवाच्य
देशस्यक्लिन्ननाडीव्रणस्यच॥अभेदेपिमनोभेदाज्जनःप्रायेण
वंच्यते॥चर्मखंडद्विधाभिन्नमपानोद्गारधूपितं॥येरमंतिनरा
स्तत्रक्रिमितुल्याःकथंनते॥येरमंतिनमस्तेभ्यःसाहसंकिमतः
परमितिवापाठः॥अतःप्रतिषेधजुगुप्सयोरुभयोर्विवक्षयाकुण
पदृष्टांतोत्राभिहितः॥येनपूर्णमिवाकाशंभवत्येकेनसर्वदा॥शू
न्यंयस्यजनाकीर्णंतंदेवाब्राह्मणंविदुः॥संसारिणामेकाकित्वेना
वस्थानंभयालस्यादिहेतुत्वाद्दुर्जयंजनसंबाधश्चातथाविधत्वाद्यु
पेयः॥योगिनस्तुतद्विपरीतत्वमेकाकित्वेसत्यविघ्नेनध्यानानुवृत्तौ
परिपूर्णेनपरमानंदात्मनासर्वमाकाशंपूर्णमिवावभासते॥अतो
भयालस्यशोकमोहादयोनभवंति॥तत्रकोमोहःकःशोकएकत्व
मनुपश्यतइतिश्रुतेः॥जनाकीर्णमितिजनसहितंस्थानंराजवार्ता
दिनाध्यानविरोधित्वादानंदात्मप्रतीतिरहितंतच्छून्यमिवचित्तं
क्लेशयति॥जगतोमिथ्यात्वादात्मनःपूर्णत्वाच्चेत्यर्थः॥अतिवर्णाश्र
मीस्तूतसंहितायांमुक्तिखंडेपंचमाध्यायेपरमेश्वरेणवर्णितः॥ब्र
ह्मचारीगृहस्थश्चवानप्रस्थोथभिक्षुकः॥अतिवर्णाश्रमीतेपिक्रमा
च्छ्रेष्ठाविचक्षणाः॥अतिवर्णाश्रमीप्रोक्तोगुरुःसर्वाधिकारिणां॥
नकस्यापिभवेच्छिष्योयथाहंपुरुषोत्तमः॥अतिवर्णाश्रमीसाक्षा
द्गुरूणांगुरुरुच्यते॥तत्समोनाधिकश्चास्मिंल्लोकेस्त्येवनसंशयः
॥यःशरीरेंद्रियादिभ्योविभिन्नंसर्वसाक्षिणं॥पारमार्थिकविज्ञान
सुखात्मानंस्वयंप्रभं॥परंतत्त्वंविजानातिसोतिवर्णाश्रमीभवेत्॥
योवेदांतमहावाक्यश्रवणेनैवकेशव॥आत्मानमीश्वरंवेदसोतिव
र्णाश्रमीभवेत्॥योवस्थात्रयनिर्मुक्तमवस्थासाक्षिणंसदा॥महा
देवंविजानातिसोतिवर्णाश्रमीभवेत्॥वर्णाश्रमादयोदेहेमायया
परिकल्पिताः॥नात्मनोबोधरूपस्यममतेसंतिसर्वदा॥इतियोवेद

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेदांतैः सोतिवर्णाश्रमी भवेत्॥ आदित्यसंनिधौ लोकश्चेष्टते स्व
यमेव तु॥ तथा मत्संनिधावेव समस्तं चेष्टते जगत्॥ इति यो वेद०॥
सुवर्णे हारकेयूरकटकस्वस्तिकादयः॥ कल्पिता माययातद्वज्जग
न्मय्येव सर्वदा॥ इति यो वेद०॥ शुक्तिकायां यथा तारं कल्पितं माय
या तथा॥ महदादि जगन्मायामयं मय्येव कल्पितं॥ इति०॥ चंडाल
देहे पश्वादि शरीरे ब्रह्मविग्रहे॥ अन्येषु तारतम्येन स्थितेषु पुरुषो
त्तम॥ व्योमवत्सर्वदा व्याप्तः सर्वसंबंधवर्जितः॥ एकरूपो महादे
वः स्थितः सोहं परामृतः॥ इति यो०॥ विनष्टदिग्भ्रमस्यापि यथा पूर्वं
विभाति दिक्॥ तथा विज्ञानविध्वस्तं जगन्मे भाति तन्न हि॥ इति यो॰
यथा स्वप्नप्रपंचोयं मयि मायाविजृंभितः॥ तथा जाग्रत्प्रपंचोपि म
यि मायाविजृंभितः॥ इति यो०॥ यस्य वर्णाश्रमाचारो गलितः स्वात्म
दर्शनात्॥ स वर्णाश्रमान्सर्वानतीत्य स्वात्मनि स्थितः॥ यस्त्यक्त्वा
स्वाश्रमान्वर्णानात्मन्येव स्थितः पुमान्॥ सोतिवर्णाश्रमी प्रोक्तः स
र्ववेदार्थवेदिभिः॥ न देहो नेंद्रियं प्राणो न मनो बुध्यहंकृती॥ न चित्तं
नैव माया च न च व्योमादिकं जगत्॥ न कर्ता नैव भोक्ता च न च भोज
यिता तथा॥ केवलं चित्सदानंदं ब्रह्मैवात्मा यथार्थतः॥ जलस्य
चलनादेव चंचलत्वं यथा रवेः॥ तथाहंकारसंसारादेव संसार आत्म
नः॥ तस्मादन्यगता वर्णा आश्रमा इति केशव॥ आत्मन्यारोपि
ता एव भ्रांत्या ते नात्मवेदिनः॥ न विधिर्न निषेधश्च न वर्ज्यावर्ज्यक
ल्पना॥ आत्मविज्ञानिनामस्ति तथा नान्यज्जनार्दन॥ आत्मविज्ञा
निनां निष्ठामहं वेदांबुजेक्षण॥ मायया मोहिता मर्त्या नैव जानंति
सर्वदा॥ न मांसचक्षुषा निष्ठा ब्रह्मविज्ञानिनामियं॥ दृष्टुं शक्या स्व
तः सिद्धा विदुषां सैव केशव॥ यत्र सुप्ता जना नित्यं प्रबुद्धस्तत्र संय
मी॥ प्रबुद्धा यत्र ते विद्वान्सुषुप्तस्तत्र केशव॥ एवमात्मानमद्वंद्वं नि
र्विकारं निरंजनं॥ नित्यशुद्धं निराभासं चिन्मात्रं परमामृतं॥ यो वि
जानाति वेदांतैः स्वानुभूत्या च निश्चितं॥ सोतिवर्णाश्रमी प्रोक्तः स
एव गुरुरुत्तम इति॥ तदेवं विमुक्तश्च विमुच्यत इत्यादि श्रुत्तो जी
वन्मुक्तस्थितप्रज्ञभगवदुक्तगुणातीतब्राह्मणातिवर्णाश्रममति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पादकस्येतिवाक्यानिजीवन्मुक्तिसद्भावेप्रमाणानीतिस्थितं॥ ❁॥
॥इतिजीवन्मुक्तप्रमाणप्रकरणं॥ ॥अथजीवन्मुक्तिसाधनंनिरू
पयामः॥ ॥तत्त्वज्ञानमनोनाशवासनाक्षयास्तत्साधनं॥अतए
ववासिष्ठरामायणउपशमनप्रकरणस्यावसानेजीवन्मुक्तशरीर
णामित्यस्मिन्प्रस्तावेवसिष्ठआह॥वासनाक्षयविज्ञानमनोनाश
महामते॥समकालंचिराभ्यस्ताभवंतिफलदाइमेइति॥अन्वय
मुक्त्वाव्यतिरेकमाह॥त्रयएतेसमंयावन्नस्वभ्यस्तामुहुर्मुहुः॥ता
वन्नपदसंप्राप्तिर्भवत्यपिसमाशतैरिति॥समकालाभ्यासाभावे
बाधकमाह॥एकैकशोनिषेव्यंतेयद्येतेचिरमप्यलं॥तन्नसिद्धिं
प्रयच्छंतिमंत्राःसंकलिताइव॥संकीर्तिताइतिवापाठः॥यथासं
ध्यावंदनेमार्जनेनसहविनियुक्तानांआपोहिष्ठेत्यादीनांतिसृणा
मृचांमध्येप्रतिदिनमेकैकस्यामृचःपाठेशास्त्रीयानुष्ठानंनसिध्य
ति॥यथाषडंगमंत्राणामेकैकमंत्रेणनसिद्धिः॥यथावालोकेशा
कसूपोदनादीनामेकैकेननभोजनसिद्धिः॥तद्वच्चिराभ्यासस्यप्र
योजनमाह॥त्रिभिरेतैश्चिराभ्यस्तैर्हृदयग्रंथयोदृढाः॥निःशंक
मेवत्रुट्यंतिविसभेदाद्गुणाइवेति॥तस्यैवव्यतिरेकमाह॥जन्मांत
रशताभ्यस्ताराम संसारसंस्थितिः॥साचिराभ्यासयोगेनविनान
क्षीयतेकचिदिति॥नकेवलमेकैकाभ्यासेफलाभावःकिंतुतत्त्व
रूपमपिनसिध्यतीत्याह॥तत्त्वज्ञानंमनोनाशोवासनाक्षयएवच
॥मिथःकारणतांगत्वादुःसाध्यानिस्थितानिहि॥त्रयाणामेतेषां
मध्येद्वयोर्द्वयोर्मेलनेनत्रीणिद्वंद्वानिभवंति॥तत्रमनोनाशवासना
क्षयद्वंद्वस्यान्योन्यकारणत्वं॥व्यतिरेकमुखेनाह॥यावद्विलीनंन
मनोनतावद्वासनाक्षयः॥नक्षीणावासनायावच्चित्तंतावन्नशाम्य
ति॥प्रदीपज्वालासंतानवद्वृत्तिसंतानरूपेणपरिणममानमंतः
करणद्रव्यंमननात्मकत्वान्मनइत्युच्यते॥तस्यनाशोनामवृत्तिरू
पपरिणामंपरित्यज्यनिरुद्धत्वाकारेणपरिणामः॥तथाचपतंजलि
योगशास्त्रेसूत्रयामास॥व्युत्थाननिरोधयोरभिभवप्रादुर्भावौनिरो
धक्षणचित्तान्वयोनिरोधपरिणामइति॥व्युत्थानसंस्काराअभि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भूयंते॥निरोधसंस्काराः प्रादुर्भवंति॥निरोधयुक्तः क्षणश्चित्तेना
न्वीयते॥सोयंमनोनाशरूपवगंतव्यं॥पूर्वापरपरामर्शमंतरेण
सहसोत्पद्यमानस्यक्रोधादिवृत्तिविशेषस्यहेतुश्चित्तगतः सं
स्कारोवासनापूर्वपूर्वाभ्यासेनचित्तेवास्यमानत्वात्तस्याश्चवास
नायाः क्षयोनामविवेकजन्यायांशांतिदांतिशुद्धवासनायांदृढा
यांसत्यपिबाह्येनिमित्तेक्रोधाद्यनुत्पत्तिः॥तत्रमनोनाशाभावेवृ
त्तिषूत्पद्यमानासुकदाचिद्बाह्यनिमित्तेनक्रोधाद्युत्पत्तेः नास्ति
वासनाक्षयः॥अक्षीणायांचवासनायांतथैववृत्त्युत्पादनान्ना
स्तिमनोनाशः॥तत्त्वज्ञानमनोनाशयोः परस्परकारणत्वंव्यतिरे
कमुखेनाह॥यावन्नतत्त्वविज्ञानंतावच्चित्तशमः कुतः॥यावन्न
चित्तोपशमोनतावत्तत्त्ववेदनमिति॥इदंसर्वमात्मैवप्रतीयमानं
रूपरसादिकंजगन्मायामयंनत्वेतद्वस्तुतोस्तीतिनिश्चयस्तत्त्व
ज्ञानंतस्यानुत्पत्तौरूपरसादिविषयाणांसद्भावेसतितद्गोचराः चित
वृत्तयोननिवारयितुंशक्यंते॥यथाप्रक्षिप्यमाणेषुइंधनेषुवह्नि
ज्वालानवार्यंतेतद्वत्॥असतिचचित्तोपशमेवृत्तिभिर्गृह्यमाणे
षुरूपादिषुसत्सुनेहनानास्तिकिंचनेतिश्रुतेर्यजमानः प्रस्तरइ
त्यादेरिवप्रत्यक्षविरोधशंकयाब्रह्माद्वितीयमित्येतादृशस्त
त्त्वनिश्चयोनोदीयात्॥वासनाक्षयतत्त्वज्ञानयोः परस्परकारण
त्वंव्यतिरेकमुखेनाह॥यावन्नवासनानाशस्तावत्तत्त्वागमः कुतः
॥यावन्नतत्त्वसंप्राप्तिर्नतावद्वासनाक्षयइति॥क्रोधादिवास
नास्वनुवृत्तासुशमादिसाधनाभावान्नतत्त्वज्ञानमुदेति अज्ञाते
चाद्वितीयब्रह्मतत्त्वेक्रोधादिनिमित्तस्यसत्यत्वभ्रमानपायात्
नवासनाक्षीयते॥तथोक्तानांत्रयाणांद्वंद्वानांअन्योन्यकारणत्व
मन्वयमुखेनचवयमुदाहरामः॥मनसिनष्टेसतिसंस्कारोद्बो
धकस्यबाह्यनिमित्तस्याप्रतीतौवासनाक्षीयते क्षीणायांवासना
यांहेत्वभावेनक्रोधादिवृत्त्यनुदयान्मनोनश्यति॥तदिदंमनोना
शवासनाक्षयद्वंद्वं॥दृश्यतेत्वग्र्ययाबुद्ध्याइतिश्रुतेरात्मैक्याभि
मुखवृत्तेर्दर्शनहेतुत्वादितरवृत्तिनाशस्यतत्त्वज्ञानहेतुत्व

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मवगम्यते॥सतिच तत्वज्ञाने मिथ्याभूते जगति नरविषाणादावि
व धीहृत्यनुदयादात्मनश्च दृष्टत्वेन पुनर्दृश्यत्वनुपयोगान्निरंधना
ग्निवन्मनो नश्यति॥तदिदं मनोनाशतत्वज्ञानयोर्द्वंद्वं॥तत्वज्ञा
नस्य क्रोधादिवासनाक्षयहेतुतां वार्तिककार आह॥रिपौ बंधौ
स्वदेहे च समैकात्म्यं प्रपश्यतः॥विवेकिनः कुतः कोपः स्वदेहाव
यवेष्विवेति॥क्रोधादिवासनाक्षयरूपस्य शमादेः ज्ञानहेतुत्वं
प्रसिद्धं॥वसिष्ठोपि॥गुणाः शमाद्यो ज्ञानाच्छमादिभ्यस्तथाज्ञता॥
परस्परं विवर्द्धेते ह्येपद्मसरसीइव॥तदिदं वासनाक्षयतत्वज्ञान
योर्द्वंद्वं॥तत्वज्ञानादीनां त्रयाणां संपादने साधनमाह॥तस्माद्राघ
वयत्नेन पौरुषेण विवेकिना॥भोगेच्छां दूरतस्त्यक्त्वा त्रयमेतत्समा
श्रयेदिति॥पौरुषो यत्नः केनाप्युपायेनावश्यं संपादयिष्यामीत्ये
वंविधोत्साहरूपो निर्बंधः विवेको नाम विभज्य निश्चयः॥तत्व
ज्ञानस्य श्रवणादिकं साधनं मनोनाशस्य योगः॥वासनाक्षयस्य
प्रतिकूलवासनोत्पादनमिति॥भोगेच्छायाः स्वल्पाया अभ्युपग
मे हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते इति न्यायेनातिप्रसंग
स्य दुर्वारत्वाद्दूरीकृत इत्युक्तं॥ननु पूर्वत्र विविदिसंन्यासस्य तत्व
ज्ञानफलं विद्वत्संन्यासस्य जीवन्मुक्तिरिति व्यवस्थिता वर्णिता॥
तथा च सति प्रथमतः तत्वज्ञानं संपाद्य पश्चाद्विद्वत्संन्यासं कृत्वा
जीवतः स्वस्य बंधरूपयोर्वासनामनोद्वयोर्विनाशः संपादनी
य इति प्रतिभाति॥अत्र तु तत्वज्ञानादीनां सहैवाभ्यासो नियम्य
ते॥अतः पूर्वोत्तरविरोध इति चेत्॥नायं दोषः॥प्रधानोपसर्जन
भावेन व्यवस्थोपपत्तेः॥ विविदिषासंन्यासिनस्तत्वज्ञानं प्रधानं म
नोनाशवासनाक्षयावुपसर्जनीभूतौ॥विद्वत्संन्यासिनस्तु तद्वैपरी
त्यं॥अतः सहाभ्यासः उभयत्राप्यविरुद्धः॥न च तत्वज्ञानोत्पत्ति
मात्रेण कृतार्थस्य किमुत्तरकालीनेनाभ्यासप्रयासेनेति शंकनी
यं जीवन्मुक्तिप्रयोजननिरूपणेन परिहरिष्यमाणत्वात्॥ननु वि
द्वत्संन्यासिनो वेदनसाधनश्रवणाद्यनुष्ठानवैकल्याद्वेदनस्य च
स्वरूपेण कर्तुमकर्तुमन्यथा कर्तुमशक्यस्याननुष्ठेयत्वात्॥उपास

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जेनाप्युत्तरकालीनोभ्यासः कीदृश इति चेत्। केनापि द्वारेण पुनः
पुनस्तत्त्वानुस्मरणमिति ब्रूमः॥ तादृशश्चाभ्यासोऽलीलोपाख्याने द
र्शितः॥ तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं॥ एतदेकपरत्वं च
ज्ञानाभ्यासं विदुर्बुधाः॥ सर्गादावेव नोत्पन्नं दृश्यं नास्त्येव तत्सदा
॥ इदं जगदहं चेति बोधाभ्यासं विदुः परमिति॥ ननु मनोनाशवास
नाक्षयाभ्यासावपि तत्रैव दर्शितौ॥ अत्यंताभावसंपत्तौ ज्ञातुर्ज्ञेय
स्य वस्तुनः॥ युक्त्या शास्त्रैर्यतंते ये तेतत्राभ्यासिनस्थिता इति॥ ज्ञा
तृज्ञेययोर्मिथ्यात्वधीरभावसंपत्तिः स्वरूपेणाप्यप्रतीतिरत्यंता
भावसंपत्तिर्मुक्तिर्योगः सोयं मनोनाशाभ्यासः॥ दृश्यासंभवबो
धेन रागद्वेषादितानवे॥ रतिर्नवोदिता यासौ ब्रह्माभ्यासः स उच्य
ते॥ सोयं वासनाक्षयाभ्यासः॥ ते चैते त्रिविधाभ्यासेषु साम्येन प्रती
यमानेषु प्रधानोपसर्जनभावेन न विवेक्तुं शक्यते इति चेत्। मैवं
॥ प्रयोजनानुसारेण विवेक्तुं शक्यत्वात्॥ मुमुक्षोः पुरुषस्य जीव
न्मुक्तिर्विदेहमुक्तिश्चेति द्वयं प्रयोजनं॥ अत एव विमुक्तश्च वि
मुच्यत इति श्रूयते॥ तत्र जीवतः पुरुषस्य दैवसंपदा मोक्षः॥
आसुरसंपदा बंधः॥ एतच्च षोडशाध्याये भगवताभिहितम्॥ दै
वीसंपद्विमोक्षाय निबंधायासुरीमतेति॥ ते च संपदौ तत्रैवाभि
हिते॥ अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः॥ दानं दमश्च
यज्ञश्च स्वाध्यायस्तप आर्जवं॥ अहिंसा सत्यमक्रोधस्त्यागः शां
तिरपैशुनं॥ दया भूतेष्वलोलुत्वं मार्दवं ह्रीरचापलं॥ तेजः क्षमा
धृतिः शौचमद्रोहो नातिमानिता॥ भवंति संपदं दैवीमभिजात
स्य भारत॥ दंभो दर्पोभिमानस्य क्रोधः पारुष्यमेव च॥ अज्ञानं चा
भिजातस्य पार्थ संपदमासुरीमिति॥ पुनरपि आध्यायपरिसमा
प्तेरासुरसंपत्प्रपंचिता॥ तत्र अशास्त्रीयायाः स्वभावसिद्धाया
आसुरसंपदो दुर्वासनायाः शास्त्रीयपुरुषप्रयत्नसाध्यया दैव
संपदा सद्वासनया क्षये सति जीवन्मुक्तिर्भवति॥ वासनाक्षयव
न्मनोनाशस्यापि जीवन्मुक्तिहेतुत्वं श्रूयते॥ मन एव मनुष्याणां
कारणं बंधमोक्षयोः॥ बंधाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतं॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यतोनिर्विषयस्यास्यमनसोमुक्तिरिष्यते॥अतोनिर्विषयंनित्यंम
नःकार्यंमुमुक्षुणा॥निरस्तविषयासंगंसन्निरुद्धंमनोहृदि॥यदा
यात्युन्मनीभावंतदातत्परमंपदं॥तावदेवनिरोद्धव्यंयावद्धृदिगतं
क्षयं॥एतज्ज्ञानंचध्यानंचशेषोन्यायस्यविस्तरइति॥बंधोद्विवि
धः॥तीव्रोमृदुश्च॥तत्रासुरसंपत्सासादेवक्लेशहेतुत्वात्तीव्रोबं
धः॥द्वैतमात्रप्रतीतिस्तुस्वयमक्लेशरूपत्वादासुरसंपदुल्याद
कत्वाच्चमृदुबंधः॥तत्रवासनाक्षयेणतीव्रबंधएवनिवर्त्यते॥
मनोनाशेनतूभयं॥तर्हिमनोनाशेनैवालंवासनाक्षयस्तुनिरर्थकइ
तिचेत्॥नभोगहेतुनाप्रबलेनप्रारब्धेनव्युत्थापितेमनसिवासना
क्षयस्यतीव्रबंधनिवारणार्थत्वात्॥भोगस्यमृदुबंधेनाप्युपपत्तेः
॥तामसवृत्तयस्तीव्रबंधःसात्विकराजसवृत्तिद्वयंमृदुबंधः॥ए
तच्च॥दुःखेष्वनुद्विग्नमनाःसुखेषुविगतःस्पृहइत्यत्रस्पष्टीकृतं
॥एवंचसतिमृदुबंधस्याभ्युपेयत्वात्तीव्रबंधस्यवासनाक्षयेणैव
निवृत्तेरनर्थकोमनोनाशइतिचेन्न॥दुर्बलप्रारब्धापादितानाम
वश्यंभाविभोगानांप्रतीकार्यत्वात्॥तादृग्भोगस्यप्रतीकारनिर्व
र्त्यत्वमभिप्रेत्येदमाहुः॥अवश्यंभाविभावानांप्रतीकारोभवेद्यदि
॥तदादुःखैर्नलिप्येरन्नलरामयुधिष्ठिराइति॥तदेवंजीवन्मुक्तिं
प्रतिवासनाक्षयमनोनाशयोःसाक्षात्साधनत्वात्प्राधान्यम्॥त
त्त्वज्ञानंतुतयोरुत्पादनेनव्यवहितत्वात्उपसर्जनम्॥तत्त्वज्ञान
स्यवासनाक्षयहेतुत्वंबहुशःश्रुतौश्रूयते॥ज्ञात्वादेवंसर्वपाशा
पहानिःक्षीणैःक्लेशैर्जन्ममृत्युप्रहाणिः॥अध्यात्मयोगाधिगमेन
देवंमत्वाधीरोहर्षशोकौजहाति॥तरतिशोकमात्मवित्॥तत्र
कोमोहःकःशोकएकत्वमनुपश्यतः॥ज्ञात्वादेवंमुच्यतेसर्वपाशै
रिति॥मनोनाशहेतुत्वंचतत्त्वज्ञानस्यश्रुतिसिद्धम्॥विद्यादशा
मभिप्रेत्येदंश्रूयते॥यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्ये
त्केनकंजिघ्रेदित्यादि॥गौडाचार्याश्चाहुः॥आत्मतत्वानुबो
धेनसंकल्पयतेतदा॥अमनस्तांतदायातिग्राह्याभावेतद
ग्रहइति॥जीवन्मुक्तेर्वासनाक्षयमनोनाशाविवविदेहमुक्तेः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

साक्षात्साधनत्वाज्ज्ञानंप्रधानं॥ज्ञानादेवतुकैवल्यंप्राप्यतेयेनमु
च्यतेइतिस्मृतेः॥केवलस्यात्मनोभावःकैवल्यंदेहादिरहित
त्वंतच्चज्ञानादेवप्राप्यते॥सदेहस्याज्ञानकल्पितत्वेनज्ञानैक
निवर्त्यत्वात्ज्ञानादेवेतिएवकारेणकर्मव्यावृत्तिः॥नकर्मणान
प्रजयेतिश्रुतेः॥यस्तुज्ञानशास्त्रमनभ्यस्ययथासंभवंवासनाक्ष
यमनोनाशावभ्यस्यसगुणंब्रह्मोपास्तेनतस्यकैवल्यमस्तिलिं
गदेहस्यानपायात्॥अतःएवकारेणतावपिव्यावर्त्यते॥येनमुच्य
तइत्यस्यायमर्थः॥येनज्ञानंप्रापितत्वेनकेवलत्वेनकृतस्तत्संबंधा
द्विमुच्यतइति॥बंधश्चानेकविधः॥अविद्याग्रंथिरब्रह्मत्वं॥हृ
दयग्रंथिःसंशयाः॥कर्माण्यसर्वकामत्वंमृत्युःपुनर्जन्मेति॥आ
दिशब्दैस्तत्रतत्रव्यवहारात्॥अज्ञानतएतेबंधाःसर्वेज्ञाननिव
र्त्याः॥तथाचश्रुतयः॥एतद्योवेदनिहितंगुहायांसोविद्याग्रंथिंवि
किरतीह सौम्य॥ब्रह्मवेदब्रह्मैवभवति॥भिद्यतेहृदयग्रं॰पराव
रे॥योवेदनिहितंगुहायांपरमेव्योमन्॥सोश्नुतेसर्वान्कामान्स
ह॥तमेवंविदित्वातिमृत्युमेति॥यस्तुविज्ञानवान्भवतिसमनस्कःस
दाशुचिः॥सतुतत्पदमाप्नोतियस्माद्भूयोनजायते॥यएवंवेदाहंब्र
ह्मास्मीतिसइदंसर्वंभवतीत्यादीन्यसर्वज्ञत्वादिबंधनिवृत्तिपरा
णिवाक्यान्यत्रोदाहरणीयानि॥सेयंविदेहमुक्तिर्ज्ञानोत्पत्तिसमका
लीनाज्ञेया॥ब्रह्मण्यविद्यारोपितानामेतेषांबंधानांविद्ययाविनाशे
सतिपुनरुत्पत्त्यसंभवादनुभवाच्च॥तदेतद्विद्यासमकालत्वंभाष्य
कारः समन्वयसूत्रेप्रपंचयामास॥तदधिगमउत्तरपूर्वाघयोरश्ले
षविनाशौतद्व्यपदेशादिति॥ननुवर्तमानदेहपातानंतरंभाविनी
विदेहमुक्तिरितिबहवोवर्णयंति॥तथाचश्रुतिःतस्यतावदेवचि
रंयावन्नविमोक्ष्येऽथसंपत्स्यइति॥वाक्यवृत्तावप्युक्तम्॥प्रारब्ध
कर्मवेगेनजीवन्मुक्तोयदाभवेत्॥कंचित्कालमनारब्धकर्मबंध
स्यसंक्षये॥निरस्तातिशयानंदंवैष्णवंपरमंपदम्॥पुनरावृत्तिरहि
तंकैवल्यंप्रतिपद्यतइति॥सूत्रकारोप्याह॥भोगेनत्वितरेक्षपयि
त्वासंपद्यतइति॥इतरेप्रारब्धपुण्यपापे॥वसिष्ठोप्याह॥जीवन्मु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्कपदंस्य क्वास्वदेहे कालसात्कृते॥ विप्रस्य देहमुक्तत्वं पवनोऽस्पंदतामिवेति॥ नायंदोषः॥ विवक्षाविशेषेण तद्द्वयस्याविरोधात्॥ विदेहमुक्तिरित्यत्रेत्यनेन देहशब्देन कृत्स्नदेहजातं विवक्षितं तद्वृद्धैर्वर्णितं॥ अस्माभिस्तु भाविदेहमात्र विवक्षयाउच्यते तदनारंभायैव ज्ञानसंपादनात्॥ अयंतु देहः पूर्वमेवारब्धः अतो ज्ञानेनापि नास्यारंभो वारयितुं शक्यते॥ एतद्देहनिवृत्तिरपिन ज्ञानफलं॥ अज्ञानिनामपि आरब्धकर्मक्षये तन्निवृत्तेः तर्हि वर्तमान लिंगदेहनिवृत्तिर्ज्ञानफलमस्तु ज्ञानमंतरेण तदनिवृत्तेरितिचेत्॥ नत्स्यपिज्ञानेजीवन्मुक्तेतन्निवृत्त्यभावात्॥ ननु ज्ञानस्य कंचित्कालंमारब्धकर्मणाप्रतिबद्धत्वेनानिवर्तकत्वेपिप्रतिबंधक्षये लिंगदेहनिवर्तकत्वंभविष्यतीतिचेत्॥ न पंचपादिकाचार्येण यतो ज्ञानमज्ञानस्यैव निवर्तकमिति उपपादितत्वात्॥ तर्हि लिंगदेहनिवृत्तेः किंसाधनमितिचेत् सामग्री निवृत्तिरिति ब्रूमः॥ द्विविधं हि कार्यनिवर्तकं॥ विरोधिसद्भावः सामग्रीनिवृत्तिश्चेति॥ तद्यथा विरोधिना वायुना तैलवर्तिसामग्रीनिवृत्त्या वा दीपो निवर्तते॥ लिंगदेहस्य साक्षाद्विरोधिनंन पश्यामः॥ सामग्री हि द्विविधा॥ प्रारब्धमनारब्धं चेति॥ ताभ्यामुभाभ्यामज्ञानिनां लिंगदेहे हामुत्र चावतिष्ठते॥ ज्ञानिनांत्वनारब्धस्य ज्ञानेन निवृत्तेः प्रारब्धस्य च भोगेन निवृत्तेः तैलवर्तिरहितदीपवत्सामग्रीनिवृत्त्या लिंगदेहो निवर्तते अतो तन्निवृत्तिर्ज्ञानफलं॥ ननु अनेन न्यायेन भाविदेहानारंभोपि ज्ञानफलं॥ तथाहि किमनारंभ एव हि फलं किंवा तत्प्रतिपालनं॥ नाद्यः॥ तस्य प्रागभावरूपत्वेनानादिसिद्धत्वात्॥ न द्वितीयः अनारब्धकर्मरूपसामग्रीनिवृत्त्यैव भाविदेहारंभप्रागभावप्रतिपालनसिद्धेः नच तन्निवृत्तिः फलं॥ अविद्यानिवृत्तेरेव विद्याफलत्वात् नैषदोषः॥ भाविजन्मानारंभादीनां विद्याफलत्वस्य प्रामाणिकत्वात्॥ यस्माद्भूयो न जायत इत्युदाहृताः श्रुतयस्तत्र प्रमाणं॥ न च ज्ञानमज्ञानस्यैव निवर्तकमिति न्यायेन विरोधः॥ अज्ञानसहभावनियतानामब्रह्मत्वादीनामज्ञानशब्देन पंचपादिकाचार्यैर्विवक्षितत्वात्॥ अन्यथानुभवि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रेधात्॥ अनुभूयते ह्यज्ञाननिवृत्तिवद्ब्रह्मत्वादिनिवृत्तिरपि तस्माद्वा विदेहता हित्यलक्षणा विदेहमुक्तिर्ज्ञानसमकालीना॥ तथा च याज्ञवल्क्य वचनं श्रूयते॥ अभयं वै जनक प्राप्तोसीति एतावदरे खल्वमृतत्वमिति च॥ श्रुत्यंतरेपि॥ तमेवं विद्वानमृत इह भवतीति यद्युक्तं त्वेपि तत्त्वज्ञाने तत्फलभूता विदेहमुक्तिस्तदानीं न भवेत्॥ अथोच्येत कालांतरे च भवेत्॥ तदा ज्योतिष्टोमादाविव ज्ञानजन्यमपूर्वं किंचित्कल्प्येत॥ तथा च कर्मशास्त्र एव ज्ञानशास्त्रमंतर्भवेत्॥ अथोच्येत मंत्रादिप्रतिबद्धाग्निवत्प्रारब्धप्रतिबद्धं ज्ञानं कालांतरे विदेहमुक्तिं दास्यतीति मैवं अविरोधात्॥ न ह्यस्मदभिमता विदेहात्यंताभावलक्षणा विदेहमुक्तिर्वर्त्तमानदेहमात्रस्यापक्वत्वेन प्रारब्धेन विरुध्यते॥ येन प्रतिबध्येत किंच क्षणिकत्वेन कालांतरे स्वयमविद्यमानं ज्ञानं कथं मुक्तिं दद्यात्॥ ज्ञानांतरं चरमब्रह्मसाक्षात्कारलक्षणमुत्पत्स्यत इति चेत्॥ न साधनाभावात्॥ प्रतिबंधकप्रारब्धनिवृत्त्यैव सद्गुरुशास्त्रदेहेंद्रियाद्यशेषजगत्प्रतिभानिवृत्तेः किं तत्साधनं स्यात्॥ तर्हि भूयश्चांते विश्वमायानिवृत्तिरित्यस्याः श्रुतेः कोर्थ इति चेत्॥ आरब्धांते निमित्ताभावाद्देहेंद्रियाद्यशेषनैमित्तिकनिवृत्तिरित्येवार्थः॥ ततो भवदभिमता चरमा नदेहताहित्यलक्षणा विदेहमुक्तिः पश्चादस्तु देहपातानंतरं॥ अस्मदभिमता ज्ञानसमकालीनैव॥ एतदेवाभिप्रेत्य भगवान्शेष आह॥ तीर्थेश्वपचगृहे वा नष्टस्मृतिरपि त्यजन्देहं॥ ज्ञानसमकालमेव कैवल्यं याति हतशोक इति॥ तस्माद्विदेहमुक्तौ साक्षात्साधनस्य तत्त्वज्ञानस्य प्रधानत्वमुपपन्नं वासनाक्षयमनोनाशयोर्ज्ञानसाधनत्वेन व्यवहितत्वादुपसर्जनत्वं॥ आसुरवासनाक्षयकारिण्या दैववासनाया ज्ञानसाधनत्वं श्रुतिस्मृत्योरुपलभ्यते॥ शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यतीति श्रुतिः॥ स्मृतिरपि॥ अमानित्वमदंभित्वमहिंसा क्षांतिरार्जवं॥ आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः॥ इंद्रियार्थेषु वैराग्यमनहंकार एव च॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥ असक्तिरनभिष्वंगः

पुत्रदारगृहादिषु ॥ नित्यंच समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥ मयिचा
नन्ययोगेनभक्तिरव्यभिचारिणी ॥ विविक्तदेशसेवित्वमरतिर्जनसंस
दि ॥ अध्यात्मज्ञाननित्यत्वं तत्वज्ञानार्थदर्शनम् ॥ एतज्ज्ञानमितिप्रो
क्तमज्ञानंयदतोन्यथेति ॥ अन्यस्मिन्नहंबुद्धिरभिषंगः ॥ ज्ञायतेऽ
नेनेतिव्युत्पत्त्याज्ञानसाधनमित्यर्थः ॥ मनोनाशस्यापिज्ञानसाध
नत्वंश्रुतिस्मृतिसिद्धं ॥ ततस्तुतंपश्यतिनिष्कलंध्यायमानइतिश्रु
तिः ॥ अध्यात्मयोगाधिगमेनदेवंमत्वाधीरोहर्षशोकौजहातीतिच
प्रत्यगात्मसमाधिप्राप्त्यादेवंज्ञात्वेत्यर्थः ॥ यंविनिद्राजितश्वासाः सं
तुष्टाः संयतेंद्रियाः ॥ ज्योतिःपश्यंतियुंजानास्तस्मैविद्यात्मनेनम
इतिस्मृतिः ॥ तदेवंतत्वज्ञानादीनांत्रयाणांविदेह मुक्तिजीवन्मु
क्तिवशाद्गुणप्रधानोपसर्जनभावव्यवस्थासिद्धा ॥ ननुविविदिषा
संन्यासिनासंपादितानामेतेषांकिंविद्वत्संन्यासादूर्ध्वमनुवृत्तिमा
त्रंकिंवापुनरपिसंपादनप्रयत्नोपेक्षितः ॥ नाद्यः ॥ तत्वज्ञानस्येवा
नयोरप्ययत्नसिद्धत्वेप्राधान्यप्रयुक्तादराभावप्रसंगात् ॥ नद्विती
यः ॥ इतरयोरिवज्ञानस्यापियत्नसापेक्षत्वेसत्युपसर्जनत्वप्रसु
क्तौदासीन्याभावप्रसंगात् ॥ नायंदोषः ॥ ज्ञानस्यानुवृत्तिमात्रमितर
योर्यत्नसाध्यत्वमित्यंगीकारात् ॥ तथाहि ॥ विद्याधिकारीद्विवि
धः ॥ कृतोपास्तिरकृतोपास्तिश्चेति ॥ तत्रोपास्यसाक्षात्कारपर्यंता
मुपास्तिंकृत्वायदिज्ञाने प्रवर्त्ततेतदावासनाक्षयमनोनाशयोर्दृ
ढतरत्वेनज्ञानादूर्ध्वंविद्वत्संन्यासजीवन्मुक्तीस्वतएवसिध्यतः ॥ ता
दृशएवशास्त्राभिमतोमुख्योविद्याधिकारीततस्तंप्रतिशास्त्रेषुस
होपन्यासात् ॥ स्वस्वरूपेणविविक्तावपिविद्वत्संन्यासविविदि
षासंन्यासौसंकीर्णाविवभासेते ॥ इदानींतनास्तुप्रायेणाकृतोपा
स्तयएवौत्सुक्यमात्रात्सहसाविद्यायांप्रवर्त्तंतेवासनाक्षयमनोना
शौचतात्कालिकौसंपादयंतितावताश्रवणमनननिदिध्यासना
निनिष्पद्यंते ॥ तैश्चदृढाभ्यस्तैरज्ञानसंशयविपर्ययनिरासात्त
त्वज्ञानंसम्यगुदेति ॥ उदितस्यज्ञानस्यबाधकप्रमाणाभावान्निवृ
त्ताविद्यायाःपुनरुत्पत्तिकारणाऽभावाच्चनास्तितस्यशैथिल्यंवा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सनाक्षयमनोनाशौतुदृढाभ्यासाभावाद्भोगप्रदेनप्रारब्धेनतदात
दाबाध्यमानत्वाच्च॥सवातप्रदेशदीपवत्सहसानिवर्तेते॥तथा
चवसिष्ठः॥पूर्वैर्भ्यस्तुप्रयत्नेभ्योविषमोयंहिसंमतः॥दुःसाध्यो
वासनात्यागःसुमेरून्मूलनादपीति॥अर्जुनोपि॥चंचलंहिमनः
कृष्णप्रमाथिबलवद्दृढं॥तस्याहंनिग्रहंमन्येवायोरिवसुदुष्कर
मिति॥तस्मादिदानींतनानांविद्वत्संन्यासिनांज्ञानस्यानुवृत्तिमात्रं।
वासनाक्षयमनोनाशौतुप्रयत्नसंपाद्याविति स्थितं॥ननुकेयंवा
सनातस्याःक्षयायप्रयतितव्यमितिचेत्॥ तत्स्वरूपमाह॥वसिष्ठः॥
दृढभावनयात्यक्तपूर्वापरविचारणम्॥यदादानंपदार्थस्यवास
नासाप्रकीर्तिता॥भावितंतीव्रसंवेगादात्मनायत्तदेवसः॥भवत्या
शुमहाबाहोविगतेतरसंस्मृतिः॥तादृक्रूपोहिपुरुषोवासनावि
वशीकृतः॥संपश्यतियदेवैतत्सद्वस्त्विति विमुह्यति॥वासनावे
गवैवश्यात्स्वरूपंप्रजहातितत्॥भ्रांतंपश्यतिदुर्दृष्टिःसर्वंमदव
शादिवेति॥प्रवृत्तिंचनिवृत्तिंच॰असत्यमप्रविष्टंते॰एतांदृष्टिम
वष्टभ्य॥अत्रचस्वस्वदेशाचारभाषाकुलधर्मभेदतद्गतापशब्द
सुशब्दादिषुप्राणिनामभिनिवेशः॥सामान्यतउदाहरणंविशेष।
स्तुभेदात्तुक्त्वापश्चादुदाहरिष्यामः॥यथोक्तांवासनामभिप्रेत्यबृहदा
रण्यकेश्रूयते॥सयथाकामोभवतितत्क्रतुर्भवतियत्क्रतुर्भवतित
त्कर्मकुरुतेयत्कर्मकुरुतेतदभिसंपद्यतइति॥वासनाभेदोवा।
ल्मिकिनादर्शितः॥वासनाद्विविधाप्रोक्ताशुद्धाचमलिनातथा॥
मलिनाजन्महेतुःस्याच्छुद्धाजन्मविनाशिनी॥अज्ञानसुघना।
कारघनाहंकारशालिनी॥पुनर्जन्मकरीप्रोक्तामलिनावासना
बुधैः॥पुनर्जन्मांकुरंत्यक्त्वास्थितासंभ्रष्टबीजवत्॥देहार्थंध्रि
यतेज्ञातज्ञेयाशुद्धेतिचोच्यतइति॥देहादीनांपंचकोशानांत
त्साक्षिणश्चिदात्मनश्चभेदावरकमज्ञानंतेनसुष्ठुघनीभूतआ
काशोयस्याःसेयमज्ञानसुघनाकारा॥यथाक्षीरंतक्रमेलनेनघ
नीभवतियथाविलीनंघृतमत्यंतशीतलप्रदेशेचिरमवस्थापि
तं सुष्ठुघनीभवतितथावासनादृष्टव्या॥घनीभावश्चात्रभ्रांत्ति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परंपरातांचासुरसंपद्विवरणेभगवानाह॥प्रवृत्तिंचनिवृत्तिंचेतिषो
डशाध्यायोक्तश्लोकत्रयक्रमेणपठित्वाऽग्रेपठनीयम्॥काममाश्रि
त्यदुष्पूरंदंभमानमदान्विताः॥मोहाद्गृहीत्वाऽसद्ग्राहान्प्रवर्तंते
ऽशुचिव्रताः॥चिंतामपरिमेयांचप्रलयांतामुपाश्रिताः॥कामोपभो
गपरमाएतावदितिनिश्चिताः॥आशापाशशतैर्बद्धाःकामक्रोध
परायणाः॥ईहंतेकामभोगार्थमन्यायेनार्थसंचयानिति॥धनाहं
कारश्चतत्रैवोदाहृतः॥इदमद्यमयालब्धमिमंप्राप्स्येमनोरथं॥
इदमस्तीदमपिमेभविष्यतिपुनर्धनं॥असौमयाहतःशत्रुर्हनि
ष्येचापरानपि॥ईश्वरोहमहंभोगीसिद्धोहंबलवान्सुखी॥आढ्यो
ऽभिजनवानस्मिकोन्योस्तिसदृशोमया॥यक्ष्येदास्यामिमोदिष्ये
इत्यज्ञानविमोहिताः॥अनेकचित्तविभ्रांतामोहजालसमावृताः
॥प्रसक्ताःकामभोगेषुपतंतिनरकेशुचाविति॥एतेनपुनर्जन्म
करत्वमुदाहृतंभवति॥तच्चजन्मकरत्वंपुनःप्रपंचितम्॥आत्म
संभाविताःस्तब्धाधनमानमदान्विताः॥यजंतेनामयज्ञैस्तेदंभे
नाविधिपूर्वकं॥अहंकारंबलंदर्पंकामंक्रोधंचसंश्रिताः॥
मामात्मपरदेहेषुप्रद्विषंतोभ्यसूयकाः॥तानहंद्विषतःक्रूरान्सं
सारेषुनराधमान्॥क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनिषु॥आ
सुरींयोनिमापन्नामूढाजन्मनिजन्मनि॥मामप्राप्यैवकौंतेयत
तोयांत्यधमांगतिमिति॥शुद्धवासनातुज्ञातज्ञेया॥ज्ञेयस्वरू
पंत्रयोदशाध्यायेभगवानाह॥ज्ञेयंयत्तत्प्रवक्ष्यामियज्ज्ञात्वा
मृतमश्नुते॥अनादिमत्परंब्रह्मनसत्तन्नासदुच्यते॥सर्वतःपा
णिपादंतत्सर्वतोक्षिशिरोमुखं॥सर्वतःश्रुतिमल्लोकेसर्वमावृ
त्यतिष्ठति॥सर्वेंद्रियगुणाभासंसर्वेंद्रियविवर्जितं॥असक्तंस
र्वभृच्चैवनिर्गुणंगुणभोक्तृच॥बहिरंतश्चभूतानामचरंचरमेव
च॥सूक्ष्मत्वात्तदविज्ञेयंदूरस्थंचांतिकेचतत्॥अविभक्तंचभू
तेषुविभक्तमिवचस्थितं॥भूतभर्तृचतज्ज्ञेयंग्रसिष्णुप्रभविष्णु
च॥ज्योतिषामपितज्ज्योतिस्तमसःपरमुच्यतइति॥अत्रतद
स्यलक्षणस्वरूपलक्षणाभ्यामवगंतुंसोपाधिकनिरुपाधिक

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वरूपद्वयमुपन्यस्तम्॥कदाचित्संबंधिसद्व्यहन्नक्षपतितत्तटस्थ
लक्षणं॥यथाकाकवद्देवदत्तगृहं॥तथाकालत्रयसंबंधिसद्व्यहन्न
क्षपतितत्स्वरूपलक्षणं॥यथाप्रकृष्टप्रकाशश्चंद्र इति॥ननुसक्त
पूर्वापरविचारत्वंवासनालक्षणमुक्तं॥ज्ञेयज्ञानंचविचारजन्यम्
अतोनसुद्ध्यांतल्लक्षणमस्ति॥मैवं॥लक्षणेदृढभावनयेत्युक्तत्वा
त्॥यथाबहुजन्मसुदृढभावितत्वेनास्मिन्जन्मनिविनैवपरोपदे
शमहंकारममकारकामक्रोधादयोमलिनवासनाउत्पद्यंते॥त
थाभ्यासिकस्यबोधस्यविचारजन्यत्वेपिदीर्घकालनैरंतर्यसत्का
रभावितत्वेपश्चाद्वाक्ययुक्तिपरामर्शमंतरेणैवपुरोवर्तिघटादि
वत्सहसातत्त्वंपरिस्फुरति॥तादृश्यातुबोधानुवृत्त्यासहितइंद्रिय
व्यवहारःशुद्धवासनासाचदेहजीवनमात्रायोपयुज्यते॥नतुदं
भदर्पाद्यासु—रसंपदुत्पादनाय॥नापिजन्मांतरहेतुधर्माधर्मो
त्पादनाय॥यथासंभृष्टानिव्रीह्यादिबीजानिकुसूलपूरणमात्रा
यैवोपयुक्तानि॥नतुरुचिकरान्नायनापिसस्यनिष्पत्तयेतद्वत्—
मलिनाचवासनात्रिविधा॥लोकवासनाशास्त्रवासनादेहवासना
चेति॥सर्वेजनायथानिंदंतियथाचस्तुवंतितथैवसर्वदाचरिष्या
मीत्यभिनिवेशोलोकवासना॥तस्याश्चसंपादयितुमशक्यत्वात्
मलिनत्वं॥तथाहिकोन्वस्मिन्सांप्रतंलोकेगुणवान्कश्चवीर्यवा॥
नित्यादिनाबहुधावाल्मिकिःपप्रच्छ॥इक्ष्वाकुवंशप्रभवोरामोना
मजनैःश्रुतइत्यादिनामस्युत्तरंनारदोददौ॥तादृशस्यापिरामस्य
पातिव्रत्यशिरोमणिभूतायाःजगन्मातुःसीतायाश्चश्रोतुमशक्यो
जनापवादःसंप्रवृत्तःकिमुवक्तव्यमन्येषां॥तथादेशविशेषेणप
रस्परंनिंदाबहुलमुपलभ्यते॥दाक्षिणात्यैर्विप्रैरौत्तरीयावेदविदो
विप्रामांसभक्षणान्निंद्यंते॥औत्तरेयैश्चमातुलसुतोद्वाहिनोयात्रा
सुमृद्भांडवाहिनोदाक्षिणात्यानिंद्यंते॥बह्वृचाआश्वलायनशा
खांकण्वशाखायाःप्रशस्तांमन्यंते॥वाजसनेयिनस्तुवैपरीत्येन॥
एवंस्वस्वकुलगोत्रबंधुवर्गेष्टदेवतादिप्रशंसापरकीयनिंदाचवि
द्वांसमारभ्याऽऽगनागोपालंसर्वत्रप्रसिद्धा॥एतदेवाभिप्रेत्योक्तं॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शुचिःपिशाचोविचलोविचक्षणःक्षमोप्यशक्तोबलवांश्चदुष्टः॥नि
श्चितचोरःसुभगोपिकामीकोलोकमाराधयितुंसमर्थइति॥विद्य
तेनखलुकश्चिदुपायःसर्वलोकपरितोषकृतोयः॥सर्वथास्वहि
तमाचरणीयंकिंकरिष्यतिजनोबहुजल्पइति॥लोकवासनाया
मलिनत्वमभिप्रेत्ययोगीश्वरस्यतुल्यनिंदास्तुतित्वंमोक्षशास्त्रेषु
वर्णितं॥शास्त्रवासनात्रिविधा॥पाठव्यसनंशास्त्रव्यसनमनुष्ठान
व्यसनंचेति॥पाठव्यसनंभरद्वाजेवगम्यते॥सहिपुरुषायुषत्रयेण
बहून्वेदानधीत्यइंद्रेणचतुर्थायुषिप्रलोभितस्तत्रापिपरिशिष्टवेदा
ध्ययनायैवचमंचकार॥तस्यापिपाठस्याशक्यत्वान्मलिनत्वम्॥
तांचाशक्तिमिंद्रःप्रतिबोध्यपाठान्निवर्त्यततोप्यधिकायपुरुषा
र्थायसगुणब्रह्मविद्यामुपदिदेशतदेतत्सर्वंतैत्तिरीयब्राह्मणेद्र
ष्टव्यं॥भरद्वाजोह त्रिभिरायुर्भिर्ब्रह्मचर्यमुवास॥तंहजीर्णंस्थ
विरंशयानं॥इन्द्रउपव्रज्योवाच॥भरद्वाज॥यत्तेचतुर्थमायुर्दद्यां
॥किमनेनकुर्याइति॥ब्रह्मचर्यमेवैनेनचरेयमितिहोवाच॥तंहत्रि
गिरिरूपानविज्ञातानिवदर्शयांचकार॥तेषांहैकैकस्मान्मुष्टिना
ददे॥सहोवाच॥भरद्वाजेत्यामंत्र्यवेदावाएते॥शाश्वत्यंयथा॥तथै
वात्यंतिकपुरुषार्थाभावात्॥बहुशास्त्रव्यसनस्यमालिन्यंकावषे
यगीतायामुपलभ्यते॥कश्चिन्मुनिर्दुर्वासाबहुविधशास्त्रपुस्तक
भारैःसहमोक्षशास्त्रेषुवर्णितमहादेवंनमस्कर्तुमागत्यतत्सभायां
मुनिनारदेनभारवाहीगर्दभसाम्यमापादितःकोपात्पुस्तकानिल
वणार्णवेपरित्यज्यमहादेवेनात्मविद्यायांप्रवर्तितइति॥आत्मवि
द्यांत र्मुखस्यगुरुकारुण्यरहितस्यनवेदशास्त्रमात्रेणोत्पद्य
ते॥तथाचश्रुतिः॥नायमात्माप्रवचनेनलभ्योनमेधयानबहुना
श्रुतेनेति॥अन्यत्राप्युक्तम्॥बहुशास्त्रकथाकंथारोमंथेनवृथैव
किं॥अन्वेष्टव्यंप्रयत्नेनतत्त्वज्ञैर्ज्योतिरांतरमिति॥अधीत्यचतुरो
वेदान्धर्मशास्त्राण्यनेकशः॥ब्रह्मतत्त्वंनजानातिदर्वीपाकरसं
यथेति॥नारदस्तुचतुःषष्टिविद्याकुशलोपिअनात्मवित्त्वेनानुतप्तः
सनत्कुमारमुपससादेतिछंदोगाअधीयते॥अनुष्ठानव्यसनंवि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्णुपुराणेनिदाघस्योपलभ्यते ॥ वासिष्ठपुराणेदाशूरस्यनिदाघोऋभु
णापुनःपुनर्बोध्यमानोपिकर्मश्रद्धाजाड्यंचिरंनजहौ ॥ दाशूरस्या
स्यंतश्रद्धाजाड्येनानुष्ठानायशुद्धप्रदेशंभूमौनक्वाप्युपलेभे ॥ अ
स्याश्चकर्मवासनायाःपुनर्जन्महेतुत्वान्मलिनत्वं ॥ तथाचाथर्वणि
काअधीयंते ॥ प्लवाह्येतेअदृढायज्ञरूपाअष्टादशोक्तमवरंयेषु
कर्म ॥ एतच्छ्रेयोयेभिनंदंतिमूढाजरामृत्युंतेपुनरेवापियंति ॥ अ
विद्यायामंतरेवर्तमानाःस्वयंधीराःपंडितंमन्यमानाः ॥ जघन्यमा
नाःपरियंतिमूढाअंधेनैवनीयमानायथांधाः ॥ अविद्यायांबहुधा
वर्तमानावयंकृतार्थाइत्यभिमन्यंतिबालाः ॥ यत्कर्मिणोनप्रवेद
यंतिरागात्तेनातुराःक्षीणलोकाश्च्यवंते ॥ इष्टापूर्तंमन्यमानावरि
ष्ठंनान्यच्छ्रेयोवेदयंतेप्रमूढाः ॥ नाकस्यपृष्ठेतेसुकृतेनुभूत्वेमंलोकं
हीनतरंवाविशंतीति ॥ भगवताप्युक्तं ॥ यामिमांपुष्पितांवाचंप्रवदं
त्यविपश्चितः ॥ वेदवादरताःपार्थनान्यदस्तीतिवादिनः ॥ कामात्मा
नःस्वर्गपराजन्मकर्मफलप्रदां ॥ क्रियाविशेषबहुलांभोगैश्वर्यग
तिंप्रति ॥ भोगैश्वर्यप्रसक्तानांतयापहृतचेतसां ॥ व्यवसायात्मि
काबुद्धिःसमाधौनविधीयते ॥ त्रैगुण्यविषयावेदानिस्त्रैगुण्योभ
वार्जुन ॥ निर्द्वंद्वोनित्यसत्वस्थोनिर्योगक्षेमआत्मवान् ॥ यावान
र्थउदपानेसर्वतःसंप्लुतोदके ॥ तावान्सर्वेषुवेदेषुब्राह्मणस्य
विजानतइति ॥ दर्पहेतुत्वाच्छास्त्रीयवासनायांमलिनत्वम् ॥ श्वे
तकेतुर ल्पेनैवकालेनसर्वान्वेदानधीत्यदर्पेणपितुरपिपुरतो
ऽविनयंचकारेतिछंदोगाःषष्ठाध्यायेपठंति ॥ तथाबालाकिःक
श्चिदुपासनानावगस्यदृप्तउशीनरादिषुबहुषुदेशेषुदिग्विजयेन
बहून्विमानवज्ञायकाश्यमजातशत्रुंब्रह्मविच्छिरोमणिंअनुशा
सितुंधार्ष्ट्यंचकारेति ॥ कौषीतकिनोवाजसनेयिनश्चाधीयंते
॥ देहवासनायास्त्वात्मत्वगुणाधानदोषापनयनभ्रांतिभिस्त्रिविधा
॥ तत्रात्मत्वंभाष्यकारउदाजहार ॥ देहमात्रंचैतन्यविशिष्टमात्मे
तिप्राकृतालोकायतिकाश्चप्रतिपन्नाइति ॥ सवाएषपुरुषोन्नर
समयइत्यारभ्यतस्मादन्नंतदुच्यतइत्यंतेनग्रंथेनतामेवप्राकृ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्प्रतिपत्तिं तैत्तिरीयाः स्पष्टीकुर्वते॥ विरोचनः प्रजापतिनानुशिष्ट-
ऽपि स्वचित्तदोषेण देहात्मबुद्धिं दृढीकृत्यासुरान्स्वयमनुशशा-
सेति छंदोगा अष्टमोऽध्याये समामनंति॥ गुणाधानं द्विविधं लौ-
किकं शास्त्रीयं च॥ समीचीनशब्दादिसंपादनं लौकिकम्॥ कोम-
लध्वनिनागातुमध्येतुं वा तैलपानमरीचभक्षणादिषु लोकाः प्रय-
तंते॥ मृदुस्पर्शाय लोकाः पुष्टिकरावोषधाहारावुपयुंजते॥ लाव-
ण्यायाभ्यंगोद्वर्तनदुकूलालंकारानुपसेवंते॥ सौगंध्याय स्रगा-
लेपने धारयंति॥ शास्त्रीयं गुणमाधातुं गंगास्नानशालिग्रामतीर्था-
दिकं संपादयंति॥ दोषापनयनं चिकित्सकोक्तैरोषधैर्मुखादिप्र-
क्षालनेन च लौकिकं शौचाचमनाभ्यां वैदिकमित्युभयविधम्॥
अस्याश्च देहवासनाया मालिन्यं वक्ष्यते॥ देहस्यात्मत्वं तावद-
प्रामाणिकत्वादशेषदुःखहेतुत्वाच्च मलिनत्वम्॥ अस्मिंश्चार्थे पू-
र्वाचार्यैः सर्वैरपि पराक्रांतं॥ गुणाधानं च प्रायेण न पश्यामः प्रसि-
द्धा एव गायका अध्यापकाश्च प्रयतमाना अपि बहवो ध्वनिसौष्ठ-
वं न लभंते॥ मृदुस्पर्शांगपुष्टिश्च न नियता॥ लावण्यसौगंध्ये अ-
पि दुकूलस्रगादिनिष्ठे न तु देहनिष्ठे॥ अत एव विष्णुपुराणेऽभिहि-
तं॥ मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसंहतौ॥ देहे चेत्प्री-
तिमान्मूढो भविता नरकेऽपि सः॥ स्वदेहाशुचिगंधेन न विरज्येत यः
पुमान्॥ विरागकारणं तस्य किमन्यदुपदिश्यत इति॥ शास्त्रीयं च
गुणाधानं प्रबलेन शास्त्रांतरेणापोद्यते॥ न हिंस्यात्सर्वा भूतानी-
त्यस्याग्निष्टोमीयं पशुमालभेतेत्यनेनापवादस्तद्वत्प्रबलं शास्त्रमे-
तत् यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम
इज्यधीः॥ यत्तीर्थबुद्धिः सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स
एव गोखरः॥ असंतमलिनो देहो देही चात्यंतनिर्मलः॥ उभयोरं-
तरं ज्ञात्वा कस्य शौचं विधीयत इत्यादि॥ यद्यप्यनेन शास्त्रेण दोषा-
पनयनं प्रति न निषिध्यते न तु गुणाधानं तथापि सति विरोधिनि
प्रबलदोषे गुणाधातुमशक्य इत्यर्थाद्गुणाधानस्य प्रतिषेधः॥
असंतमालिन्यं चात्र मैत्रायणीयशाखायां श्रूयते "भगवन्नस्थि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चर्मस्नायुमज्जामांसशुक्रशोणितश्लेष्माऽश्रुदूषिकादूषिते वि-
ण्मूत्रवातपित्तसंघाते दुर्गंधे निःसारेऽस्मिन्शरीरे किं कामोपभो
गैरिति॥ शरीरमिदं मैथुनादेवोद्भूतं संविद्ध्यपेतं निरयद्वारमूत्रद्वारे
णनिष्क्रांतमस्थिभिश्चितं मांसेनानुलिप्तं चर्मणावबद्धं विण्मूत्रक
फपित्तमज्जामेदोवसाभिः अन्यैश्चामयैर्बहुभिः परिपूर्णं कोश इव
वसुनेतिच चिकित्सया च रोगशांतिर्न नियता शांतोपि रोगः कदाचि-
त्पुनरुदेति नवच्छिद्रैर्निरंतरं स्रवत्सु मलेषु रोमकूपैरसंख्यातैः स्वि
न्नेगात्रे को नाम खेदेन प्रक्षालयितुं शक्नुयात्॥ तदुक्तं पूर्वाचार्यैः
॥नवच्छिद्रकृता देहाः स्रवंति घटिका इव॥ बाह्यशौचैर्न शुध्यंति नां
तःशौचं तु विद्यते॥ अतो देहवासना मलिना॥ तदेतन्मालिन्यमभिप्रे
त्य वसिष्ठ आह॥ आपादमस्तकमहं मातापितृविनिर्मितः॥ इत्ये
को निश्चयो राम बंधायासद्विलोकनात्॥ सा कालसूत्रपदवी सा
महावीचि वागुरा॥ सासिपत्रवनश्रेणी या देहोहमिति स्थितिः॥
सा त्याज्या सर्वयत्नेन सर्वनाशेप्युपस्थिते॥ स्प्रष्टव्या सा न भव्येन-
सश्वमांसेव पुल्कसीति॥ तदेतल्लोकशास्त्रदेहवासनात्रयमवि-
वेकिनामुपादेयत्वेन प्रतिभासमानमपि विविदिषोर्वेदनोत्प
त्तिविरोधित्वाद्विदुषो ज्ञानप्रतिष्ठाविरोधित्वाच्च विवेकिभिर्हेयं
॥अतएव स्मर्यते॥ लोकवासनया जंतोः शास्त्रवासनयापि च॥
देहवासनया ज्ञानं यथावन्नैव जायते॥ यास्तु दंभाद्यासुरसंपद्रू
पा मानसवासनास्तासां नरकहेतुत्वान्मलिनमतिप्रसिद्धम्॥ अतः
केनाप्युपायेन वासनाचतुष्टयस्य क्षयः संपादनीयः॥ यथा वास
नाक्षयः संपादनीयः तथा मनसोपि॥ न च तार्किकवन्नित्यद्र
व्यमणुपरिमाणं मनो वैदिका अभ्युपगच्छंति॥ येन मनोनाशो दुःसंपा
दनीयः स्यात्॥ किं तर्हि सावयवमनित्यं सर्वदा जतुसुवर्णादिवद्ब-
हुविधपरिणामार्हं द्रव्यं मनः॥ तस्य च लक्षणं प्रमाणं च वाजसने
यिनः समामनंति॥ कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृ
तिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति लक्षणं॥ कामादिवृ
त्तयः क्रमेणोत्पद्यमानाश्चाक्षुषप्रत्यक्षघटादिवत्साक्षिप्रत्यक्षे-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णातिस्पष्टंभासते तद्धूसुपादानंमनइत्यर्थः॥ अन्यत्रमना अभूवन्ना
दर्शमन्यत्रमना अभूवन्नाश्रौषमिति॥ मनसाह्येवपश्यतिमनसाशृ
णोतीत्यादिप्रमाणं॥ चक्षुःसन्निकृष्टःस्फीतालोकमध्यवर्तीघटःश्रो
त्रसन्निकृष्टःउच्चैःपठितावेदश्चयस्यावधानेऽसतीनप्रतीयतेअव
धानेतुप्रतीयते॥ तादृशंसर्वविषयोपलब्धिसाधारणकारणमन्व
यव्यतिरेकाभ्यांप्रतीयतइत्यर्थः॥ तस्मादपिपृष्ठतउपस्पृष्टोमन
साविजानातीत्येतदुदाहरणं॥ यस्माल्लक्षणप्रमाभ्यांसिद्धंमनस्त
स्मात्तदेवंउदाहरणीयं॥ पृष्ठभागेप्यन्येनोपस्पृष्टोदेवदत्तोविशेषेण
जानातिहस्तस्पर्शोयमंगुलिस्पर्शोयमिति॥ नहितत्रचक्षुःप्रसरतित्व
गिंद्रियंतुमार्दवकाठिण्यमात्रोपक्षीणं॥ तस्मान्मनएवविशेषज्ञान
कारणंपरिशिष्यते॥ तच्चमननान्मनइतिचिंतनाच्चित्तमितिचाभि
धीयते॥ तच्चित्तंसत्वरजस्तमोगुणात्मकंप्रकाशप्रवृत्तिमोहानां
सत्वादिकार्याणांतत्रदर्शनात्प्रकाशादीनांचगुणकार्यत्वंगुणा
तीतलक्षणेऽवगम्यते॥ प्रकाशंचप्रवृत्तिंचमोहमेवचपांडवेत्यभि
धानात्॥ सांख्यशास्त्रेपि॥ प्रकाशप्रवृत्तिमोहानियमार्थाइत्युक्तं
॥ प्रकाशोनामनात्रसितभास्वररूपंकिंतुज्ञानं॥ सत्वात्संजायतेज्ञा
नमित्युक्तत्वात्॥ ज्ञानवत्सुखमपिसत्वकार्यंतदप्युक्तं॥ सत्वंसु
खेसंजयतिरजःकर्मणिभारत॥ ज्ञानमावृत्यतुतमःप्रमादेसं
जयत्युतेतिसमुद्रतरंगवन्निरंतरंपरिणममानेषुगुणेषुकदाचित्क
श्चिदुद्भवति॥ इतरावभिभूयेते॥ तदुक्तंरजस्तमश्चाभिभूयःसत्वं
भवतिभारत॥ रजःसत्वंतमश्चैवतमःसत्वंरजस्तथेति॥ वाध्य
वाधकतांयांतिकल्लोलाइवसागरइतिच॥ तत्रतमसउद्भवेसति
आसुरसंपदुदेति॥ रजसउद्भवेसतिलोकादिवासनास्त्रिस्रोभवं
ति॥ सत्वस्योद्भवेदैवीसंपदुपजायते॥ एतदेवाभिप्रेत्योक्तम्॥
सर्वद्वारेषुदेहेस्मिन्प्रकाशउपजायते॥ ज्ञानंयदातदाविद्याद्वि
वृद्धंसत्वमित्युते ति॥ यद्यपिअंतःकरणंत्रिगुणात्मकंभासतेत
थापिसत्वमेवास्यमनसःमुख्यमुपादानकारणं॥ उपादानसह
कारिभूताअवयवाउपष्टंभकाःरजस्तमसीतुतदुपष्टंभकेअतएवज्ञा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निनोयोगाभ्यासेनरजस्तमसोरपनीतयोःसत्त्वमेवस्वरूपंपरिशि
ष्यते॥एतदेवाभिप्रेत्योक्तं॥सत्त्वस्यचित्तमचित्तंस्यादचित्तंसत्त्वमुच्य
तइति॥तच्चसत्त्वंचांचल्यहेतुरजोगुणशून्यत्वादेकाग्रं॥भ्रांति
कल्पितानात्मस्वरूपस्थूलपदार्थाकारहेतुतमोगुणशून्यत्वात्
सूक्ष्मंतत्रआत्मदर्शनयोग्यं॥अतएवश्रुतिः॥दृश्यतेत्वग्र्ययाबु
ध्यासूक्ष्मयासूक्ष्मदर्शिभिरिति॥नखलुवायुनादोधूयमानेनप्रदी
पेनमणिमुक्तादिलक्षणानिनिर्धारयितुंशक्यंते॥नापिस्थूलेनख
नित्रेणसूच्येवसूक्ष्मपटस्यूतिःसंभवति॥तदीदृशंसत्त्वमेवयो
गिस्तुतमोगुणसहितेनरजोगुणेनोपष्टब्धंवहुविधद्वैतसंकल्पेन
चेतयमानंचित्तंभवति॥तच्चित्तंतमोगुणाधिक्येसत्यासुरींसंपद
मुपचिन्वल्लीनंभवति॥तथाहवसिष्ठः॥अनात्मन्यात्मभावेनदे
हभावनयातथा॥पुत्रदारैःकुटुंबैश्चचेतोगच्छतिपीनतां॥१॥अहं
कारविकारेणममतामललीलया॥इदंममेतिभावेनचेतोगच्छतिपी
नतां॥२॥आधिव्याधिविलासेनसमाश्वासेनसंसृतौ॥हेयाहेयवि
भागेनचेतोगच्छतिपीनतां॥३॥स्नेहेनधनलोभेनलाभेनमणियोषि
तां॥आपातरमणीयेनचेतो॰॥४॥दुराशाक्षीरपानेनभोगानिलबले
नच॥आस्थादानेनचारेणचित्ताहिर्यातिपीनतां॥५॥आस्थाना
मप्रपंचेसत्यत्वबुद्धिस्तस्याआदानमंगीकारःसएवचारःगमना
गमनक्रियातयेति॥तदेवंविनाशयनीययोर्वासनामनसोःस्वरू
पंनिरूपितं॥अथवासनाक्षयमनोनाशौक्रमेणनिरूप्येते॥तत्र
वासनाक्षयप्रकारमाह॥वसिष्ठः॥बंधोहिवासनाबंधोमोक्षः
स्याद्वासनाक्षयः॥वासनास्त्वंपरित्यज्यमोक्षार्थित्वमपित्यज॥
मानसीर्वासनाःपूर्वंत्यक्त्वाविषयवासनाः॥मैत्र्यादिभावनाना
म्नीर्गृहाणामलवासनाः॥ताअप्यंतःपरित्यज्यताभिर्व्यवहरन्न
पि॥अंतःशांतःसमस्नेहोभवचिन्मात्रवासनाः॥तामप्यंतःपरि
त्यज्यमनोबुद्धिसमन्विताम्॥शेषेस्थिरसमाधानोयेनत्यजसि
तंत्यजेति॥अत्रमानसवासनाशब्देनपूर्वोक्तास्तिस्रोलोकशा
स्त्रदेहवासनाविवक्षिताः॥विषयवासनाशब्देनदंभदर्पाद्याः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुखंयद्धिवसिरा॥मृदुलीनत्वेतद्धिवस्त्राभेदकारणे॥यद्वाशब्द
स्पर्शरूपरसगंधविषयास्तेषांभुज्यमानत्वदशाजन्यसंस्कारोमा
नसवासना॥भुज्यमानदशाजन्यःसंस्कारोविषयवासना॥अ
स्मिन्पक्षेपूर्वोक्तानांचतसृणामनयोरंतर्भावः॥अंतर्बाह्यव्यति
रेकेणवासनांतरासंभवात्॥ननुवासनापरित्यागःकथंघट
ते॥नहितासांमूर्तिरस्तिअस्तिचेत्।येनसंमार्जनीसमूहितधू
लितृणवद्हस्तेनोद्धृत्यबहिस्त्यक्ष्यामः॥मैवं॥उपवासजागरण
वत्तदुपपत्तेः॥स्वभावप्राप्तयोर्भुजिक्रियानिद्रयोरमूर्तत्वेपितत्प
रित्यागरूपेउपवासजागरणेसर्वैरप्यनुष्ठीयेतेतद्वदत्राप्यस्तु॥
अद्यस्थित्वानिराहारइत्यादिमंत्रेणसंकल्पंकृत्वासावधानत्वे
नावस्थानंतत्त्यागइतिचेदत्रापिनतद्दंडनिवारितंप्रैषमात्रेणसं
कल्प्याप्रमत्तत्वेनावस्थातुंशक्यत्वात्॥वैदिकमंत्रानधिकारि
णांतुभाषयासंकल्पोस्तु॥यदितत्रशाकसूपोदनादिसन्निधि
त्यागस्तर्ह्यत्रापिस्रक्चंदनवनितासंनिधिपरित्यागोस्तु॥अथ
तत्रबुभुक्षानिद्रालस्यादिविस्मारकैःपुराणश्रवणदेवपूजानृ
त्यगीतवादित्रादिभिश्चित्तमुपलाल्यतेतर्ह्यत्रापिमैत्र्यादिभि
स्तदुपलालयेत्॥मैत्र्यादिभिश्चपतंजलिनासूत्रिताः॥मैत्री
करुणामुदितोपेक्षाणांसुखदुःखपुण्यापुण्यविषयाणांभाव
नातश्चित्तप्रसादनमिति॥चित्तंहिरागद्वेषपुण्यपापैःकलुषी
क्रियते॥रागद्वेषौपतंजलिःसूत्रयामास॥सुखानुशयीरागः॥दुः
खानुशयीद्वेषइति॥स्नेहात्स्वेनानुभूयमानंसुखमनुशेतेकश्चि
द्वृत्तिविशेषःसुखजातंसर्वंमेभूयादिति॥तच्चदृष्टादृष्टसाम
ग्र्यभावान्नसंपादयितुंशक्यं॥अतःसरागश्चित्तंकलुषीकरोति॥
यदासुखिप्राणिषुअयंमैत्रीभावयेत्॥सर्वेप्येतेसुखिनःमदीयाइ
तितदातत्सुखंस्वकीयमेवसंपन्नमितिभावयतस्तत्ररागोनिवर्त
ते॥यथास्वस्यराज्याभावेपिपुत्रादिराज्यमेवस्वकीयंतद्वत्॥नि
वृत्तेचरागेवर्षास्वतीतासुशरत्सरिदिवचित्तंप्रसीदति॥तथादुःख
मनुशेतेकश्चित्प्रत्ययः॥ईदृशंदुःखंसर्वदामेमाभूदितितच्चशत्रु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्याघ्रादिषुतत्तुननिवारयितुंशक्यं॥नचसर्वेदुःखहेतवोहंतुंश
क्यंते॥ततःसद्वेषःसहृदयंदहति॥यदास्वस्येवपरेषांसर्वेषां
प्रतिकूलंदुःखंनभूयादिति॥अनेनप्रकारेणकरुणांदुःखिप्रा
णिषुभावयेत्तदावैर्यादिषुद्वेषनिवृत्तौचित्तंप्रसीदति॥अतःस्म
र्यते॥प्राणायथात्मनोभीष्टाभूतानामपितेतथा॥आत्मौपम्येन
भूतानांदयांकुर्वंतुमानवाइति॥तत्प्रकारंमहांतोदर्शयंति॥स
र्वेत्रसुखिनःसंतुसर्वेसंतुनिरामयाः॥सर्वेभद्राणिपश्यंतुमाक
श्चिद्दुःखमाप्नुयात्इति॥तथाप्राणिनःस्वभावएवपुण्यंनानुतिष्ठं
तिपापंत्वनुतिष्ठंति॥तदाहुः॥पुण्यस्यफलमिच्छंतिपुण्यंनेच्छं
तिमानवाः॥नपापफलमिच्छंतिपापंकुर्वंतियत्नतइति॥तेचपु
ण्यपापेअक्रियमाणक्रियमाणेपश्चात्तापंजनयतः॥सचतापःश्रु
त्याअनूद्यते॥किमहंसाधुनाकरवं॥किमहंपापमकरवमिति॥
यद्यसौपुण्यपुरुषेषुमुदितांभावयेत्तदातद्वासनयास्वयमप्रमत्तः
पुण्येषुप्रवर्त्तेत॥तथापापिषूपेक्षांभावयन्स्वयमपिपापान्निवर्त्ते
त॥अतःपश्चात्तापस्याभावेनचित्तंप्रसीदति॥सुखिषुमैत्रींभावय
तोनकेवलंरागनिवृत्तिः॥किंत्वसूयेर्ष्यादयोपिनिवर्त्तंते॥परगु
णानामसहनमीर्षागुणेषुदोषाविष्करणमसूया॥यदामैत्रीव
शात्परकीयंसुखंस्वकीयमेवसंपद्यतेतदापरगुणेकथमसू
यादिकंभवेत्॥एवंदोषांतरनिवृत्तिरपियथायोग्यमुन्नेया॥दुः
खिषुकरुणांभावयतःशत्रुवधादिकरोद्वेषोयथानिवर्त्तते॥तथा
दुःखित्वप्रतियोगिकस्वसुखित्वप्रयुक्तोपिदर्पोपिनिवर्त्तते॥स
चदर्पःआसुरसंपद्यहंकारप्रस्तावेपूर्वमुदाहृतः॥ईश्वरोहमहंभो
गीसिद्धोहंबलवान्सुखी॥आढ्योभिजनवानस्मिकोन्योस्तिसदृ
शोमयेति॥ननुपुण्यात्मसुमुदितांभावयतःपुण्यप्रवृत्तिःफलत्वे
नोक्तासाचयोगिनोनयुक्तामलिनायांप्रागुक्तवासनायांपुण्यमंतर्भा
व्यपूर्वमुदाहृतत्वात्॥मैवं॥पुनर्जन्मकरस्यकाम्यस्येष्टापूर्तादेस्तत्र
मलिनत्वेनोदाहरणात्॥इहतुयोगाभ्यासजन्यमशुक्लाकृष्णत्वे
नजन्मतापादकंपुण्यकर्मविवक्षितं॥अशुक्लाकृष्णत्वंपतंज

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लिःसूचयामास॥कर्माशुक्लाकृष्णंयोगिनस्त्रिविधमितरेषामि
ति॥काम्यकर्मविहितत्वाच्छुक्लंनिषिद्धंकृष्णंमिश्रंशुक्लकृष्णं॥
तदेतत्त्रयमितरेषामयोगिनांसंपद्यते॥तच्चत्रिविधंजन्मप्रयच्छ
ति॥तदाहुर्विश्वरूपाचार्याः॥शुभैराप्नोतिदेवत्वंनिषिद्धैर्नारकीं
गतिं॥उभाभ्यांपुण्यपापाभ्यांमानुष्यंलभतेवशइति॥ननुयोग
स्यानिषिद्धत्वादकृष्णत्वेपिविहितत्वाच्छुक्लत्वमितिचेत्नैवं॥अका
म्यत्वाभिप्रायेणाशुक्लत्वाभिधानत्वात्॥अतोऽशुक्लकृष्णेपुण्येप्रवृत्ति
र्योगिनोऽपेक्षिता॥नन्वनेनन्यायेनयोगिनोपियथोचितंपुण्यात्मशु
द्धिंभावयित्वापुण्येष्वेवप्रवृत्तेरस्त्वितिचेत्॥प्रवर्त्ततांनामयेमैत्र्यादि
भिश्चित्तंप्रसादयंतितेषामेवयोगित्वात्॥मैत्र्यादिचतुष्टयंउपलक्षणं
॥तेनाभयंसत्वसंशुद्धिरित्यादिदैवीसंपद्मानित्वमदंभित्वमित्या
दिनाज्ञानसाधनानिजीवन्मुक्तस्थितप्रज्ञादिवचनोक्तधर्माश्चोपल
क्ष्यंते॥सर्वेषामेतेषांशुभाशुभवासनारूपत्वेनमलिनवासनानिवर्त्त
कत्वात्॥ननुसंत्यनंताःशुभवासनाःनचैकेनताःसर्वाअभ्यसितुंश
क्यंते॥निरर्थकश्चतदभ्यासप्रयासइतिचेन्न॥तन्निवर्त्यानामनंता
नांमलिनवासनानामेकस्यमनस्यसंभवात्॥नह्यायुर्वेदोक्तानिसर्वा
ण्यौषधानिएकेनसेवितुंशक्यंते॥नापितन्निवर्त्याःसर्वेरोगाएकस्य
देहेसंभवंति॥एवंतर्हिस्वचित्तंप्रथमतःपरीक्ष्यतत्रयदायावत्योमलिन
वासनास्तदा तावतीर्विरोधिनीःशुभवासनाअभ्यसेत्॥यथापुत्रमि
त्रकलत्रादिभिःपीड्यमानस्ततोविरक्तस्तन्निवर्त्तकंपारिव्राज्यंगृ
ह्णाति॥तथाविद्यामदधनमदकुलाचारमदादिमलिनवासनाभिः
पीड्यमानस्तद्विरोधिनंविवेकमभ्यसेत्॥सचविवेकोजनकेनद
र्शितः॥अचयेमहतांमूर्ध्नितेदिनैर्निपतंत्यधः॥हंतचित्तमह
त्तायाःकैषाविश्वस्ततातव॥क्वधनानिमहीपानांब्रह्मणःक्वजगं
तिवा॥प्राक्तनानिप्रयातानिकेयंविश्वस्ततातव ॥कोट्योब्रह्मणो
याताःगताःसर्गपरंपराः॥प्रयाताःपांसुवद्भूपाःकाधृतिर्ममजीवि
ते॥येषांनिमेषणोन्मेषौजगतांप्रलयोदयौ॥तादृशाःपुरुषानष्टा
मादृशांगणनैवकेति॥नन्वयमपिविवेकस्तत्वज्ञानोदयात्प्राचीनः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नित्यानित्यवस्तुविवेकादिसाधनव्यतिरेकेणब्रह्मज्ञानासंभवा
त्॥इहतूत्पन्नब्रह्मसाक्षात्कारस्यजीवन्मुक्तयेवासनाक्षयादि
साधनंवक्तुमुपक्रांतं॥अतःकिमिदमकांडेतांडवमितिचेत्नायं
दोषः॥साधनचतुष्टयसंपन्नस्यपश्चाद्ब्रह्मज्ञानमित्येषःसर्वपुरुष
साधारणःक्षुण्णःप्रौढोराजमार्गः॥जनकस्यतुपुण्यपुंजपरिपाके
नाकाशफलपातवदकस्मात्सिद्धगीताश्रवणमात्रेणतत्त्वज्ञान
मुत्पन्नं॥ततश्चित्तविश्रांतयेविवेकोयंक्रियतइतिकांडेवेदमुचि
तंतांडवं॥नन्वेवमप्यस्यविवेकस्यज्ञानसमनंतरभावित्वेनमलिन
वासनानुवृत्त्यभावाच्छुद्धवासनायाअभ्यासोनापेक्षितइतिचेन्न॥
जनकस्यतदनुवृत्त्यभावेपियाज्ञवल्क्यभगीरथ्यादेस्तदनुवृत्तिद
र्शनात्॥अस्तिहियाज्ञवल्क्यस्यतत्सतिवादनामुषस्तकहोलादी
नांभूयान्विद्यामदःतेसर्वेपिविजिगीषुकथायांप्रवृत्तत्वात्॥ननु
तेषांविद्यांतरमेवास्तिनतुब्रह्मविद्यतेतिचेन्न॥कथागतयोःप्र
श्नोत्तरयोःब्रह्मविषयत्वात्॥ननुब्रह्मविषयत्वेपितेषामपातज्ज्ञा
नमेवनतुसम्यग्वेदनमितिचेन्न॥तथासत्यस्माकमितितदीयवा
क्येरुत्पन्नायाब्रह्मविद्यायाअसम्यक्त्वप्रसंगात्॥ननुसम्यक्त्वमपि
परोक्षज्ञानमितिचेन्न॥यत्साक्षादपरोक्षाद्ब्रह्मेतिमुख्यापरोक्षवि
षयतयैवविशेषतः प्रश्नोपलंभात्॥नन्वात्मज्ञानिनोविद्यामद
आचार्यैर्नाभ्युपगम्यते॥तथाचोपदेशसाहस्र्यामुक्तं॥ब्रह्मवित्त्वं
तथामुक्त्वासआत्मज्ञोनचेतरइति॥नैष्कर्म्यसिद्धावपि॥नचा
ध्यात्माभिमानोपिविदुषोस्त्यासुरत्वतः॥विदुषोप्यासुरश्चेत्स्यान्नि
ष्फलंब्रह्मदर्शनमिति॥नायंदोषः॥जीवन्मुक्तिपर्यंतस्यतत्त्वज्ञा
नस्यतत्रविवक्षितत्वात्॥नखलुवयमपिजीवन्मुक्तानांविद्याम
दमभ्युपगच्छामः॥ननुविजिगीषोरात्मबोध एवनास्ति॥रागोलिं
गमबोधस्यचित्तव्यायामभूमिषु॥कुतःशाद्वलतातस्ययस्या
ग्निःकोटरेतरोरित्याचार्यैरनभ्युपगमादितिचेन्न॥रागादयःसंतु
कामंनतद्भावोयरा॥ध्यतीत्यन्नतैरेवरागाद्यभ्युपगमात्नचात्रप
रस्परव्याहतिः॥स्थितमत्रेज्ञानिमात्रेचवचनद्वयस्यव्यवस्था

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पनीयत्वात्।ननुज्ञानिनोरागाद्यभ्युपगमेधर्माधर्मद्वारेणजन्मांतर
प्रसंगइतिचेन्नैवं॥अदग्धबीजवदविद्यापूर्वकाणामेवमुख्यरागा
दित्वेनपुनर्जन्महेतुत्वात्॥ज्ञानिनस्तुदग्धबीजवदाभासएव
रागादयः॥एतदेवाभिप्रेत्योक्तं॥उत्पद्यमानारागाद्याविवेकज्ञा
नवह्निना॥तदातदैवदह्यंतेकुतस्तेषांप्ररोहणमिति॥तर्हिस्थि
तप्रज्ञस्यापितत्संस्त्विति चेत्न।तत्कालेमुख्यवदेवाभासानांबाध
कत्वात्।रज्जुसर्पोपिमुख्यसर्पवदेवतदानींभीषयन्नुपलभ्यतेत
द्वत्।ननुआभासत्वानुसंधानानुवृत्तौनकोपिबाधइतिचेत्॥चिरं
जीवतुभवानियमेवह्यस्मदभिमताजीवन्मुक्तिः॥याज्ञवल्क्यस्तु
विजिगीषुदशायांनतादृक्षः॥अतश्चित्तविश्रांतयेविद्वत्संन्यास
स्यतेनकरिष्यमाणत्वात्।नकेवलमस्यजिगीषाकिंतुधनतृष्णा
पिमहतीजातायतोबहूनांब्रह्मविदांपुरतःस्थापितंसालंकारंगो
सहस्रमपहृत्यस्वयमेवेदमाह।नमोवयंब्रह्मिष्ठायकुर्मोगोका
माएववयंस्मइति॥इतरान्ब्रह्मविदोवञ्चातुंइयंकाचिद्वचोभंगी
तिचेत्॥अयमपितर्ह्यपरोदोषः॥इतरेचब्रह्मविदःस्वकीयंधनं
मनेनापहृतमितिमत्वाचुक्रुधुः॥अयंचक्रोधपरवशःशाकल्यंशा
पेनमारयामास॥नचास्यब्रह्मघ्नस्यमोक्षाभावःशंकनीयःयतः
कौषीतकिनःसमामनंति॥नास्यकेनचकर्मणालोकोहीयतेनमातृ
वधेननपितृवधेननस्तेयेननभ्रूणहत्ययेति॥शेषोपिस्वकृता
यामार्यपंचाशिकामिदमाह॥हयमेधशतसहस्राण्यथकुरुतेब्र
ह्मघातलक्षाणि॥परमार्थविन्नपुण्यैर्नचपापैःस्पृश्यतेविमलइ
ति॥किंबहुनाब्रह्मविदांयाज्ञवल्क्यादीनामस्त्येवमलिनवासना
नुवृत्तिः॥भगीरथश्चतत्त्वंविदित्वापिराज्यंपालयन्मलिनवासना
भिश्चित्तविश्रांत्यभावेसतिसर्वंपरित्यज्यपश्चाद्विश्रांतवानितिव
सिष्ठेनोपाख्यायते॥अतःस्वकीयंवर्तमानंमलिनवासनाविशेषं
परकीयदोषवत्सम्यगुपेक्ष्यतत्प्रतीकारमभ्यसेत्॥अनेनैवाभि
प्रायेणस्मर्यते॥यथासुनिपुणःसम्यक्परदोषेक्षणेरतः॥तथाचे
न्निपुणःस्वेषुकोनमुच्येतबंधनादिति॥ननुआदौतावद्विद्यामद

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यकःप्रतीकारइतिचेत्॥किंस्वनिष्ठस्यमदस्यपरविषयस्यकिंवा
स्वविषयस्यपरनिष्ठस्य॥आद्येभंगोवश्यंक्वचिद्भविष्यतीतिनिरंतरं
भावयेत्॥तद्यथाश्वेतकेतुर्विद्ययामत्तःप्रवाहणस्यराज्ञःसभांग
त्वातेनपंचाग्निविद्यांपृष्टोयांस्वयमजानानोनिरुत्तरोराज्ञाबहु
धाभर्त्सितःपितुःसमीपमागत्यस्वनिर्वेदमुदाजहार॥पितातुत
न्निर्मदःतमेवराजानमुपसंपद्यतांविद्यांलेभे॥दृप्तबालाकिश्चा
जातशत्रुणाराज्ञाभर्त्सितोदर्पंसंत्यज्यराजानमुपससाद॥उषस्तक
होलादयश्चमदेनकथांकृत्वापराजिताः॥यदास्वविषयःपरनि
ष्ठोमदःप्रवर्ततेतदामत्तःसपरोमांनिंदतुप्रवमन्यतांवासर्वथा
पिनहानिरितिभावयेत्॥अतएवाहुः॥आत्मानंयदिनिंदंतिस्वा
त्मानंस्वयमेवते॥शरीरंयदिनिंदंतिसहायास्तेजनाममम॥निंदा
वमानावत्यंतंभूषणंयस्ययोगिनः॥धीविक्षेपःकथंतस्यवाचाटैःक्रि
यतामिहेति॥नैष्कर्म्यसिद्धौ॥सपरिकरेवर्चस्केदोषतश्चावधारि
ते॥यदिदोषंवदेत्तस्मैकिंतत्रोच्चरितुर्भवेत्॥तद्वत्स्थूलेतथासू
क्ष्मेदेहेत्यक्तेविवेकतः॥यदिदोषंवदेत्ताभ्यांकिंतत्रविदुषोभवे
त्॥शोकहर्षभयक्रोधलोभमोहस्पृहादयः॥अहंकारस्यदृश्यंते
जन्ममृत्युश्चनात्मनः॥३॥निंदायाभूषणत्वंज्ञानांकुशेदर्शितम्॥
मन्निंदयायदिजनःपरितोषमेतिनन्वप्रयत्नजनितोयमनुग्रहोमे
॥श्रेयोर्थिनोहिपुरुषाःपरतुष्टिहेतोर्दुःखार्जितान्यपिधनानिपरि
त्यजंति॥सततसुलभदैन्येनिःसुखेजीवलोकेयदिममपरिवादा
त्प्रीतिमाप्नोतिकश्चित्॥परिवदतुयथेष्टंमत्समक्षंतिरोवाजगति
हिबहुदुःखेदुर्लभःप्रीतियोगइति॥अवमानस्यभूषणत्वंस्मर्य
ते॥तथाचरेतवैयोगीसतांधर्ममदूषयन्॥जनायथावमन्येरन्
गच्छेयुर्नैवसंगतिमिति॥याज्ञवल्क्योषस्तादीनांयोस्वनिष्ठपर
निष्ठौविद्यामदौतयोर्यथाविवेकेनप्रतीकारःतथाधनाभिलाष
क्रोधयोरप्यवगंतव्यः॥अर्थानामार्जनेक्लेशस्तथैवपरिपालने
॥नाशेदुःखंव्ययेदुःखंधिगर्थान्क्लेशकारिणः॥इतिधनविषयो
विवेकः॥क्रोधोपिहिद्विविधः॥परविषयःपरनिष्ठःस्वविषयश्चे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ति॥तत्रस्वनिष्ठंप्रत्येवमुक्तं॥अपकारिणिकोपश्चेत्कोपेकोपःकथंन
ते॥धर्मार्थकाममोक्षाणांप्रसह्यपरिपंथिनि॥फलान्वितोधर्मस्य
प्रोर्थनाशनःसचेदपार्थःस्वशरीरतापनः॥नचेहनामुत्रहिताय
यःस्ततांमनांसिकोपःसमुपाश्रयेत्कथमिति॥स्वविषयंप्रत्येवमीरि
तं॥नमेपराधःकिमकारणान्नृणांमदभ्यसूयेत्यपिनैवचिंतयेत्॥
नयत्कृताप्राग्भवबंधनिःसृतिस्ततोपराधःपरमोनुचिंत्यताम्॥
नमोस्तुकोपदेवायस्वाश्रयज्वालिनेभृशं॥कोप्यस्यममवैराग्य
दायिनेदोषबोधिनेइति॥धनाभिलाषक्रोधवद्योषित्पुत्राभिला
षावपिविवेकेननिवर्त्तनीयौ॥तत्रयोषिद्विवेकोवसिष्ठेनदर्शितः
॥मांसपांचालिकायास्तुयंत्रलोलेंगपंजरे॥स्नाय्वस्थिग्रंथिशा
लिन्याःस्त्रियःकिमिवशोभनं॥त्वङ्मांसरक्तबाष्पांबुपृथक्कृत्वा
विलोचने॥समालोकयरम्यंचेत्किंमुधापरिमुह्यसि॥मेरुशृंगत
टोल्लासिगंगाजलरयोपमा॥दृष्टायस्मिन्स्तनेमुक्ताहारःस्योल्ला
सशालिनः॥श्मशानेषुदिगंतेषुसएवललनास्तनः॥श्वभिरास्वा
द्यतेकालेलघुपिंडमिवांधसः॥केशकज्जलधारिण्योदुःस्पर्शा
लोचनप्रियाः॥दुष्कृताग्निशिखानार्योदहंतितृणवन्नरान्॥ज्व
लतामतिदूरेपिसरसाअपिनीरसाः॥स्त्रियोहिनरकाग्नीनामिंध
नंचारुदारुणं॥कामनाम्नाकिरातेनविकीर्णामुग्धचेतसां॥नार्यो
नरविहंगानामंगबंधनवागुराः॥जन्मपल्वलमत्स्यानांचित्तकर्दम
चारिणां॥पुंसांदुर्वासनारज्जुर्नारीबडिशपिंडिका॥सर्वेषांदोष
रत्नानांसुसमुद्गिकयानया॥दुःखशृंखलयानित्यमलमस्तुमम
स्त्रिया॥इतोमांसमितोरक्तमितोऽस्थीनीतिवासरैः॥ब्रह्मन्कतिप
येरेवयातिस्त्रीविषचारुतां॥यस्यस्त्रीतस्यभोगेच्छानिस्त्रीकस्य
क्वभोगभूः॥स्त्रियंत्यक्त्वाजगत्त्यक्तंजगत्त्यक्त्वासुखीभवेत्॥पुत्र
विषयविवेकोब्रह्मानंदेदर्शितः॥अलभ्यमानस्तनयःपितरौक्ले
शयेच्चिरं॥लब्धोपिगर्भपातेनप्रसवेनचबाधते॥जातस्यग्रहरो
गादिःकुमारस्यचमूर्खता॥उपनीतेप्यविद्यत्वमनुद्वाहश्चपंडि
ते॥यूनश्चपरदारादिदारिद्र्यंचकुटुंबिनः॥पित्रोर्दुःखस्यनास्त्यं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तो धनिचेन्नियमतेतदेत्ति॥यथाविद्याधनक्रोधयोमिथुनविष
याणांमलिनवासनानांविवेकेनप्रतीकारःतथाऽन्यासामपियथा
योगंशास्त्रैःस्वयुक्त्याचदोषंविविच्यप्रतीकारंकुर्यात्॥कृतेचप्र
तीकारेजीवन्मुक्तिलक्षणंपरमंपदंलभ्यते॥तदाहवसिष्ठः॥दृढ
वासनासंपरित्यागेयदियत्नंकरोष्यलं॥तत्तेशिथिलतांयांतिसर्व
वाधिव्याधयःक्षणात्॥पौरुषेणप्रयत्नेनबलात्संत्यज्यवासनां
॥स्थितिंबध्नासिचेत्तर्हिपदमासादयस्यलमिति॥नन्वत्रपौरुष
प्रयत्नोनामपूर्वोक्तोविषयदोषविवेकःसचपुनःपुनःक्रियमाणो
पिप्रबलेंद्रियव्यापारेणाभिभूयते॥तदुक्तंभगवता॥यततोह्यपि
कौंतेयपुरुषस्यविपश्चितः॥इन्द्रियाणिप्रमाथीनिहरंतिप्रसभं॥
मनइति॥इन्द्रियाणांहिचरतांयन्मनोनुविधीयते॥तदस्यहरति
प्रज्ञांवायुर्नावमिवांभसि॥इतिचेत्तन॥एवंतर्ह्युत्पन्नविवेकर
क्षार्थंइन्द्रियाणिनिरोद्धव्यानि॥तदपितत्रैवउत्तरश्लोकाभ्यांदर्शि
तं॥तानिसर्वाणिसंयम्ययुक्तआसीतमत्परः॥वशेहियस्येंद्रिया
णितस्यप्रज्ञाप्रतिष्ठिता॥तस्माद्यस्यमहाबाहोनिगृहीतानिसर्व
शः॥इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठितेति॥स्मृत्यंतरेपि॰
नपाणिपादचपलोननेत्रचपलोयतिः॥नचवाक्चपलश्चैवमिति
शिष्टस्यलक्षणमिति॥एतदेवान्यत्रसंग्रहविवरणाभ्यांस्पष्टी
कृतं॥अजिह्वःषंडकःपंगुरंधोवधिरएवच॥मुग्धश्चमुच्यतेभि
क्षुःषड्भिरेतैर्नसंशयः॥इदमिष्टमिदंनेतियोश्नन्नपिनसज्जते॥
हितंसत्यमितंवक्तितमजिह्वंप्रचक्षते॥अद्यजातांयथानारीं
तथाषोडशवार्षिकीं॥शतवर्षांचयोदृष्ट्वानिर्विकारःसषंडकः॥
भिक्षार्थमटनंयस्यविण्मूत्रकरणायच॥योजनान्नपरंयातिसर्व
थापंगुरेवसः॥तिष्ठतोव्रजतोवापियस्यचक्षुर्नदूरगं॥चतुर्युगांभु
वंमुक्त्वापरिव्राट्सोंधउच्यते॥हितंमितंमनोरममवचःशोकापहं
चयत्॥श्रुत्वायोनशृणोतीववधिरःसप्रकीर्तितः॥सान्निध्येवि
षयाणांचसमर्थोऽविकलेंद्रियः॥सुप्तवद्वर्ततेनित्यंभिक्षुर्मुग्धः
सउच्यते॥ननिंदांनस्तुतिंकुर्यान्नकिंचिन्मर्मणिस्पृशेत्॥नातिवा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दीभवेत्तद्व त्तर्वत्रैवसमोभवेत्॥नस्तंभाग्रेस्त्रियंकांचित्पूर्वदृष्टां चनस्मरेत्॥कथांचवर्जयेत्तासांनपश्येल्लिखितामपीति॥यथाकश्चिद्वतीनक्तैकभुक्तोपवासमौनादिव्रतंसंकल्प्यसावधानोभ्रंशमकृत्वासम्यक्पालयति॥तथैवाजिव्हत्वादिव्रतेस्थितःसावधानोविवेकंपालयेत्॥तदेवंविवेकेंद्रियरोधाभ्यांदीर्घकालेनैरंतर्यसत्कारसेविताभ्यांमैत्र्यादिभावनासुप्रतिष्ठितास्वासुरसंपद्रूपामलिनवासनाःक्षीयंते॥ततोनिश्वासोच्छ्वास वन्निमेषोन्मेषवच्चपुरुषप्रयत्नमंतरेणप्रवर्त्तमानाभिर्मैत्र्यादिवासनाभिर्लौकेव्यवहरन्नपितदीयसाकल्यवैकल्यानुसंधानंचित्तेपरित्यज्यनिद्रातंद्रीमनोराज्यादिरूपाःसमस्तचेष्टाःप्रयत्नेनशांताःकृत्वाचिन्मात्रवासनामभ्यसेत्॥स्वतस्तावदिदंजगच्चिज्जडोभयात्मकंभासते॥यद्यपिशब्दस्पर्शादिजडवस्तुभासनायैवेंद्रियाणिसृष्टानि॥पराञ्चिखानिव्यतृणत्स्वयंभूरितिश्रुतेः॥तथापिचैतन्यस्योपादानत्वात्तद्वर्जयितुमशक्यत्वाच्चैतन्यपूर्वकमेवजडंभासते॥तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीतिश्रुतेः॥तथासतिपश्चाद्भासमानस्यजडस्यप्रथमतोभासमानमेवचैतन्यंवास्तवंरूपमितिनिश्चित्यजडमुपेक्ष्यचिन्मात्रंचित्तेवासयेत्॥एतच्चबलिशुक्रयोःप्रश्नोत्तराभ्यांविस्फुटमवगम्यते॥किमिहास्तिकियन्मात्रमिदंकिन्मयमेवच॥कस्त्वंकोहंकएतेवालोकाइतिवदाशुमे॥चिदिहास्तीतिचिन्मात्रमिदंचिन्मयमेवच॥चित्त्वंचिदहमेतेचलोकाश्चिदितिसंग्रहइति॥यथासुवर्णकारःकटकंविक्रीयान्नपिवलयाकारस्यगुणदोषानुपेक्ष्यगुरुत्ववर्णयोरेवमनःप्रणिधित्सति॥तथाचिन्मात्रेमनःप्रणिधातव्यं॥यावताकालेनजडंसर्वथैवोपेक्ष्यचिन्मात्रेमनसःप्रवृत्तिर्निश्वासवत्स्वाभाविकीसंपद्यते॥तावंतंकालंचिन्मात्रवासनायांप्रयतेत॥नन्वादावेवचिन्मात्रवासनाऽस्तुतयैवमलिनवासनानिवृत्तेः॥किमनेनांतर्गडुनामैत्र्याद्यभ्यासेनेतिचेत्॥न॥विद्व सनायाअप्रतिष्ठितत्वप्रसंगात्॥यथाकुट्टिमदार्ढ्यव्यतिरेकेणक्रियमाणंस्तंभकुड्यात्मकंगृहं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नमतितिष्ठति॥यथावाविरेचनेनप्रवलदोषमनिःसार्यसेवि
तमप्यौषधंनारोग्यकरंतद्वत्॥ननुतामप्यभ्यपरित्यज्येतिचि
न्मात्रवासनाया अपिपरित्याज्यत्वमवगम्यते॥तदयुक्तम्॥चिन्मा
त्रंपरित्यज्यान्यस्यकस्यचिदुपादेयस्याभावात्॥नायंदोषः॥द्वि
विधाचिन्मात्रवासनामनोबुद्धिसमन्विता॥तद्रहिताचेति॥करणं
मनःकर्तृत्वोपाधिर्बुद्धिः॥तथाचसत्यप्रमत्तोहमेकाग्रेणमनसा
चिन्मात्रंभविष्यामीति॥एतादृशेनकर्तृकरणानुसंधानेनसमन्वि
ता प्राथमिकीयाचिन्मात्रवासनाध्यानशब्दाभिधेयतांपरित्यजेत्
॥यात्वभ्यासपाटवेनकर्त्राद्यनुसंधानमवधानरहितासमाधि
शब्दाभिधेयातामुपाददीत ध्यानसमाध्योर्लक्षणंपतंजलिः
सूत्रयामास ॥तत्रप्रत्ययैकतानताध्यानंतदेवार्थमात्रनिर्भासं
स्वरूपशून्यमिवसमाधिरिति॥तादृशेसमाधौदीर्घकालनैरंत
र्यसंस्कारैःसेवितेस्थैर्यंलब्ध्वापश्चात्क र्तृकरणानुसंधानपरि
त्यागार्थोयःप्रयत्नःतमपिपरित्यजेत्॥नन्वेवंसतितत्यागयत्नोपि
परित्याज्य इत्यनवस्थास्यात्॥मैवं॥कतकरजोन्यायेनस्वपरनि
वर्तकत्वात्यथाकलुषितेजलेप्रक्षिप्तंकतक रजइतररजसास
हस्वात्मानमपिनिवर्तयति॥तथात्यागार्थःप्रयत्नःकर्तृकरणा
नुसंधानंनिवर्तयन्स्वात्मानमपिनिवर्तयिष्यति॥निवृत्तेतस्मि
न्मलिन वासनानांशुभवासनातत्त्ववासनानामपिक्षीणत्वान्नि
र्वासनंमनोवतिष्ठते॥एतदेवाभिप्रेत्यवसिष्ठआह॥तस्माद्वा सन
या वद्धंमुक्तंनिर्वासनंमनः॥समनिर्वासनीभावमाहराशुविवे
कतः॥सम्यगालोचनात्सत्याद्वा सनाप्रविलीयते॥वासनावि
लयेचेतःशममायातिदीपवदितिच॥योजागर्तिसुषुप्तस्थोय
स्याजाग्रन्नविद्यते॥यस्यनिर्वासनोवोधःसजीवन्मुक्तउच्यते
इतिच॥सुषुप्तिवत्प्रशमितभाववृत्तिनास्थितःसदाजाग्रतियेन
चेतसा॥कलान्वितोविधुरिवयःसदाबुधैर्निषेव्यतेमुक्तइतीह
संस्मृतइतिच॥हृद्यात्तंपरित्यज्यसर्वमेवमहामतिः॥यस्तिष्ठ
तिगतव्यग्रःसमुक्तःपरमेश्वरः॥समाधिमथकर्माणिमाकरोतुक

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रोतु वा॥ हृदये नास्ति सर्वांशो मुक्त एवोत्तमाशयः॥ नैष्कर्म्येण न त-
स्यार्थस्तस्यार्थोऽस्ति न कर्मभिः॥ न समाधानजप्याभ्यां यस्य निर्वा-
सनं मनः॥ विचारितमलं शास्त्रं चिरमुद्ग्राहितं मिथः॥ संत्यक्तवा-
सनान्मौनादृते नास्त्युत्तमं पदमिति च॥ न च निर्वासनमनस्कस्य
जीवने हेतुव्यवहारो लुप्येतेति शंकनीयं॥ किं चक्षुरादिव्यवहा-
रस्य लोपः किं वा मानसव्यवहारस्य तत्राद्यमुद्दालकः निराचष्टे॥
वासनाहीनमप्येतच्चक्षुरादींद्रियं स्वतः॥ प्रवर्तते बहिः स्वार्थे वा-
सना नात्र कारणमिति॥ द्वितीयं वसिष्ठो निराचष्टे॥ अयत्नोपनते-
ष्वक्षि दिक्द्रव्येषु यथा पुनः॥ नीरागमेव पतति तद्वत्कार्येषु धीर-
धीरिति॥ तादृश्या धिया प्रारब्धभोगं सम्पादयति परिज्ञायोप-
युक्तो हि भोगो भवति तुष्टये॥ विज्ञाय सेवितश्चोरो मैत्रीमेति न चोरतां
॥ अशंकितोपसंप्राप्ता ग्रामयात्रा यथाऽध्वगैः॥ प्रेक्ष्यते तद्वदेव
ज्ञैर्भोगश्रीरवलोक्यत इति॥ भोगकाले पि वासनेभ्यो निर्वासन-
स्य विशेषमाह॥ नापदि ग्लानिमायाति हेमपद्मं यथा निशि॥ नेहं
ते प्रकृतादन्यद्रमते शिष्टवर्त्मनि॥ नित्यमापूर्णतामंतःशुद्धामिं-
दुसुंदरीं॥ आपद्यपि न मुंचंति शशिनः शीततामिव॥ अब्धि-
वद्धृतमर्यादा भवंति विगताशयाः॥ नियतिं न विमुंचंति महांतो
भास्करा इवेति॥ जनकस्यापि समाधिव्युत्थितस्येदृशमेवाचर-
णं पठ्यते॥ तूष्णीमथ चिरं स्थित्वा जनको जनजीवितं॥ व्युत्थि-
तश्चिंतयामास मनसा शममशालिना॥ किमुपादेयमस्तीह यत्ना-
त्संसाधयामि किं॥ स्वतः स्थितस्य शुद्धस्य चितः का मेऽस्ति कल्प-
ना॥ नाभिवांछाम्यसंप्राप्तं संप्राप्तं न त्यजाम्यहं॥ स्वस्थ आत्मनि
तिष्ठामि यन्ममास्ति तदस्तु मे॥ इति संचिंत्य जनको यथाप्राप्तक्रि-
यामसौ॥ असक्तः कर्तुमुत्तस्थौ दिनं दिनपतिर्यथा॥ भविष्यन्ना-
नुसंधत्ते नातीतं चिंतयत्यसौ॥ वर्तमाननिमेषं तु हसन्नेवानुव-
र्तत इति॥ तदेवं यथोक्तेन वासनाक्षयेण यथोक्ता जीवन्मुक्तिर्भव-
तीति सुस्थितं॥ इति वासनाक्षयः॥ अथ जीवन्मुक्तिसाधनं म-
नोनाशं च निरूपयामः॥ यद्यप्यशेषवासनाक्षये सति अर्थान्म-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नोनश्यत्येव॥तथापिस्वातंत्र्येणमनोनाशेसम्यगभ्यस्तेसतिवास
नाक्षयोरक्षितोभवति॥नचाजिव्हत्वषंडकत्वाद्यभ्यासेनैवतद्र
क्षासिद्धेतिवाच्यं॥नष्टेमनसिअजिव्हत्वादीनामर्थोत्तिद्धत्वेना
भ्यासप्रयासाभावात्॥ननुमनोनाशाभ्यासस्तत्राप्यस्तीतिचेद
स्तुनामतस्यावश्यकत्वात्॥अंतरेणमनोनाशमभ्यस्ताअपिअ
जिह्वत्वादयोअस्थिराभवंति॥अतएवमनसोनाशनीयत्वंज
नकआह॥सहस्त्रांकुरशाखात्मफलपल्लवशालिनः॥अस्य
संसारवृक्षस्यमनोमूलमितिस्थितं॥संकल्पमेवतन्मन्येसंकल्पोप
शनंमनोमूलमितिस्थितं॥संकल्पमेवतन्मन्येसंकल्पोपशमेनत
त्॥शोषयामियथाशोषमेतिसंसारपादपः॥प्रबुद्धोस्मिप्रबुद्धोस्मि
दुष्टश्चोरोमयात्मनः॥मनोनामानिहन्म्येनंमनसास्मिचिरंहत इति॥
वसिष्टोप्याह॥अस्यसंसारवृक्षस्यसर्वोपद्रवदायिनः॥उपायए
कएवास्तिमनसःस्वस्यनिग्रहः॥मनसोभ्युदयोनाशोमनोनाशो
महोदयः॥ज्ञमनोनाशमभ्येतिमनोऽज्ञस्यहिशृंखला॥तावन्नि
शीथवेतालावल्गंतिहृदिवासना॥एकतत्वदृढाभ्यासाद्यावन्नविजि
तंमनः॥प्रक्षीणचित्तदर्पस्यनिगृहीतेंद्रियद्विषः॥पद्मिन्यइवहे
मंतेक्षीयंतेभोगवासना॥हस्तंहस्तेनसंपीड्यदंतैर्दंतान्विचूर्ण्य
च॥अंगान्यंगैःसमाक्रम्यजयेदादौस्वकंमनः॥एतावतिधरणि
तलेसुभगास्तेसाधुचेतनाःपुरुषाः॥पुरुषकथासुचगण्यानजि
तायेचेतसास्वेन॥हृदयविलेकृतकुंडलउल्वणकलनाविषोम
नोभुजंगः॥यस्योपशांतिमगमत्चंद्रवदुदितंतमव्ययंवंदे॥
चित्तनाभिःकिलास्येदंमायाचक्रस्यसर्वतः॥स्थीयतेचेत्तदाक्रम्य
तन्नकिंचित्प्रबाधत इति॥गौडपादाचार्यैरप्युक्तम्॥मनसोनि
ग्रहायत्तमभयंसर्वयोगिनां॥दुःखक्षयःप्रबोधश्चाप्यक्षयाशांतिरेव
च॥इतिअर्जुनेनोक्तम्॥चपलंहिमनःकृष्णप्रमाथिबलवद्दृढं॥
तस्याहंनिग्रहंमन्येवायोरिवसुदुष्करमित्येतद्वचनंदृष्टयोगविष
यम्॥अतएववसिष्टआह॥उपविश्योपविश्यैकचित्तकेनमुहुर्मुहुः
॥नशक्यतेमनोजेतुंविनायोगमनिंदितं॥अंकुशेनविनामत्तोयथा

CC-0, Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दुष्टमतंगजः॥ विजेतुंशक्यतेनैवतथायुक्त्याविनामनः॥ मनोविलय
हेतूनांयुक्तीनांसम्यगीरणं॥वशिष्टेनकृतंतावत्तन्निष्टस्यवशेमनः॥
गृह्णतोयुक्तितश्चापिद्विविधोनिग्रहोमतः॥निग्रहोधीक्रियाऽक्षा
णांहठोगोलकनिग्रहात्॥कदाचिज्जायतेकश्चिन्मनस्तेनवि
लीयते॥अध्यात्मविद्याधिगमःसाधुसंगमएवच॥वासनासंप
रित्यागःप्राणस्पंदनिरोधनं॥एतास्तायुक्तयःपुष्टासंतिचित्तजये
किल॥सतीषुयुक्तिष्वेतासुहठान्नियमयंतिये॥चेतस्तेदीपमुत्सृ
ज्यविनिघ्नंतितमोंजनैः॥विमूढाःकर्त्तुमुद्युक्तायेहठाच्चेतसोजयं॥
तेनिबध्नंतिनागेंद्रमुन्मत्तंबिसतंतुभिरिति॥ निग्रहोद्विविधः॥ ह
ठनिग्रहःक्रमनिग्रहश्चेति॥तत्रचक्षुःश्रोत्रादिज्ञानेंद्रियाणिवाक्
पाण्यादिकर्मेंद्रियाणितत्तद्गोलकोपरोधमात्रेणहठान्निगृह्यंते
॥तद्दृष्टांतेनमनोपितथानिग्रहीष्यामीतिमूढस्यभ्रांतिर्भवति॥
नहुतन्निगृह्यते॥तद्गोलकस्यहृदयकमलस्यनिरोद्धुमशक्यत्वा
त्॥अतःक्रमनिग्रहएवयोग्यः॥क्रमनिग्रहायचाध्यात्मविद्या
प्राप्त्यादयश्चउपायाः॥साचदृश्यमिथ्यात्वदृग्वस्तुसत्यत्वंस्वप्र
काशत्वंचबोधयति॥तथाचसत्येतन्मनःस्वगोचरेषुदृश्येषुप्र
योजनाभावं॥प्रयोजनवतिदृग्वस्तुन्यगोचरत्वंबुध्वानिरंधना
ग्निवत्स्वयमेवोपशाम्यति॥तथाचश्रूयते॥यथानिरिंधनोवह्निः
स्वयमेवोपशाम्यति॥तथावृत्तिक्षयाच्चित्तंस्वयोनावुपशाम्यति
॥योनिरात्मायस्तुबोधितमपितत्वंनसम्यग्बुध्यते॥यश्चविस्म
रति॥तयोरुभयोःसाधुसंगमएवोपायः॥साधवोहिपुनःपुन
र्बोधयंतिस्मारयंतिच॥यस्तुविद्यामदादिदुर्वासनयापीड्यमानो
नसाधूननुवर्त्तितुमुत्सहते॥तस्यपूर्वोक्त विवेकेनवासनापरि
त्यागोउपायः॥वासनानाम तिप्राबल्येनत्यक्तुमशक्यत्वेप्राण
स्पंदनिरोधोउपायः॥प्राणस्पंदनवासनयोश्चित्तप्रेरकत्वात्॥त
योर्निरोधेचित्तशांतिरुपपद्यते॥प्रेरकत्वंचवसिष्टआह॥द्वेबीजे
चित्तवृक्षस्यवृत्तिव्रततिधारिणं॥एकंप्राणपरिस्पंदोद्वितीयंदृढ
भावना॥सतीसर्वगतासंवित्प्राणस्पंदेनबोध्यते॥संवेदनादनंता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नित्ततोदुःखानिचेत्तसइति॥यथाभस्मच्छन्नमग्निंलोहकारः दृ
तिभ्यांधमति॥तत्रचदृत्युत्पन्नवायुनासोग्निर्ज्वलति॥तथा॥चि
त्तोपादानेनकाष्ठस्थानीयेनाज्ञानेनावृतासंवित्प्राणस्पंदेनबो-
ध्यमानाचित्तवृत्तिरूपेणप्रज्वलति॥तस्माच्चित्तवृत्तिरूपात्संविज्ज्वा
लारूपात्संवेदनात्दुःखान्युत्पद्यंते॥सेयंप्राणस्पंदेनप्रेरिताचि
त्तोत्पत्तिः॥अन्यांचसएवाह॥भावसंवित्प्रकटितामनुभूतांचराघव
चित्तस्योत्पत्तिमपरांवासनाजनितांशृणु॥दृढाभ्यस्तपदार्थैकभाव-
नादतिचंचलं॥चित्तंसंजायतेजन्मजरामरणकारणमिति॥नन्वेवंप्रा
णवासनयोश्चित्तप्रेरकत्वंकिंतुपरस्परप्रेरकत्वमप्यस्ति॥तदा
हवसिष्ठः॥वासनावशतःप्राणस्पंदस्तेनचवासना॥क्रियतेचित्तबी
जस्यतेनबीजांकुरक्रमइति॥अतएवान्यतरनाशेनोभयनाशमप्या
ह॥द्वेबीजेचित्तवृक्षस्यप्राणस्पंदनवासने॥एकस्मिंश्चतयोःक्षी
णेक्षिप्रंद्वेअपिनश्यतइति॥तयोर्नाशोपायंनाशफलंचाह॥प्राणा
यामदृढाभ्यासैर्युक्त्याचगुरुदत्तया॥आसनाशनयोगेनप्राणस्पंदो
निरुध्यते॥असंगव्यवहारित्वाद्भवभावनवर्जनात्॥शरीरनाश
दर्शित्वाद्वासनानप्रवर्तते॥वासनासंपरित्यागाच्चित्तंगच्छत्यचि-
त्ततां॥प्राणस्पंदनिरोधाच्चयथेच्छसितथाकुरु॥एतावन्मात्रकंमन्ये
रूपंचित्तस्यराघव॥यद्भावनंवस्तुनोंतर्वस्तुत्वेनरसेनच॥यदानभाव्य
तेकिंचिद्धेयोपादेयरूपिय त्॥स्थीयतेसकलंत्यक्त्वातदाचित्तंन
जायते॥अवासनत्वात्सततंयदानमनुतेमनः॥अमनस्तातदोदे
तिपरमोपशमप्रदेति॥अमनस्तानुदेशांत्यभावमाह॥चित्तयक्ष
दृढाक्रांतंनमित्राणिनबांधवाः॥शक्नुवंतिपरित्रातुंगुरवोनचमा
नवमिति॥आसनाशनयोगेनेतियदुक्तंतत्रासनस्यलक्षणमु पा
यंफलंचत्रिभिःसूत्रैःपतंजलिःसूत्रयामास॥स्थिरसुखमासनं॥
प्रयत्नशैथिल्यानंतसमापत्तिभ्यां॥ततोद्वंद्वानभिघातइति॥पद्म
कस्वस्तिकादिनायादृशेनदेहस्थापनरूपेणयस्यपुरुषस्यावयव
व्यथानुत्पत्तिलक्षणंसुखं॥देहचलसाहित्यलक्षणंस्थैर्यंचसंप
द्यते॥तस्यतदे वसुखमासनं॥तस्यचप्रयत्नशैथिल्यंलौकिक

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उपायः॥गमनगृहकृत्यतीर्थयात्रास्नानयागहोमादिविक्षेपोयः
प्रयत्नोमानसउत्साहः॥तस्यशैथिल्यंकर्त्तव्यं॥अन्यथासउत्सा
हःबलात्देहसुस्था प्ययत्नक्वापिप्रेरयतिअलौकिकउपायस्तु
फणासहस्रेणधरणींधारयित्वास्थैर्येणावतिष्ठतेयोयमनंतसए
वाहमस्मीतिध्यानं॥चित्तस्यानंतेसमापत्तिः॥तथायथोक्तासन
संपादकमदृष्टंनिष्पद्यते॥सिद्धेचासनेशीतोष्णसुखदुःखमाना
दिद्वंद्वैर्यथापूर्वंनाभिहन्यते॥तथाविधस्यचासनस्ययोग्योदेशः।
श्रूयते॥विविक्तदेशेचसुखासनस्थःशुचिःसमग्रीवशिरःशरीरइ
ति॥समेशुचौशर्करावह्निवालुकादिभिर्विवर्जितेशब्दजलाश्रया
दिभिः मनोनुकूलेनतुचक्षुःपीडनेगुहानिवाताश्रयेणप्रयोजये
त्॥इतिचसोयमासनयोगः॥अथ ध्यानयोगस्तुमिताहारत्वं॥अत्या
हारमनाहारंनित्यंयोगीविवर्जयेत्॥इतिश्रुतेः॥भगवताप्युक्तम्
नात्यश्नतस्तुयोगोस्तिनचैकांतमनश्न तः॥नचातिस्वप्नशीलस्य
जाग्रतोनैवचार्जुन॥युक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसु॥यु
क्तस्वप्नावबोधस्ययोगोभवतिदुःखहेति॥जितासनस्यप्राणाया
मेनमनोविनाशःश्वेताश्वतरैराम्नायते॥त्रिरुन्नतंस्थाप्यसमंशरी
रंहृदींद्रियाणिमनसासन्निवेश्य॥ब्रह्मोडुपेनप्रतरेतविद्वान्।
स्रोतांसिसर्वाणिभयावहानि॥प्राणान्प्रपीड्येहसयुक्तचेष्टःक्षी
णेप्राणेनासिकयोःश्वसीत॥दुष्टाश्वयुक्तमिववाहमेनंविद्वान्मनो
धारयेताप्रमत्तः॥योगीद्विविधः॥विद्यामदाद्यासुरीसंपद्रहि।
तस्तत्सहितश्चेति॥तयोराद्यस्यब्रह्मध्यानेनमनसिनिरुद्धेसति
तन्नांतरीयकतयाप्राणोनिरुध्यते॥तंप्रतित्रिरुन्नतमितिमंत्रः
पठितः॥द्वितीयस्याभ्यासेनप्राणेनिरुद्धेतन्नांतरीयकतयाम
नोनिरुध्यते॥तंप्रतिप्राणान्प्रपीड्येतिमंत्रप्रवृत्तः॥प्राणपीड
नप्रकारोवक्ष्यते॥तेनचपीडनेनयुक्तचेष्टोभवति॥मनश्चेष्टा।
विद्यामदादयोनिरुध्यंते॥प्राणनिरोधेनचित्तदोषनिरोधे दृ
ष्टांतोन्यत्रश्रूयते॥यथापर्वतधातूनांदह्यंतेधमनान्मलाः॥
तथेंद्रियकृतादोषादह्यंतेप्राणनिग्रहादिति॥अत्रोपपत्तिर्वा।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सिष्ठेनदर्शिता॥यःप्राणपवनस्पंदःचित्तस्पंदःसएवहि॥प्राणस्पं
दक्षयेयत्नःकर्तव्योधीमतोच्चकैरिति॥मनोवाक्चक्षुरादींद्रियदे
वताःस्वस्वव्यापारंनिरंतरंकरिष्यामइतिव्रतंधृत्वाश्रमरूपेणमृ
त्युनाग्रस्ताःसचमृत्युःप्राणंनाप्नोत्ततोनिरंतरमुच्छ्वसन्निःश्वसन्सो
कुर्वन्नपिप्राणेनश्राम्यति॥तदाविचार्यदेवताःप्राणरूपंप्रविश
न्॥सोयमर्थोवाजसनेयिभिराम्नायते॥अयंवैनःश्रेष्ठोयःसंचरं
श्चासंचरंश्चनव्यथतेथोनरिष्यतिहंतस्यैवसर्वैरूपमसामेति॥
एतस्यैवसर्वैरूपमभवंस्तस्मादेतएतेनाख्यायंतप्राणाइति॥अ
तइंद्रियाणांप्राणरूपत्वान्नामप्राणाधीनचेष्टावत्त्वं॥तथांतर्यामि
ब्राह्मणेसूत्रात्मप्रस्तावेश्रूयते॥वायुर्वैगौतमसूत्रं॥वायुनावैगौ
तमसूत्रेणायंचलोकःपरश्चलोकःसर्वाणिचभूतानिसंदृब्धा
निभवंति॥तस्माद्वैगौतमपुरुषंप्रेतमाहुर्व्यस्रंसिषतास्यांगानी
ति॥वायुनाहिगौतमसूत्रेणसंदृब्धानिभवंतीति॥अतप्राणमन
स्स्पंदयोःसहभावित्वात्प्राणनिग्रहेमनोनिगृह्यते॥ननुसहस्पंदो
नयुक्तःसुषुप्तौचेष्टमानेपिप्राणे मनसोऽचेष्टमानत्वात्न॥विली
नत्वेनतदानींमनसएवाभावात्॥ननुक्षीणेप्राणेनासिकयोःश्व
सीतेतिहिव्याहृतंनहिक्षीणप्राणस्यमृतस्यश्वासंकश्चित्पश्यामः
नापिश्वसतोजीवतःप्राणक्षयोस्ति॥मैवं॥अनुल्वणत्वस्यक्षय
त्वेनात्रविवक्षितत्वात्॥यथाखननच्छेदनादिषुव्याप्रियप्राणस्य
पर्वतमारोहतःशीघ्रंधावतोवाश्वासवेगोथवानुभवति॥नतावां
स्तवस्थितस्यासीनस्यवाविद्यते॥तथाप्राणायामपाटवोपेत
स्यतस्याल्पःश्वासोभवति॥एतदेवाभिप्रेत्यश्रूयते॥भूत्वातत्राय
तप्राणःशनैरेवसमुच्छ्वसेदि॥यथादुष्टैरश्वैरुपेतोरथोमार्गंत्यक्त्वा
यत्रक्वापिनीयते॥सचसारथिनादृढमश्वंरज्जुभ्याकृष्यमार्गेषुपु
नर्धार्यते॥तथेंद्रियैर्वासनाभिरितस्ततोनीयमानंमनःप्राणरज्जौ
दृढंधारितायांधार्यते॥प्राणान पीडयेतियदुक्तंतत्रप्राणपीडनप्र
कारोऽन्यत्रश्रूयते॥सव्याहृतिकांसप्रणवांगायत्रींशिरसासह॥
त्रिःपठेदायतप्राणःप्राणायामःसउच्यते॥प्राणायामास्त्रयःप्रो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्ता रेचपूरककुंभकाः॥उत्क्षिप्यवायुमाकाशंशून्यंकृत्वानिरात्मकं
॥शून्यभावेनयुंजीयाद्रेचकस्येतिलक्षणं॥वक्त्रेणोत्पलनालेनतो
यमाकर्षयेन्नरः॥एवंवायुर्गृहीतव्यःपूरकस्येतिलक्षणं॥नोच्छ्वसे
न्नचनिःश्वसेन्नैवगात्राणिचालयेत्॥एवंतावन्नियुंजीतकुंभ
कस्येतिलक्षणमिति॥शरीरांतर्गतंवायुंबहिर्निःसारयितुंउत्क्षि
प्यशरीरमाकाशंशून्यंनिरात्मकंवायुरहितंकृत्वास्वल्पमपिवायुं
अप्रवेश्यशून्यभावेनैवनियमयेत्॥तदिदंरेचकंभवति॥कुंभको
द्विविधः॥आंतरोबाह्यश्चेति॥तदुभयंचवसिष्ठआह॥अपानेस्तं
गतेप्राणोयावन्नाभ्युदितोहृदि॥तावत्साकुंभकावस्थायोगिभि
र्यानुभूयते॥बहिरस्तंगतेप्राणेयावन्नापानउद्गमः॥तावत्पूर्णसमा
वस्थंबहिष्ठंकुंभकंविदुरिति॥आंतरोच्छ्वासनिश्वासौप्राणापानौ
उच्छ्वासआंतरकुंभविरोधीनिःश्वासोबाह्यकुंभविरोधीगात्रचा
लनमुभयविरोधितस्मिन्सतिनिश्वासोच्छ्वासयोरन्यतरस्यावश्यं
भावित्वात्॥पतंजलिरपिआसनानंतरभाविनंप्राणायामंसूत्र
यामास॥तस्मिन्सतिनिश्वासप्रश्वासयोर्गतिविच्छेदःप्राणायामः
ननुकुंभकेगत्यभावेपिरेचकपूरकयोरुच्छ्वासनिश्वासगतीविद्ये
तेइति चेन्न॥अधिकमात्राभ्यासेनस्वभावसिद्धायाःसमप्राणग
तेःविच्छेदात्॥तमेवाभ्यासंसूत्रयति॥बाह्याभ्यंतरस्तंभवृत्तिःदे
शकालसंख्यादिभिःपरिदृष्टोदीर्घःसूक्ष्मइति॥रेचकोबाह्यवृत्तिः
पूरकआंतरवृत्तिःकुंभकस्तंभवृत्तिःतत्रैकैकोदेशादिभिःपरीक्षणीयःतद्य
था॥स्वभावसिद्धेरेचकेहृदयान्निर्गत्यनासाग्रसंमुखेद्वादशां
गुलपर्यंतेश्वासःसमाप्यते॥अभ्यासेनतुक्रमेणनाभेराधारा
द्वावायुर्निर्गच्छति॥चतुर्विंशत्यंगुलपर्यंतेषट्त्रिंशदंगुलपर्यं
तेवासमाप्तिः॥अत्ररेचकेप्रयत्नातिशयेसतिनाभ्यादिप्रदेश
क्षोभेणांतर्निश्चेतुंशक्यं॥बहिस्तुसूक्ष्मंतूलंधृत्वातच्चालनेन
निश्चेतव्यं॥सेयंदेशपरीक्षा॥रेचककालेप्रणवस्यावृत्तयोदशविं
शतित्रिंशदादिभिःकालपरीक्षा॥अस्मिन्मासेप्रतिदिनंदशरेच
का॥आगामिमासेविंशतिउत्तरमासेत्रिंशतइत्यादिभिः संख्याप

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रिक्षायथोक्तदेशकालविशिष्टाःप्राणायामाएकस्मिन्दिनेदशवि
शतिनिःश्वासादिभिःसंख्यापरिक्षापूरकेप्येवंयोजनीयंयद्यपि
कुंभकेदेशव्याप्तिविशेषोनावगम्यते॥तथापिकालसंख्याव्याप्ति
रवगम्यते इतिं यथाघनीभूतस्तूलपिंडःप्रसार्यमाणोदीर्घोविरल
तयासूक्ष्मश्चभवति॥तथाप्राणोपिदेशकालसंख्याधिक्येनाभ्य
स्यमानोदीर्घोदुर्लक्ष्यतयासूक्ष्मश्चसंपद्यते॥रेचकादिभ्योत्रिभ्यो
न्यंप्रकारंसूचयति॥बाह्याभ्यंतरविषयानपेक्षी चतुर्थइति॥यथा
शक्तिसर्वंवायुंविरेच्यानंतरंक्रियमाणोबहिःकुंभकोयथाशक्ति
वायुमापूर्य्यानंतरंक्रियमाणोंतःकुंभकःरेचकपूरकावनादृत्य
केवलःकुंभकोभ्यस्यमानःपूर्वत्रापेक्ष याचतुर्थोभवति॥निद्राते
द्र्यादिप्रबलदोषयुक्तानांरेचकादित्रयं॥दोषरहितानांचतुर्थइ
तिविवेकः॥प्राणायामफलंसूचयति॥ततःक्षीयतेप्रकाशावरण
मिति॥प्रकाशस्यतत्त्वस्यावरणंतमोनिद्रालस्यादिहेतुःतस्यक्ष
योभवति॥फलांतरंसूचयति॥धारणासुयोग्यतामनसइति॥
आधारनाभिचक्रहृदयभ्रूमध्येब्रह्मरंध्रादिदेशविशेषेचित्तस्य
स्थापनंधारणादेशबंधश्चित्तस्यधारणेतिसूत्रणात्॥श्रुतिश्चम
नःसंकल्पकंध्यात्वासंक्षिप्यात्मनिबुद्धिमान्॥धारयित्वातथात्मा
नंधारणापरिकीर्तितेति॥प्राणायामेनरजोगुणकारिताच्चांचल्या
त्तमोगुणकारितादालस्यादेश्चनिवारितंमनस्तस्यांधारणायांयो
ग्यंभवति॥प्राणायामदृढाभ्यासैर्युक्त्याचगुरुदत्तयाइति॥अत्र
स्त्रेनयुक्तिशब्देनयोगिजनप्रसिद्धशिरोरूपमेरुचालनं॥जिह्वा
ग्रेणघंटिकाभ्रामणंनाभिचक्रेज्योतिर्ध्यानंविस्मृतिप्रदोषधसे
वाचेत्येवमादिकंगृह्यतेतद्देवमध्यात्मविद्यासाधुसंगमवासना
क्षयप्राणनिरोधाश्चित्तनाशोपायादर्शिताः॥अथतदुपायभूतं
समाधिंवक्ष्यामः॥पंचभूमयुतेतस्यचित्तस्यभूमित्रयत्यागेनावशिष्टंभू
मिद्वयंसमाधिः॥चित्तभूमयश्चयोगभाष्यकृतादर्शिताः॥क्षि
प्तंमूढंविक्षिप्तंएकाग्रंनिरुद्धमितिचित्तभूमयइति॥आसुरा
संपन्नोकशास्त्रेदेहवासनाप्रवर्तमानंचित्तंक्षिप्तं॥निद्रातंद्रा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दिग्रस्तंमूढं।कादाचित्कध्यानयुक्तंक्षिप्ताद्विशिष्टतयाविक्षिप्तं॥त
त्रक्षिप्तमूढयोः॥समाधिशंकैवनास्ति॥विक्षिप्तेतुचेतसिविक्षेपोप
सर्जनीभूतःसमाधिर्योगपक्षेनिवर्तते॥विक्षेपांतर्गततयादहनांत
र्गतबीजवत्स्वयमेवनश्यति॥यस्त्वेकाग्रेतुचेतसिसंभूतमर्थंद्योतय
ति॥क्षिणोतिचक्लेशान्कर्मबंधादिश्लथयति॥निरोधमभिमुखीक
रोतिससंप्रज्ञातोयोगइत्याख्यायते॥सर्ववृत्तिनिरोधेतुअसंप्रज्ञा
तःसमाधिः॥तत्रसंप्रज्ञातसमाधिभूमिकैकाग्रतांसूत्रयति॥शां
तोदितौतुल्यप्रत्ययौचित्तस्यैकाग्रतापरिणामइति॥शांतोऽतीतउ
दितोवर्तमानप्रत्ययाश्रितवृत्तिःअतीतप्रत्ययोयंपदार्थंगृह्णाति
तमेवचेदुदितोगृह्णीयात्तावुभौतुल्यौभवतः॥तादृशश्चित्तस्य
परिणामएकाग्रतेत्युच्यते॥एकाग्रताभिवृद्धिलक्षणंसमाधिंसू
त्रयति॥सर्वार्थतैकाग्रतयोःक्षयोदयौचित्तस्यसमाधिपरिणा
मइति रजोगुणेनचाल्यमानंचित्तंक्रमेणसर्वान्पदार्थान्गृह्णा
ति॥तस्यरजोगुणस्यनिरोधायक्रियमाणेनयोगिनःप्रयत्नविशे
षेणदिनेदिनेसर्वार्थताक्षीयते॥एकाग्रताचोदेति॥तादृशश्चि
त्तस्यपरिणामःसमाधिरित्युच्यते॥तस्यसमाधेरष्टांगेषुयमनि
यमासनप्राणायामप्रत्याहाराःपंचबहिरंगानि॥तत्रयमान्
सूत्रयति॥अहिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहायमाइति॥
हिंसादिभ्योनिषिद्धधर्मेभ्योयोगिनंयमयंतीतियमाः॥नियमान्
सूत्रयति॥शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानिनियमाइ
ति॥जन्महेतोःकाम्यधर्म्मान्निवर्त्यमोक्षहेतौनिष्कामधर्मेनिय
मयंतिप्रेरयंतीतिनियमाः॥यमनियमयोस्तुष्टानवैलक्षण्यंस्म
र्यते॥यमान्सेवेतसततंननित्यंनियमान्बुधः॥यमान्पतत्यकुर्वा
णोनियमान्केवलान्भजन्पततिनियमवानूयमेषसक्तोनतुय
मवान्नियमालसोऽवसीदेत्॥इतियमनियमौसमौस्यबुद्ध्याय
मबहुलेषनुसंदधीतबुद्धिंइति॥यमनियमफलानिसूत्रयति
तत्सन्निधौवैरत्यागः॥क्रियाफलाश्रयित्वंरत्नोपस्थानं॥वीर्यला
भः॥जननादिभयाभावःजन्मकथंतासंबोधः॥शौचात्स्वांगजु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गुरुशापरैरसंसर्गः॥सत्त्वशुद्धिःसौमनस्यैकाग्र्येंद्रियजयात्मदर्शन।
योग्यत्वानिचसंभवंति॥संतोषादनुत्तमःसुखलाभः॥कायेंद्रिय
बुद्धिशुद्धिरशुद्धिक्षयात्तपसः स्वाध्यायादिष्टदेवतासंप्रयोगः॥
समाधिसिद्धिरीश्वरप्रणिधानादिति॥आसनप्राणायामौव्या।
ख्यातौ॥प्रत्याहारं सूचयति॥स्वविषयाऽसंप्रयोगेचित्तस्वरूपा
नुकारइवेंद्रियाणांप्रत्याहारइति॥शब्दस्पर्शरूपरसगंधाविष
यास्तेभ्योनिवर्तिताःश्रोत्रादयःचित्तस्वरूपमनुकुर्वंतीवव्यतिष्ठं
ते॥श्रुतिश्चभवति॥शब्दादिविषयाःपंचमनश्चैवातिचंचलं॥
चिंतयेदात्मनोरश्मीन्प्रत्याहारःसउच्यतइति॥शब्दादयोविष
यायेषांश्रोत्रादीनांतेश्रोत्रादयोपंचमनःषष्ठानामेतेषामनात्मरू
पेभ्यःशब्दादिभ्योनिवर्तनमात्मरश्मित्वेनचिंतनंप्रत्याहारःसइत्य
र्थः॥प्रत्याहारफलंसूत्रयति॥ततःपरमावश्यतेंद्रियाणामिति
॥धारणाध्यानसमाधीन्सूत्रैस्त्रिभिःसूत्रयति॥देशबंधश्चित्त
स्यधारणा॥तत्रप्रत्ययैकतानताध्यानं॥तदेवार्थमात्रनिर्भासं।
स्वरूपशून्यमिवसमाधिरिति॥आधारादिदेशाःपूर्वमुक्ताः॥दे
देशांतरंश्रूयते॥मनःसंकल्पकंध्यात्वासंक्षिप्यात्मनिबुद्धिमान्
॥धारयित्वातथात्मानंधारणापरिकीर्तितेति॥यत्सर्ववस्तुसंक
ल्पकंमनःध्यात्वासंक्षिप्यात्मनितदात्मानमेवसंकल्पयतुनत
न्यदित्येवंविधःप्रयत्नआत्मनिसंक्षेपः॥प्रत्ययस्यैकतानताध्या
नंतत्त्वैकविषयप्रवाहःसचद्विविधः॥विच्छिद्यविच्छिद्यजायमा
नःसंततश्चेति॥तावुभौक्रमेणध्यानसमाधीभवतः॥तदुभयं
सर्वानुभवयोगिनादर्शितं॥चित्तैकाग्र्यवतोज्ञानमुक्तंसमुपजायते
॥तत्साधनमतोध्यानंयथावदुपदिश्यते॥विलाप्यवि—कृतिं
कृत्स्नांसंभवव्यत्ययक्रमात॥परिशिष्टंचसन्मात्रंचिदानंदंविचिं
तयेदिति॥ब्रह्माकारमनोवृत्तिप्रवाहोहंकृतिंविना॥संप्रज्ञात
समाधिःस्यात्ध्यानाभ्यासप्रकर्षतइति॥तंचभगवत्पादाउदा
जह्रुः॥हरिःस्वरूपंगगनोपमंपरंसकृद्विभातंत्वजमेकमक्षरं॥
अलेपकंसर्वगतंयदद्वयंतदेवचाहंसततंविमुक्तॐ॥हरिःसुपुरे

हमविक्रियात्मकोनमेस्ति कश्चिद्विषयःस्वभावतः॥पुरस्तिरश्चोर्द्ध
मधश्चसर्वतःसंपूर्णभूमात्वजआत्मनिस्थितः॥अजोमरश्चैवत
थाजरोमृतःस्वयंप्रभः सर्वगतोहमद्वयः॥नकारणंकार्यमतीव
निर्मलःसदैवतृप्तश्चततोविमुक्तॐमिति॥ननुसंप्रज्ञातसमा
धिरंगीसकथंध्यानानंतरभाविनोऽष्टमांगस्यसमाधेःस्थानेउदा
हृतः॥नायंदोषः॥अत्यंतभेदाभावात्॥यथावेदमधीयानोमाणव
कःपदेपदेस्खलन्पुनःपुनःसमादधाति॥अधीतवेदःसावधा
नोनस्खलति॥अध्यापकोनिरवधानस्तंद्रींकुर्वन्नपिनस्खल
ति॥तथाविषयैक्येपिपरिपाकतारतम्येनध्यानसमाधिसंप्रज्ञात
नामवांतरभेदोवावगंतव्यः॥धारणादित्रयंमनोविषयत्वात्संप्र
ज्ञातेंतरंगं॥यमादिपंचकंतुबहिरंगं॥तदेतत्सूत्रयति॥त्रयमंतरंगं
पूर्वेभ्यइति॥ततःकेनापिपुण्येनांतरंगंप्रथमंलब्ध्वेबहिरंगलाभा
यनातिप्रयासःकर्तव्यः॥यद्यपिपतंजलिनाभौतिकभूततन्मात्रें
द्रियाहंकारादिविषयाःसविकल्पकसमाधयोबहुधाप्रपंचिता
स्तथापितेषामंतर्द्धानादिसिद्धिहेतुतयामुक्तिहेतुसमाधिविरो
धित्वान्नास्माभिस्तत्रादरःक्रियते॥तथाचसूत्रितं॥तेसमाधावुप
सर्गाव्युत्थानेसिद्धयइति॥स्थान्युपमंत्रणेसंगस्मयाकरणंपुनर
निष्टप्रसंगादिति॥स्थानिनोदेवाःउद्दालकोदेवैरामंत्रितोप्यवज्ञा
यदेवान्निर्विकल्पकसमाधिमेवचकारेत्युपाख्यायते॥प्रश्नोत्त
राभ्यामप्येवंगम्यते॥ ॥श्रीरामः॥ ॥जीवन्मुक्तशरीराणांकथमा
त्मविदांवर॥शक्तयोनेहदृश्यंतेआकाशगमनादिकाः॥वसिष्ठः
॥अनात्मविदमुक्तोपिनभोविहरणादिकं॥द्रव्यमंत्रक्रियाका
लाशक्तैःसहयुक्तिःयोगःतेनद्रव्यादियुक्तःसन्प्राप्नोतीत्यर्थः॥द्रव्यं
मंत्रक्रियाकालयुक्त्याप्नोत्येवराघव॥नात्मज्ञस्यैषविषयआत्म
ज्ञोह्यात्ममात्रदृक्॥आत्मनात्मनिसंतृप्तोनाविद्यामनुधावति॥
येकेचनजगद्भावास्तानविद्यामयान्विदुः॥कथंतेषुकिलात्मज्ञ
स्त्यक्ताविद्योनिमज्जति॥द्रव्यमंत्रक्रियाकालशक्तयःसाधुसि
द्धिदाः॥परमात्मपदप्राप्तौनोपकुर्वंतिकाश्चन॥सर्वेच्छाजालसं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शांतावात्मलाभोदयोह्ययं॥सकथंसिद्धिवांछायांमग्नचित्तेनल
भ्यतइति॥नकेचनजगद्भावास्तत्त्वज्ञंरंजयंत्यमी॥नागरंनागरी
कांतिंकुग्रामललनाइवेति॥अपिशीतरुचावर्केसुतीक्ष्णेचेंदु
मंडले॥अप्यधःप्रसरत्यग्नौजीवन्मुक्तोनविस्मयी॥चिदात्म
नइमाइत्थंप्रस्फुरंतीहशक्तयः॥इत्यस्याश्चर्यजालेषुनाभ्युदे
तिकुतूहलमितिच॥आत्मविषयैस्तुसंप्रज्ञातसमाधिःवासनाक्ष
यस्यनिरोधसमाधेश्च हेतुःतस्मात्तत्रादरःकृतः॥अथपंचमभू
मिरूपोनिरोधसमाधिर्निरूप्यते॥तंचनिरोधंचसूत्रयति॥व्यु
त्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौनिरोधक्षणचित्ता
न्वयोनिरोधपरिणामइति॥व्युत्थानसंस्काराःसमाधिविरोधि
नस्तेचोद्दालकस्यसमाधौउदाहृताः॥कदाहंत्यक्तमननेपदे
परमपावने॥चिरंविश्रांतिमेष्यामिमेरुशृंगइवांबुदः॥इतिचिं
तापरवशोबलादुद्दालकोद्विजः॥पुनःपुनस्तूपविश्य ध्याना
भ्यासंचकारह॥विषयैर्नीयमानेतुचित्तेमर्कटचंचले॥नसले
भेसमाधानप्रतिष्ठांप्रीतिदायिनीं॥कदाचिद्बाह्यसंस्पर्शपरि
त्यागादनंतरं॥तस्यागच्छच्चित्तकपिरंतरस्पर्शसंश्रयात्॥क
दाचिदंतरस्पर्शाद्बाह्यंविषयमाददे॥तस्योड्डीयमनोयाति
कदाचिद्व्रस्तपक्षिवत्॥कदाचिदुदितार्काभंतेजःपश्यति
विस्तृतं॥कदाचित्केवलंव्योमकदाचिन्निबिडंतमइति॥आ
गच्छतोयथाकामंप्रतिभासान्पुनःपुनः॥अच्छिनन्मनसाशूरः
खड्गेनेवरणेरिपून्॥विकल्पौघेसमांलूनेसोपश्यद्धृदयांबरे॥
तमःछन्नविवेकार्कलोलकज्जलमेचकं॥तमप्युत्सादयामास
सम्यक्ज्ञानविवस्वता॥तमस्युपरतेस्वांतेतेजःपुंजंददर्शसः
॥तच्चलुलावास्यलाजानांवनंबालइवद्विपः॥तेजस्युपरतेत
स्यघूर्णमानंमनोमुनेः॥निशाजावदगान्निद्रांतामथासुलुला
वसः॥निद्राव्यपगमेतस्यव्योमसंवित्समुद्ययौ॥व्योमसंविद्विन
ष्टायांमूढंतस्याभवन्मनः॥मोहमप्येषमनसस्तन्ममार्जमहा
शयः॥ततस्तेजस्तमोनिद्रामोहादिपरिवर्जितां॥कामप्यव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यामासा द्यविरुद्धागमनःक्षणमितिच॥ तएतेव्युत्थानसंस्का
रानिरोधहेतुनायोगिप्रयत्नेनप्रतिदिनंप्रतिक्षणंचाभिभूयंतेत
द्विरोधिनश्चनिरोधसंस्काराःप्रादुर्भवंति॥ तथासतिनिरोध
एकैकस्मिन्क्षणेचित्तमनुगच्छतिसोयमीदृशश्चित्तस्यनिरोधप
रिणामोभवतिननुप्रतिक्षणपरिणामिनोहिभावान्ऋतेचितिश
क्तेरितिन्यायेनतथाचित्तस्यसर्वदापरिणामप्रवाहोवक्तव्यः।
बाढं॥ तत्रव्युत्थितचित्तस्यवृत्तिप्रवाहस्फुटः॥ निरुद्धचित्तस्यतु
कथमित्याशंक्योत्तरंसूत्रयति॥ ततःप्रशांतवाहितासंस्कारादि
ति॥ यथासमिदाज्याहुतिप्रक्षेपेवह्निरुत्तरोत्तरवृद्ध्याप्रज्वल
ति॥ समिदादिक्षयेप्रथमक्षणेकिंचिच्छाम्यति॥ उत्तरोत्तरक्षणे
ष्वांतिर्वर्द्धते॥ तथानिरुद्धचित्तस्योत्तरोत्तराधिकःप्रशमःप्रव
हति॥ तत्रपूर्वपूर्वप्रशमजनितःसंस्कारएवोत्तरप्रशमस्यका
रणं॥ तामेतांप्रशांतांप्रशांतवाहितांभगवान्वसिष्ठउदाज
हार॥ यदाविनियतंचित्तमात्मन्येवावतिष्ठते॥ निस्पृहःसर्व
कामेभ्योयुक्तइत्युच्यतेतदा॥ यथादीपोनिवातस्थोनेंगतेसोप
मास्मृता॥ योगिनोयतचित्तस्ययुंजतोयोगमात्मनः॥ यत्रोपरमते
चित्तंनिरुद्धंयोगसेवया॥ यत्रचैवात्मनात्मानंपश्यन्नात्मनितुष्य
ति॥ सुखमात्यंतिकंयत्तद्बुद्धिग्राह्यमतींद्रियं॥ वेत्तियत्रनचैवायं
स्थितश्चलतितत्त्वतः॥ यंलब्ध्वाचापरंलाभंमन्यतेनाधिकंततः॥
यस्मिन्स्थितोनदुःखेनगुरुणापिविचाल्यते॥ तंविद्याद्दुःखसंयोग
वियोगंयोगसंज्ञितं॥ सनिश्चयेनयोक्तव्योयोगोनिर्विण्णचेतसे
ति॥ निरोधसमाधेःसाधनंसूत्रयति॥ विरामप्रत्ययाभ्यासपूर्वकः
संस्कारशेषोन्यइति॥ विरामोवृत्तिउपरमःतस्यप्रत्ययःकारणंवस्तु
परमार्थःपुरुषप्रयत्नःतस्याभ्यासःपौनःपुन्येनसंपादनंतत्पूर्वक
स्तत्जन्यः॥ अनंतरातीतसूत्रेसंप्रज्ञातसमाधेरुक्तत्वात्तदपे
क्षया ऽन्यो ऽसंप्रज्ञातसमाधिस्तत्रवृत्तिरहितस्यचित्तस्वरूपस्य
दुर्लक्ष्यत्वात्संस्काररूपेणचित्तंशिष्यते॥ विरामप्रत्ययजन्यत्वं
भगवान्वसिष्ठमाह॥ संकल्पप्रभवान्कामांस्त्यक्त्वासर्वानशे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्वतः॥मनसैवेंद्रियग्रामंविनियम्यसमंततः॥शनैःशनैरुपरमेद्बुद्ध्या
धृतिगृहीतया॥आत्मसंस्थंमनःकृत्वानकिंचिदपिचिंतयेत्॥यतो
यतोनिश्चरतिमनश्चंचलमस्थिरं॥ततस्ततोनियम्यैतदात्मन्येववशं
शंनयेत्॥काम्यमानास्स्रक्चंदनवनितापुत्रमित्रगृहक्षेत्रादयोभो
ग्याःशास्त्रकुशलविवेकिजनप्रसिद्धैर्बहुभिर्दोषैरुपेताअपिअना
दिअविद्यावशात्दोषानाच्छाद्यतेषुविषयेषुरम्यत्वंसंकल्प
यंति॥तस्माच्चसंकल्पादिदंमेस्यादिदंमेस्यादित्येवंरूपाःकामाःप्र
भवंति॥तथाचस्मर्यते॥संकल्पमूलःकामोवैयज्ञाःसंकल्पसंभवाः
॥कामजानामितेमूलंसंकल्पात्किलजायसे॥इति॥नत्वांसंकल्पयि
ष्यामिसमूलस्त्वंविनश्यसि॥तत्रविवेकेनविषयदोषेषुसाक्षात्कृ
तेषुस्तनावांतेपायसइवकामास्त्यज्यंते॥स्रक्चंदनादिषुविषयेब्र
ह्मलोकादिषुअणिमाद्यैश्वर्येषुचकामास्त्याज्याइत्यभिप्रेत्यसर्वो
निशुक्लमासोपवासव्रतिनातस्मिन्मासेत्यक्तेपिकामःपुनःपुनरु
देतितद्वन्माभूदित्यशेषतइत्युक्तं॥कामत्यागेमनःपूर्वकप्रवृत्त्यभा
वेपिचक्षुरादीनांरूपादिषुस्वभावसिद्धाप्रवृत्तिःसापिप्रयत्नयुक्ते
नमनसैवनियंतव्या॥देवतादर्शनादिषुअपिअननुसरणायसमं
ततइत्युक्तम्॥भूमिकाजयक्रमेणोपरमंविवक्षितत्वात्शनैःशनै
रित्युक्तं॥ताश्चभूमिकाश्चतस्रःकठवल्लीषुश्रूयंते॥यच्छेद्वाङ्मन
सीप्राज्ञस्तद्यच्छेत्ज्ञानआत्मनिमहतिनियच्छेत्तद्यच्छेच्छांतआत्म
नीति॥वाग्व्यापारोद्विविधः॥जपादिरूपःलौकिकोजपादिरूपोवै
दिकश्च॥तत्रलौकिकश्चबहुविक्षेपकरत्वाद्युत्थानकालेपियोगी
तंपरित्यजेत्॥अतएवस्मर्यते॥मौनंयोगासनंयोगस्तितिक्षैकांत
शीलता॥निस्पृहत्वंसमत्वंचसप्तैतान्येकदंडिनः॥इति॥जपादिकं
निरोधसमाधौपरित्यजेत्॥सेयंवाक्भूमिःप्रथमातांभूमिंप्रयत्न
मात्रेणकतिपयैर्दिनैर्मासैर्वादृढंविजित्यपश्चाद्द्वितीयायांमनोभू
मौप्रयतेत॥अन्यथाबहुभूमिकप्रासादवत्प्रथमभूमिकापाते
नैवोपरितन्योयोगभूमयोविनश्येयुः॥यद्यपिचक्षुरादयोनिरोद्ध
व्याःतथापितेषांवाक्भूमौमनोभूमौवांतर्भावोद्रष्टव्यः॥ननुवाचंम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नसिनियच्छेदित्यनुपपन्नं॥नहींद्रियस्येंद्रियांतरे प्रवेशोस्ति॥मैवं॥
प्रवेशस्यास्याविवक्षितत्वात्॥नानाविक्षेपकारिणोर्वाङ्मनसयो
र्मध्ये प्रथमतो वाग्व्यापारनियमेन मनोव्यापारमात्रपरिशेषइह
विवक्षितः॥सोमद्विमाम्बादीनामिव वाङ्नियमे स्वाभाविके संपन्ने ततो
ज्ञानात्मनि मनो नियच्छेत्॥आत्मा त्रिविधः॥ज्ञानात्मा महानात्मा
शांतात्मा चेति॥ज्ञानात्मन्न स्थित आत्मेति ज्ञातृत्वोपाधिरहंकारो
त्र ज्ञानशब्देन विवक्षितः॥करणस्य मनसो नियम्यत्वेन पृथगुपात्त
त्वात्॥अहंकारो द्विविधः॥विशेषरूपः सामान्यरूपश्चेति॥अयमह
मेतस्य पुत्र इत्येवं व्यक्तमभिमन्यमानः सामान्यरूपः॥सच सर्वव्य
क्तिषु व्याप्तत्वान्महानित्युच्यते॥ताभ्यामहंकाराभ्यामुपहितौ द्वावा
त्मानौ॥निरुपाधिकः शांतात्मा तदेतत्सर्वमंतर्बहिर्भावेन वर्तते॥शां
त आत्मा सर्वांतरश्चिदेकरसस्तस्मिन्नाश्रितं जडशक्तिरूपमव्यक्तं
मूलप्रकृतिः साच प्रथमं सामान्याहंकाररूपं महत्तत्त्वनामधत्वा
व्यक्तीभवति॥ततो वहिर्विशेषाहंकाररूपेण ततो वहिर्मनोरूपेण
ततो वहिर्वागादींद्रियरूपेण तदेतदभिप्रेत्योत्तरमांतरत्वं विविन
क्ति श्रुतिः॥इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः॥मनसस्तु परा बु
द्धिर्बुद्धेरात्मा महान्परः॥महतः परमव्यक्तमव्यक्तात्पुरुषः पर इ
ति॥एवं सति अत्र नानाविधसंकल्पविकल्पसाधनं करणरूपं म
नोहंकर्तरि नियच्छेत्॥मनोव्यापारान् परित्यज्याहंकारमात्रं शेषये
त्॥नचैतदशक्यमिति वाच्यं॥तस्याहं निग्रहं मन्ये वायोरिव सुदु
ष्करमिति॥वदंतमर्जुनं प्रति भगवतोत्तराभिधानात्॥असंशयं म
हावाहो मनो दुर्निग्रहं चलं॥अभ्यासेन तु कौंतेय वैराग्येण च गृ
ह्यते॥असंयतात्मनो योगो दुःप्राप इति मे मतिः॥वश्यात्मना तु य
तता शक्योऽवाप्तुमुपायतः॥इत्यभ्यासवैराग्ये पतंजलिसूत्रोदा
हरणेन व्याख्यास्यते॥पूर्वपूर्वभूमिदार्ढ्यरहितोऽसंयतात्मा॥त
त्सहितो वश्यात्मा उपायतः प्राप्तिं गौडाचार्याः सदृष्टांतमाहुः॥
उत्सेक उदधेर्यद्वत्कुशाग्रेणैकविंदुना॥मनसो निग्रहस्तद्वद्
वेदपरिखेदतः॥बहुभिर्न विरोद्धव्यं एकेनापि वलीयसा॥सप

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राभवमाप्नोति समुद्र इव टिट्टिभात्॥ इत्यत्र संप्रदायविद आख्यायि
कामाचक्षते॥ कस्यचित्किल पक्षिणोंडानि तीरस्थान्युदधिरुत्सेके
नापजहार॥ तं च समुद्रं शोषयामीति प्रवृत्तः स च पक्षी स्वमुखाग्रेण
चैकैकं जलबिंदुं प्रतिक्षिपति॥ तदा बहुभिः पक्षिभिर्बंधुवर्गैर्वार्य
माणोप्यनुपरतः प्रत्युत तानपि सहकारिणो वव्रे॥ तांश्च पतनोत्प
तनाभ्यां बहुधा क्लिश्यतः सर्वानवलोक्य कृपालुर्नारदो गरुडं समी
पे प्रेषयामास॥ ततो गरुडपक्षपातेन शुष्यन्समुद्रो भीतस्तान्यंडानि
पक्षिणे ददौ॥ एवमखेदेन मनोनिरोधे परमधर्मे प्रवर्तमानं योगिनं
मीश्वरोनुगृह्णाति॥ अखेदश्च मध्ये मध्ये तदनुकूलव्यापारमिश्रणेन
संपद्यते॥ यथौदनं भुंजानस्तत्तद्ग्रासांतरे चोष्यलेह्यादीनास्वादय
ति तद्वत्॥ इदमेवाभिप्रेत्य वसिष्ठ आह॥ चित्तस्य भोगैर्द्वौ भागौ शास्त्रे
णैकं प्रपूरयेत्॥ गुरुशुश्रूषया भागं अव्युत्पन्नस्य संक्रमः॥ किंचि
द्व्युत्पत्तियुक्तस्य भागं भोगैः प्रपूरयेत्॥ गुरुशुश्रूषया भागौ भागं शास्त्रा
र्थचिंतया॥ व्युत्पत्तिमनुयातस्य पूरयेच्चेतसोन्वहं॥ द्वौ भागौ शास्त्रवै
राग्याभ्यां द्वौ ध्यानगुरुपूजयेति॥ भोगशब्देनात्र जीवनहेतुर्भिक्षाटनादि
व्यापारो वर्णाश्रमोचितव्यापारश्चोच्यते॥ घटिकामात्रं मुहूर्तं वा यथा
शक्ति योगमभ्यस्य ततो मुहूर्तं शास्त्रश्रवणेन परिचर्यया वा गुरुम
नुगम्य मुहूर्तं स्वदेहमनुसृत्य मुहूर्तं योगशास्त्रं पर्यालोच्य पुनर्मुहूर्तं
योगमभ्यसेत्॥ एवं योगप्राधान्येन व्यापारांतराणि मेलयेत्तानि द्राक्
अभ्यासप्रथमकाले तद्दिनगतान्योगमुहूर्तान् गणयेत्॥ ततः परेद्यु
र्वा परपक्षे वा परमासे वा योगमुहूर्तान्वर्द्धयेत्॥ तथा चैकैकस्मिन्मुहू
र्ते एकैकक्षणयोगेपि संवत्सरमात्रेण भूयान्योगकालो भवति॥ न चै
वं योगैकशरणत्वे व्यापारांतराणि लुप्येरन्निति शंकनीयं॥ लुप्तेतर
कृत्स्नव्यापारस्यैव योगेधिकारात्॥ अत एव विद्वत्संन्यासोपेक्ष्यते
॥ तस्मात्तदेकनिष्ठः पुमानध्येत्वणिगादिवत्॥ क्रमेण योगारू
ढो भवति॥ यथाध्येता माणवकः पादं पादमर्द्धर्चमृचमृग्वर्गं च
क्रमेण पठन्दशवर्षैरध्यापको भवति॥ यथा च वाणिज्यं कुर्वन् ए
कनिष्कद्विनिष्कादिक्रमेण लक्षपतिः कोटिपतिर्वा भवति॥ तथा ता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भ्यांवणिक्अध्येतृभ्यांसहैवोपक्रम्यमत्सरग्रस्तइवयुंजानस्तावता।
कालेनकुतोनयोगमारोहेत्।।तस्मात्पुनःपुनःप्राप्यमाणान्संकल्प
विकल्पानुद्दालकवत्पुरुषप्रयत्नेनपरित्यज्याहंकर्तरिज्ञानात्मनि
मनोनियच्छेत्।।तामेतांद्वितीयभूमिकांविजित्यबालमूकादिवन्निर्म
लस्वेस्वाभाविकेसतिततोविशेषाहंकाररूपंविस्पष्टज्ञानात्मानमस्प
ष्टसामान्याहंकारेमहत्तत्वेनियच्छेत्।।यथास्वस्थांतंद्रींप्राप्तवतोवि
शेषाहंकारःसंकोचोभवति।।सेयंलोकप्रसिद्धयातंद्रातार्किका
भिमतनिर्विकल्पकज्ञानेनचसमानामहत्तत्त्वमात्रपरिशेषावस्था
तृतीयाभूमिः।।अस्यांचाभ्यासपाटवेनवशीकृतायांतमेतंसामान्या
हंकाररूपंमहांतमात्मानंनिरुपाधितयाशांतेचिदेकरसस्वभावेनि
यच्छेत्।।महत्तत्त्वंतिरस्कृत्यचिन्मात्रंपरिशेषयेत्।।अत्रापिपूर्वोक्त
विस्मृतिभयंतएवततोप्यतिशयेनोपायलाभमापद्यते।।यथाशास्त्रा
भ्यासेप्रवृत्तस्यस्खलतः प्राक्प्रतिग्रंथंव्याख्यानापेक्षायामपिव्यु
त्पन्नस्यस्वतएवोत्तरग्रंथार्थःप्रतिभाति।।तथासम्यग्वशीकृतपूर्वभू
मेर्योगिनउत्तरभूम्युपायःस्वतएवप्रतिभाति।।तदाहयोगभाष्यका
रः।।योगेनयोगोज्ञातव्योयोगोयोगात्प्रवर्त्तते।।योऽप्रमत्तस्तुयोगेनसयो
गीरमतेचिरमिति।योगउत्तरभूमिकायोगेनज्ञातव्योयोगोयोगात्प्रव
र्त्ततेयोयोगाप्रमत्तःयोगेनपूर्वभूमिकोत्तरभूमिकायोगेनसयोगेरम
तेचिरमिति।।ननुमहत्तत्त्वशांतात्मनोर्मध्येमहत्तत्त्वोपादानमव्यक्ता
ख्यंतत्त्वंस्तुसोदाहृतं।।तत्रकुतोनियमनंनाभिधीयतइतिचेन्न।।
लयप्रसंगादितिब्रूमः।।यथाघटोऽनुपादानेजलेनिरुध्यमानोनली
यते।।उपादानभूतायांतुमृदिलीयते।।तथामहत्तत्त्वमात्मनिनली
यते।।अव्यक्तेतुलीयते।।नचस्वरूपलयःपुरुषार्थः।।स्वात्मदर्शना
नुपयोगात्दृश्यते त्वग्र्ययाबुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिरिति।।
पूर्ववाक्येऽभिधायसूक्ष्मत्वसिद्धयेनिरोधस्याभिधानात्।।लयस्य
प्रतिदिनंसुषुप्तौस्वतःसिद्धत्वेनप्रयत्नवैयर्थ्याच्च।।ननुधारणाध्या
नसमाधिसाध्यस्यसंप्रज्ञातस्यैकाग्रावृत्तिरूपत्वेनदर्शनहेतुत्वेपि
शांतात्मन्यवरुद्धस्यासंप्रज्ञातसमाधिमापन्नस्यचित्तस्यवृत्तिरहितत्वे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नसुषुप्तिवत्न्नदर्शनहेतुत्वमितिचेन्न॥स्वतःसिद्धस्यदर्शनस्यनि
वारयितुमशक्यत्वात्॥अतएवश्रेयोमार्गेभिहितम्॥आत्मना
त्माकारंस्वभावतोवस्थितंसदाचित्तंआत्मैकाकारतयात्तिरस्कृता
नात्मदृष्टिर्विदधीतेति॥यथाघटोउत्पद्यमानःस्वतोवियत्पूर्णएवो
त्पद्यते॥जलतंदुलादिपूरणंउत्पन्नेघटेपश्चात्पुरुषप्रयत्नेन
भवति॥तत्रजलादौनिःसारितेपिनवियन्निःसारयितुंशक्यते॥मु
खपिधानेपिअंतर्वियद्वतिष्ठतएव॥तथाचित्तमुत्पद्यमानमा
त्मचैतन्यपूर्णमेवोत्पद्यते॥उत्पन्नेचित्तेपश्चान्मूषनिक्तद्रुतताम्र
वद्घटपटरूपरसमुखदुःखादिवृत्तिरूपत्वंभोगहेतुधर्माधर्मादि
वशाद्भवति॥तत्ररूपरसाद्यनात्माकारेनिवारितेपिनिर्निमित्तश्चिदा
कारोनेनिवारयितुंशक्यते॥ततोनिरोधसमाधिनानिर्वृत्तिकेनसं
स्कारमात्रशेष्यतयासूक्ष्मत्वेनचिदात्ममानाभिमुखत्वादेकाग्रेण
चित्तेननिर्विघ्नमात्मानुभूयते॥अनेनैवाभिप्रायेणवार्त्तिककारस
र्वानुभवयोगिनावाहतुः॥घटदुःखादिरूपित्वंधियोधर्मादिहेतु
तः॥निर्हेतुत्वात्मसंवोधरूपित्वंवस्तुवृत्ततः॥प्रशांतवृत्तिकंचित्तंप
रमानंददायकं॥असंप्रज्ञातनामायंसमाधिर्योगिनांप्रियइति॥
आत्मदर्शनस्यस्वतःसिद्धत्वेप्यनात्मवारणायनिरोधाभ्यासः॥
अतएवोक्तम्॥आत्मसंस्थंमनःकृत्वानकिंचिदपिचिंतयेदिति
योगशास्त्रस्यचित्तचिकित्सकसमाधिमात्रेप्रवृत्तत्वान्निरोधसमा
धावात्मदर्शनंनसाक्षादुक्तं॥भाष्यांतरेणत्वभ्युपगम्यते॥योगश्चि
त्तवृत्तिनिरोधइतिसूत्रयित्वातदाद्रष्टुःस्वरूपेणावस्थानमितिसू
त्रणात्॥यद्यपिनिर्विकारोद्रष्टासदास्वरूपएवावतिष्ठते॥तथापि
वृत्तिषूत्पद्यमानासुतत्रचिच्छायायांप्रतिबिंबितायांतदविवेकाद
स्वस्थइवद्रष्टाभवति॥तदप्यनंतरसूत्रेणोक्तं॥वृत्तिसारूप्यमि
तरत्रेति॥अन्यत्रापिसूत्रितम्॥सत्वपुरुषयोरत्यंतासंकीर्णयोः
प्रत्ययाविशेषोभोगःपरार्थत्वादिति॥चित्तेरप्रतिसंक्रमायास्तदा
कारापत्तौस्वबुद्धिसंवेदनमितिच॥निरोधसमाधिनाशोधितेत्वं
पदार्थेसाक्षात्कृतेपितस्यब्रह्मत्वंगोचरयितुंमहावाक्येनब्रह्मवि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्यानामकंस्वहत्स्यंतरमुत्पद्यते॥नचसुदृढत्वंपदार्थसाक्षात्कारेनि
रोधसमाधिरेकएवोपायः॥किंतुविज्जडविवेकेनापिपृथक्कृतेतत
त्साक्षात्कारसंभवात्॥अतएववसिष्ठआह॥द्वौक्रमौचित्तनाशस्ययो
गोज्ञानंचराघव॥योगस्तद्वृत्तिरोधोहिज्ञानंसम्यगवेक्षणमिति॥
असाध्यःकस्यचिद्योगःकस्यचिज्ज्ञाननिश्चयः॥प्रकारौद्वौततोदे
वोजगादपरमःशिवइति॥ननुविवेकोपियोगेपर्यवस्यतिदर्शनवे
लायामात्ममात्रगोचरायाएकाग्रवृत्तेःक्षणिकसंप्रज्ञातरूपत्वात्॥
बाढंतथापिसंप्रज्ञातासंप्रज्ञातयोःस्वरूपतःसाधनतश्चास्त्येवमहद्वै
लक्षण्यंवृत्तिसद्भावाभ्यांस्फुटःस्वरूपभेदः॥साधनंतुसंप्रज्ञातस्यस
जातीयत्वाद्धारणादित्रयमंतरंगंअसंप्रज्ञातस्यतुप्रवृत्तिकस्यवि
जातीयत्वाद्बहिरंगं॥तथाचसूत्रं॥तदपिबहिरंगंनिर्बीजस्येति॥वि
जातीयस्यापिबहुविधानात्मवृत्तिनिवारणेनोपकारितयाबहिरंग
त्वमविरुद्धं॥तदेवोपकारित्वंविशदयितुंसूत्रयति॥श्रद्धावीर्यस्मृ
तिसमाधिप्रज्ञापूर्वकइतरेषामिति॥केषांचिद्देवादीनांपूर्वसूत्रे
जन्मनैवसमाधिरुक्तामनुष्यान्प्रत्येतदुच्यते॥ममायंयोगएवपर
मपुरुषार्थसाधनमितिप्रत्ययःश्रद्धा॥साचोत्कर्षश्रवणेनोपजायते
॥तदुत्कर्षश्चस्मर्यते॥तपस्विभ्योधिकोयोगीज्ञानिभ्योपिमतोधि
कः॥कर्मिभ्यश्चाधिकोयोगीतस्माद्योगीभवार्जुनेति॥उत्तमलोक
साधनत्वात्॥कृच्छ्रचान्द्रायणादितपसोज्योतिष्टोमादिकर्मणश्च
योगोधिकं॥ज्ञानंप्रत्यंतरंगत्वाच्चित्तविश्रांतिहेतुतयाज्ञानादप्यधि
कत्वं॥एवंज्ञानतोयोगेश्रद्धाजायते॥तस्यांचश्रद्धायांवासितायां
वीर्यमुत्साहोभवति॥सर्वथायोगंसंपादयिष्यामीति॥एतादृशे
नोत्साहेनतदातदनुष्ठेयानियोगांगानिसम्पद्यंते॥तथाचस्मृत्या
सम्यगनुष्ठितसमाधेरध्यात्मप्रसादेसत्यृतंभराप्रज्ञोदेति॥तत्प्र
ज्ञापूर्वकःतत्प्रज्ञाकारणकोसंप्रज्ञातसमाधिरितरेषांदेवादिभ्यो
ऽर्वाचीनानांमनुष्याणांसिध्यति॥तांचप्रज्ञांसूत्रयति॥ऋतंभरा
तत्रप्रज्ञेति॥ऋतं सत्यंवस्तुयाथात्म्यंबिभर्तिप्रकाशयतीतिऋ
तंभरातत्रतस्मिन्समाधावुत्कर्षजन्येअध्यात्मप्रसादेसतीत्यर्थः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऋतंभरत्वोपपत्तिंसूत्रयति॥श्रुतानुमानप्रज्ञाभ्यामन्यविषयाविशे-
षार्थत्वादिति॥सूक्ष्मव्यवहितविप्रकृष्टवस्तुषुअयोगिप्रत्यक्ष-
त्वंनप्रवर्तते॥आगमानुमानाभ्यांतानिवस्तूनिअयोगिभिर्ज्ञायंते॥इ-
तेचशास्त्रानुमानजन्येप्रज्ञेवस्तुसामान्यमेवगोचरयतः इदंतुयोगि-
प्रत्यक्षंविशेषवस्तुगोचरत्वादृतंभरं॥तस्ययोगिप्रत्यक्षस्यासंप्र-
ज्ञातसमाधौबहिरंगत्वसिद्ध्यर्थमुपकारित्वंसूत्रयति॥तज्जःसं-
स्कारोन्यसंस्कारप्रतिबंधीति॥असंप्रज्ञातसमाधेर्बहिरंगसाध-
नमुक्त्वातन्निरोधप्रयत्नस्यांतरंगसाधनतांसूत्रयति॥तस्यापि
निरोधेसर्वनिरोधान्निर्बीजःसमाधिरिति॥सोयंसमाधिःसुषु-
प्तिसमानःसाक्षिचैतन्येनानुभावितुंशक्यः॥नचासौसर्वधीवृ-
त्तिराहित्यात्सुषुप्तिरेवेतिशंकनीयं॥मनःस्वरूपसदसत्त्वाभ्यांवि-
शेषात्॥तदुक्तंगौडपादाचार्यैः॥निगृहीतस्यमनसोनिर्विकल्प-
स्यधीमतः॥प्रचारःसतुविज्ञेयःसुषुप्तेन्योन्यतत्समः॥लीयतेहि
सुषुप्तौतन्निगृहीतंनलीयते॥तदेवनिर्भयंब्रह्मज्ञानालोकंसम-
ंततइति॥मांडूक्यशाखायामपिश्रूयते॥द्वैतस्याग्रहणंतुल्यमुभ-
योःप्राज्ञतुर्ययोः॥बीजनिद्रायुतःप्राज्ञःसाचतुर्येनविद्यते॥स्व-
प्ननिद्रायुतावाद्यौप्राज्ञस्त्वस्वप्ननिद्रया॥ननिद्रांनैवचस्वप्नंतुर्येप-
श्यंतिनिश्चिताः॥अन्यथागृह्णतःस्वप्नोनिद्रातत्त्वमजानतः॥विप-
र्यासेतयोःक्षीणेतुरीयंपदमश्नुतइति॥आद्यौविश्वतैजसौ॥अ-
द्वैतस्यवस्तुनोऽन्यथाग्रहणंद्वैतरूपेणप्रतिभासः॥सचविश्वतैज-
सयोर्वर्तमानःस्वप्नउच्यते॥तत्त्वस्याज्ञानंनिद्रासाचविश्वतैजस-
प्राज्ञेषुवर्तते॥ ॥तयोःस्वप्ननिद्रयोःस्वरूपभूतयोर्विपर्यासोमि-
थ्याज्ञानंतस्मिन्विद्ययाक्षीणेसतितुरीयपदमद्वैतंवस्त्वश्नुते॥नन्व-
स्त्वेवमसंप्रज्ञातसमाधिसुषुप्त्योर्महान्भेदःतत्रतत्त्वविदोदर्श-
नसाधनत्वेनसमाध्यपेक्षायामपिदृष्टतत्त्वस्यजीवन्मुक्तस्यनास्ति
तदपेक्षा॥रागद्वेषादिक्लेशबंधस्यसुषुप्त्यापिनिवृत्तेः॥मैवम्॥किं
प्रतिदिनंस्वतःप्राप्ताकादाचित्कीसुषुप्तिर्बंधनिवर्तिका॥किंवाभ्या-
सेननिरंतरवर्तिनी॥आद्येपिकिंसुषुप्तिकालीनस्यक्लेशबंधस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निवृत्तिःकिंवाकालांतरवर्त्तिनोनाद्यः॥अप्रसक्तेर्नहिमूढानामपि
सुषुप्तौक्लेशबंधः॥अन्यथायास्तःप्रसज्येत॥नद्वितीयोसंभवात्न
ह्यन्यकालीनयासुषुप्त्याकालांतरवर्तिनःक्लेशस्यक्षयःसंभवति॥
अन्यथामूढानामपिजागरणस्वप्नयोःक्लेशस्यक्षयःप्रसज्येतनापि
सुषुप्तेर्नैरंतर्यमभ्यसितुंशक्यं॥तस्याःकर्मक्षयनिवृत्तत्वात्॥तस्मा
त्तत्त्वविदोपिक्लेशक्षयायास्त्येवासंप्रज्ञातसमाध्यपेक्षा॥तस्यच
समाधेर्गवाश्वादिष्विववाङ्निरोधःप्रथमाभूमिः॥बालकादिष्विवनि
र्मनस्त्वंद्वितीया॥तंद्रालुमिवाहंकारराहित्यंतृतीया॥सुषुप्ताविवमह
त्तत्वराहित्यंचतुर्थी॥तदेतद्भूमिचतुष्टयमभिप्रेत्यशनैरुपरमेदित्यु
क्तं॥अत्रचोपरमेद्धृतिगृहीताबुद्धिःसाधनंमहदहंकारमनोवागा
दीनांस्वतएवतीव्रवेगेनबहिःप्रवहतांकूलंकषायाइवनद्यानिरो
धेधैर्यमहदयेस्थितंबुद्धिविवेकःपूर्वाभूमिर्जितानवेतिपरीक्ष्यजि
तायामुत्तरभूम्युपक्रमः॥अजितायांतुसैवपुनरभ्यसनीयेतित
दातदाविविच्यात्॥आत्मसंस्थमित्यादिनार्द्धश्लोकेनचतुर्थभू
म्यभ्यासोपिस्मृतः॥गौडपादाचार्याआहुः॥उपायेननिगृह्णीयात्
विक्षिप्तंकामभोगयोः॥सुप्रसन्नंलयेचैवयथाकामोलयस्तथा॥दुः
खंसर्वमनुस्मृत्यकामभोगान्निवर्तयेत्॥अजंसर्वमनुस्मृत्यजा
तंनैवतुपश्यति॥लयेसंबोधयेच्चित्तंविक्षिप्तंशमयेत्पुनः॥सक
षायंविजानीयात्समप्राप्तंनचालयेत्॥नास्वादयेत्सुखंतत्रनिःसं
गःप्रज्ञयाभवेत्॥निश्चलंनिश्चरच्चित्तमेकीकुर्यात्प्रयत्नतः॥यदान
लीयतेचित्तंनचविक्षिप्यतेपुनः॥अलिंगनमनाभासंनिष्पन्नंब्रह्म
तत्तदेति॥लयविक्षेपकषायसमप्राप्तयश्चतस्रश्चित्तस्यावस्थाः॥
तत्रनिरुध्यमानंचित्तंविषयेभ्योव्यावृत्तंपूर्वाभ्यासवशात्यदिलया
यसुषुप्तयेअभिमुखंभवेत्॥तदानीमुत्थापनप्रयत्नेनलयकारण
निवारणेनवाचित्तंसम्यक्प्रबोधयेत्॥लयहेतवोनिद्राशेषाऽजीर्ण
बह्वशनश्रमाः॥अतएवआहुः॥समाप्यनिद्रांसुजीर्णेल्पभोजीश्र
मत्याज्यबाधेविभक्तप्रदेशेसदासीतनिस्तृष्णएवंप्रयत्नोथवाप्राण
रोधोनिजाभ्यासमार्गादिति॥लयादुत्थापितंचित्तंदैनंदिनप्रबोधा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भ्यासवशात्यदिकामभोगयोर्विक्षिप्येततदाविवेकिजनप्रसिद्ध
भोग्यवस्तुगतसर्वदुःखानुस्मरणेनशास्त्रप्रसिद्धजन्मादिरहिता
द्वितीयब्रह्मतत्वानुस्मरणपूर्वकेनभोग्यवस्त्वदर्शनेनचपुनःपु
नर्विक्षेपाच्चित्तंशमयेत्॥कषायस्तीव्रचित्तदोषस्तीव्ररागद्वेषा
दिवासनागस्तंचित्तंकदाचित्समाहितमिवलयविक्षेपरहितंदुः
खैकाग्रमवतिष्ठतेतादृशंतच्चित्तंविजानीयात्॥समाहितचित्तात्
पृथक्त्वेनअसमाहितंचित्तंविवेकेनावगच्छेत्॥असमाहितमेतदि
त्यवगम्यलयविक्षेपवत्कषायस्यप्रतीकारंकुर्यात्॥समशब्देन
ब्रह्माभिधीयते॥समंसर्वेषुभूतेषुतिष्ठंतंपरमेश्वरमितिस्मृतेः॥
लयविक्षेपकषायेषुपरिहृतेषुपरिशेषाच्चितेनसमंब्रह्मप्राप्यते
॥तच्चसमप्राप्तंचित्तंकषायलयभ्रांत्यानचालयेत्॥सूक्ष्मयाबुध्या
लयकषायप्राप्तीविविच्यतस्यांसमप्राप्तावतिप्रयत्नेनचित्तंस्थापये
त्॥स्थापितेतस्मिन्ब्रह्मस्वरूपभूतःपरमानंदःसम्यगाविर्भवति
॥तथाचोदाहृतं॥सुखमात्यंतिकंयत्तद्बुद्धिग्राह्यमतींद्रियमिति॥
श्रुतिश्चभवति॥समाधिनिर्धूतमलस्यचेतसोनिवेशितस्यात्म
नियत्सुखंभवेत्॥नशक्यतेवर्णयितुंगिरातदास्वयंतदंतःकर
णेनगृह्यत इति॥ननुसमाध्याविर्भूतब्रह्मानंदस्यबुद्धिग्राह्यत्वं
श्रुतिस्मृतिभ्यांअभिहितं॥आचार्यैस्तुनास्वादयेत्सुखंतत्रेतिबु
द्धिग्राह्यत्वंप्रतिषिध्यते॥नायंदोषः॥तत्रनिरोधसुखंबुद्धिग्राह्यं
नप्रतिषिध्यतेकिंतुसमाधिविरोधिनोव्युत्थानरूपस्यपरामर्शस्ये
वप्रतिषेधात्॥यथानिदाघदिवसेषुमध्याह्नेजाह्नवीह्रदनिमग्ने
नानुभूयमानमपिशैत्यसुखंतदावक्तुमशक्यंपश्चादुन्मग्नेना
भिधीयते॥यथावासुषुप्तावविद्यावृत्तिभिःसूक्ष्माभिरनुभूयमान
मपिस्वरूपसुखंतदानींसविकल्पकेनांतःकरणवृत्तिज्ञानेनगृ
हीतुमशक्यंप्रबोधकालेतुस्मृत्याविस्पष्टंपरामृश्यते॥तथास
माधौवृत्तिरहितेनसंस्कारमात्रशेषतयासूक्ष्मेणवाचित्तेनसुखा
नुभवःश्रुतिस्मृत्योर्विवक्षितः॥महदिदंसमाधिसुखमन्वभूवमि
त्येतादृशोव्युत्थितस्यसविकल्पकःपरामर्शोनास्वादनं॥तदेवा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चार्यैः प्रतिषिध्यते॥ तमेव स्वाभिप्रायं प्रकटयितुं निःसंगः प्रज्ञया
भवेदित्युक्तं॥ प्रकृष्टं सविकल्पकं ज्ञानं प्रज्ञा तया सह संगं परित्य
जेत्॥ यद्वा पूर्वोक्ताध्यात्मगूढिता बुद्धिः प्रज्ञा तदात्मकेन साधनेन
सुखास्वादनतद्वर्णनादिरूपामासक्तिं वर्जयेत्॥ समाधौ ब्रह्मानं
दे निमग्नं चित्तं यदि कदाचित्सुखास्वादनाय चाशीतवातमशकाद्यु
पद्रवेण निश्चरेत्॥ तदा निश्चरत्तच्चित्तं पुनर्निश्चलं यथा भवति त
था परब्रह्मणा सहैकीकुर्यात्॥ तत्र च निरोधप्रयत्न एव साधनं॥ एकी
भाव एव यदा न लीयते इत्यनेन स्पष्टीक्रियते। अलिंगनमनाभास
मित्याभ्यां पदाभ्यां कषायसुखास्वादौ प्रतिषिध्यते॥ लयविक्षेपक
षायसुखास्वादेभ्यो रहितं चित्तमविघ्नेन ब्रह्मण्यवस्थितं भवति॥
एतदेवाभिप्रेत्य कठवल्लीषु पठ्यते॥ यदा पंचावतिष्ठंते ज्ञानानि म
नसा सह॥ बुद्धिश्च न विचेष्टति तामाहुः परमां गतिं॥ तां योग इति म
न्यंते स्थिरामिंद्रियधारणां॥ अप्रमत्तस्तदा भवति योगो हि प्रभवा
प्ययाविति॥ उपेक्षितो योग इन्द्रियवृत्तीनां प्रभवं करोति॥ अनुष्ठित
स्तु तासां लयहेतुः॥ अत एव योगस्य स्वरूपलक्षणं सूत्रयति॥ यो
गश्चित्तवृत्तिनिरोध इति॥ वृत्तीनामानंत्यान्निरोधोऽशक्य इति शं
कां वारयितुमियत्तां सूत्रयति॥ वृत्तयः पंचतय्यः क्लिष्टा अक्लिष्टा
इति॥ रागद्वेषादिक्लेशरूपा आसुरवृत्तयः क्लिष्टाः॥ रागादिरहिता
दैववृत्तयोऽक्लिष्टाः यद्यपि पंचस्वेव क्लिष्टानामपि अंतर्भावस्तथापि
क्लिष्टा एव निरोद्धव्या इति मंदबुद्धिं वारयितुं ताभिः सहाक्लिष्टा उ
दाहृताः॥ नामधेयलक्षणाभ्यां वृत्तिं विशदयितुं सूत्रषट्कमाह॥ प्र
माणविपर्ययविकल्पनिद्रास्मृतयः॥ प्रत्यक्षानुमानागमाः प्रमाणा
नि॥ विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठितं॥ शब्दज्ञानानुपाती
वस्तुशून्यो विकल्पः॥ अभावप्रत्ययालंबना वृत्तिर्निद्रा॥ अनुभूत
विषयस्यासंप्रमोषः स्मृतिरिति॥ वस्तुभावः प्रतीयते यस्मिं
स्तमस्यावरके सति तत्तमोऽभावप्रत्ययस्तमोगुणं विषयं कुर्वती
वृत्तिर्निद्रेत्युच्यते॥ अनुभूतविषयस्यासंप्रमोषस्तदनुभवजन्यम
नुसंधानं॥ पंचविधवृत्तिनिरोधसाधनसूत्रं पठति अभ्यासवै

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राग्याभ्यांतन्निरोध इति॥ यथातीव्रवेगोपेतं नदीप्रवाहं सेतुबंधनेन
निवार्य्य कुल्याप्रणयनेन क्षेत्राभिमुखं तिर्यक्प्रवाहांतरमुत्पाद्य
ते॥ तथा वैराग्येण चित्तनद्या विषयप्रवाहं निवार्य्य समाध्यभ्यासे
न प्रशांतः प्रवाहः संपाद्यते॥ मंत्रजपदेवताध्यानादीनां क्रियारू
पत्वेनावृत्तिलक्षणोभ्यासः संभाव्यते॥ सर्वव्यापारोपरमरूपस्य
समाधेः कोनामाभ्यास इति शंकां वारयितुं सूत्रयति॥ तत्र स्थितौ
यत्नोभ्यास इति॥ स्थितिर्नैश्चल्यं निरोधः यत्नो मानस उत्साहः॥
स्वत एव बहिः प्रवाहशीलं चित्तं सर्वथा निरोधयामीत्येवं वि
ध उत्साहः॥ आवर्त्यमानोभ्यास इति उच्यते॥ अयमभ्यास इदा
नीं प्रवृत्तः स्वयमदृढः सन् अनादिप्रवृत्ताव्युत्थानवासनाः कथम
भिभवेदित्याशंकामपवदितुं सूत्रयति॥ स तु दीर्घकालनैरंतर्य्य
सत्कारासेवितो दृढभूमिरिति॥ लोका हि मूढस्य वचनमुदाहरंति
॥ विद्यमानाश्चत्वार एव वेदास्तानध्येतुं गतस्य माणवकस्य पंच
दिवसा अतीता अद्याप्यसौ नागत इति॥ तादृश एवायं योगी तदा
स्याद्यदा दिवसैर्वा मासैर्वा योगसिद्धिं वांछेत् तस्मात्संवत्सरैर्जन्मभि
र्वा दीर्घकालं योग आसेवितव्यः॥ तथा च स्मर्यते॥ अनेकजन्मसं
सिद्धस्ततो याति परां गतिमिति॥ चिरमासेव्यमानोपि यदि विच्छिद्य
विच्छिद्य सेव्यते॥ तर्हि उत्पद्यमानानां योगसंस्काराणां समनंतरभा
विभिर्व्युच्छेदकालीनैर्व्युत्थानसंस्कारैरभिभवे सति खंडनकारोक्त
न्याय आपतेत्॥ अग्रे धावन् पश्चाल्लुप्यमानानो विस्मरणशील
श्रुतवत् किमालंवेतेति॥ तस्मान्निरंतरमासेवितव्यः सत्कार आदरः॥
अनादरेण सेव्यमाने वसिष्ठोक्तन्याय आपतेत्॥ अकर्तृ कुर्वदप्ये
तच्चेतश्चेत्क्षीणवासनं॥ दूरंगतमना जंतुः कथासंश्रवणे यथेति॥
अनादरो लयविक्षेपकषायसुखास्वादनानामपरिहारः॥ तस्मादा
दरेण सेवितव्यः॥ दीर्घकालादिभिस्त्रिविधेन सेवितस्य समाधेर्दृढभू
मित्वं नाम विषयसुखवासनया दुःखवासनया वा चालयितुमशक्य
त्वं॥ तच्च भगवता दर्शितं॥ यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः॥
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यत इति॥ अपरलाभस्या

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नाधिकंयंकचवृत्तांतेनवसिष्ठउदाजहारकचःकदाचिदुत्थायस
माधेःप्रीतमानसः॥एकांतेसमुवाचेदमेवंगद्गदयागिरा॥किंकरोमि
कगच्छामिकिंगृह्णामित्यजामिकिं॥आत्मनापूरितंविश्वंमहाकल्पां
बुनायथा॥सबाह्याभ्यंतरेदेहेह्यधऊर्ध्वंचदिक्षुच॥इतआत्मात
तआत्मानास्त्यनात्ममयंजगत्॥नतदस्तियदत्राहंनतदस्तिनय
न्मयि॥किमन्यदभिवांछामिसर्वंसंविन्मयंततं॥स्फारब्रह्मामलां
भोधौफेनाःसर्वेकुलाचलाः॥चिदादित्यमहातेजोमृगतृष्णाजगत्स्थि
यइति॥गुरुदुःखेनाप्यविचाल्यत्वंशिखिध्वजस्यवत्सरत्रयसमाधि
वृत्तांतेनउदाजहार॥निर्विकल्पसमाधिस्थंतत्रापश्यन्महीपतिं॥रा
जानंतावदेतस्माद्बोधयामिपरात्पदात्॥इतिसंचिंत्यचूडालासिंहना
दंचकारसा॥भूयोभूयःप्रभोरग्रेवनेचरभयप्रदं॥नचचालतदारामय
दानादेनतेनसः॥भूयोभूयःकृतेनापितदासातंव्यचालयत्॥चा
लितःपातितोप्येषतदानोबुबुधेबुधइति॥प्रल्हादवृत्तांतेनाप्ये
तदेवोदाजहार॥इतिसंचिंतयन्नेवप्रल्हादःपरवीरहा॥निर्विक
ल्पपरानंदसमाधिंसमुदाययौ॥निर्विकल्पसमाधिस्थश्चित्रार्पितइ
वाबभौ॥पंचवर्षसहस्राणिपीनांगोतिष्ठदेकदृक्॥महात्मन्प्रबु
ध्यस्वेत्येवंविष्णुरुदाहरत्॥पांचजन्यंप्रदध्मौचध्वनयन्ककुभां
गणंदिशांगणं॥महतातेनशब्देनवैष्णवप्राणजन्मना॥बभूवसं
प्रबुद्धात्मादानवेशःशनैःशनैरिति॥एवंवीतहव्यादीनामपिसमा
धिरुदाहरणीयः॥वैराग्यंद्विविधं॥अपरंपरंचेति॥यतमानव्यति
रेकैकेंद्रियवशीकारभेदैरपरंचतुर्विधं॥तत्राद्यंत्रयंअर्थात्सूत्र
यन्साक्षाच्चतुर्थंसूत्रयति॥दृष्टानुश्राविकविषयवितृष्णस्यवशी
कारसंज्ञावैराग्यमिति॥स्रक्चंदनवनितापुत्रमित्रक्षेत्रधनाद्या
दृष्टावेदोक्ताःस्वर्गाद्यअनुश्राविकाः॥तत्रोभयत्रसत्यामपितृ
ष्णायांविवेकतारतम्येनयतमानादिवैराग्यत्रयंभवति॥अस्मिञ्ज
गतिकिंसारंकिमसारमितिगुरुशास्त्राभ्यांज्ञास्यामीत्युद्योगोयतमा
नत्वं॥स्वचित्तेपूर्वंविद्यमानदोषाणांमध्येअभ्यासमानेनविवेके
नएतावंतोपक्वाःएतावंतोऽवशिष्टाइतिविवेचनंव्यतिरेकः॥दृष्टानु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आविकविषयप्रवृत्तेदुःखात्मत्वबाधेन तां प्रवृत्तिं परित्यज्य मनस
श्चौत्सुक्यमात्रेण तत्स्थापनं एकेंद्रियत्वं॥ वितृष्ण त्वं वशी॰
कारः॥ तदिदमपरं वैराग्यमष्टाङ्गयोगप्रवर्तकत्वेन संप्रज्ञातस्यां
तरंगं॥ असंप्रज्ञातस्य वहिरंगं तस्यांतरंगं परं वैराग्यं सूत्रयति॥
तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यमिति संप्रज्ञातसमाधिपाटवेन
गुणत्रयात्मकात्प्रधानाद्विविक्तस्य पुरुषस्य ख्यातिः साक्षात्कार
उत्पद्यते तस्माच्च साक्षात्कारादशेषगुणत्रयव्यवहारे वैतृष्ण्यं
यत्तत्परं वैराग्यं॥ तस्य तारतम्येन समाधेः शीघ्रत्वतारतम्यं सूत्र
यति॥ तीव्रसंवेगानामासन्नः समाधिलाभ इति॥ संवेगो वैरा
ग्यं तद्भेदात् योगिनस्त्रिविधाः॥ मृदुसंवेगा मध्यमसंवेगाः तीव्र
संवेगाश्चेति॥ आसन्नो ल्पेनैव कालेन समाधिर्लभ्यत इत्यर्थः॥
॥ तीव्रसंवेगेष्वेव समाधितारतम्यं सूत्रयति॥ मृदुमध्याधिमात्र
त्वात्ततोपि विशेष इति॥ मृदुतीव्रो मध्यतीव्रोधिमात्रतीव्र इति॥ तेष्व
प्युत्तरोत्तरस्य त्वरया सिद्धिर्द्रष्टव्या॥ उत्तमोत्तमा जनकप्रल्हादादयो
ऽधिमात्रतीव्राः॥ मुहूर्तमात्र विचारेणेन दृढसमाधिलाभात्॥ अधमा
उद्दालकादयो मृदुसंवेगाश्चिरप्रयासेन तल्लाभात् एवमन्येपि यथा
योगमुन्नेयाः तदेवमधिमात्रतीव्रस्य दृढभूमावसंप्रज्ञातसमाधौ
लब्धे सति पुनर्व्युत्थातुमशक्यं सन्मनो नश्यति मनोनाशेन वास
नाक्षये रक्षिते सति जीवन्मुक्तिः सुप्रतिष्ठिता भवति॥ न च मनोनाशे
विदेहमुक्तिरेव न तु जीवन्मुक्तिः इति शंकनीयम्॥ प्रश्नोत्तराभ्यां त
न्निर्णयात्॥ श्रीरामः॥ विवेकाभ्युदयाच्चित्तस्वरूपे तर्हि ते मुने॥ मै
त्र्यादयो गुणाः कुत्र जायंते योगिनां वद॥ वसिष्ठः॥ द्विविधश्चित्तना
शोस्ति सरूपोऽरूप एव च॥ जीवन्मुक्तौ सरूपः स्यादरूपोऽदेहमुक्ति
गः॥ प्राक्तनं गुणसंभारं ममेति बहु मन्यते॥ सुखदुःखाद्यवष्टब्धं
विद्यमानं मनो विदुः॥ चेतः संकथिता सत्ता मया रघुकुलोद्वह॥ अ
स्य नाशमिदानीं त्वं शृणु प्रश्नविदांवर॥ सुखदुःखदशा धीरं साम्या
न्न प्रोद्धरंति यं॥ निश्वासा इव शैलेंद्रं चित्तं तस्य मृतं विदुः॥ आपत्का
र्पण्यमुत्साहो मदो मांद्यं महोत्सवं॥ यं नयंति न वैरूप्यं तस्य नष्टं मनो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विदुः॥चित्तनाशाभिधानंहियदानश्यतिराघव॥मैत्र्यादिभिर्गुणैर्युक्तं
तदासत्त्वमुदेत्यलं॥भूयोजन्मविनिर्मुक्तंजीवन्मुक्तस्यतन्मनः॥स
रूपोऽसौमनोनाशोजीवन्मुक्तस्यविद्यते॥अरूपस्तुमनोनाशोयोम
योक्तोरघूद्वह॥विदेहमुक्तएवासौविद्यतेनिष्कलात्मकः॥समग्रा
ग्र्यगुणाधारमपिसत्त्वंप्रलीयते॥विदेहमुक्तावमलेपदेपरमपाव
ने॥संशांतदुःखमजडात्मकमेकरूपमानंदमंथरमपेतरजस्तमो
यत्॥आकाशकोशतनवोऽतनवोमहांतस्तस्मिन्पदेगलितदुःख
लवावसंतीति॥जीवन्मुक्तानमुह्यंतिसुखदुःखरसस्थितौ॥प्राकृ
तेनार्थकारेणकिंचित्कुर्वंतिवानवा॥तस्मात्सरूपोमनोनाशोजी
वन्मुक्तिसाधनमितिस्थितं॥ ॥इतिश्रीजीवन्मुक्तिसाधनमनोना
शप्रकरणम्॥ ॥केयंजीवन्मुक्तिःकिंवातत्रप्रमाणं॥कथंवातत्सि
द्धिरितिएतस्यप्रश्नत्रयस्योत्तरंनिरूपितम्॥सिद्धावाकिंप्रयोजन
मित्यस्यचतुर्थप्रश्नस्योत्तरंइदानीमभिधीयते॥ज्ञानरक्षातपोवि
संवादाभावदुःखनाशसुखाविर्भावाःपंचप्रयोजनानि॥ननुप्रमा
णोत्पन्नस्यतत्त्वज्ञानस्यकोनामबाधप्रसंगोयेनरक्षापेक्ष्ये तिचेदु
च्यते॥चित्तविश्रांत्यभावेसंशयविपर्ययौप्रसज्ज्येयातां॥तथाहि
तत्त्वविदोराघवस्यविश्रांतेःपूर्वंसंशयंविश्वामित्रउदाजहार॥नरा
घवतवास्त्यन्यत्ज्ञेयंज्ञानवतांवर॥स्वयैवसूक्ष्मयाबुद्ध्यासर्वंवि
ज्ञातवानसि॥भगवद्व्यासपुत्रस्यशुकस्येवमतिस्तव॥विश्रांति
मात्रमेवात्रज्ञातज्ञेयाऽप्यपेक्षतइति॥शुकस्तुस्वयमेवाद्वैततत्त्वंवि
दित्वातत्रसंशयानःपितरंपृष्ट्वापित्रातथैवानुशिष्टः॥तत्रापिसंप्रत्यया
नोजनकमुपसद्यतेनापितथैवानुशिष्टस्तंप्रत्येवमुवाच॥श्रीशु
कः॥स्वयमेवमयापूर्वमेवज्ञातंविवेकतः॥एतदेवचपृष्टेनपित्रामे
समुदाहृतं॥भवताप्येषएवार्थःकथितोवाग्विदांवर॥एषएवचवा
क्यार्थःशास्त्रेषुपरिदृश्यते॥यथायंस्वविकल्पोत्थःस्वविकल्पप
रिक्षयात्॥क्षीयतेदग्धसंसारअसारइतिनिश्चितः॥तत्किमेत
न्महाबाहोसत्यंब्रूहिममाचलं॥त्वत्तोविश्राममाप्नोतिचेतसाभ्रम
ताजगत्॥जनकः॥नातःपरतरःकश्चिन्निश्चयोऽस्त्यपरोमुने॥स्व

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यमेवंत्वयाज्ञातंगुरुतस्यपुनःश्रुतं॥अस्युच्छिन्नधियालोकःपु
मानसीहनेतरत्॥स्वसंकल्पवशाद्बद्धोनिःसंकल्पस्तुमुच्यते॥तेनत्व
यास्फुटंज्ञातंज्ञेयंसर्वस्यमहात्मनः॥भोगेभ्योविरतिर्जातादृश्याद्व
स्तकलादिह॥प्राप्तंप्राप्तव्यमखिलंभवतापूर्णचेतसा॥नदृश्येपततिब्र
ह्मन्मुक्तस्त्वंभ्रांतिमुत्सृज॥अनुशिष्टःसइत्थंवैजनकेनमहात्म
नाविशश्रामसशुकस्तूष्णींस्वस्थेपरमवस्तुनि॥वीतशोकभयाऽया
सोनिरीहश्छिन्नसंशयः॥जगामशिखरंमेरोःसमाध्यर्थमनिंदितं॥
तत्रवर्षसहस्राणिनिर्विकल्पसमाधिना॥दशस्थित्वाशशामासा
वात्मन्यस्नेहदीपव   दिति॥तस्माद्विदितेपितत्त्वेविश्रांतिरहितशु
कस्यघवयोरिवसंशयउत्पद्यते॥साचाज्ञानमिवमोक्षस्यप्रतिबंध
कः॥अतएवभगवतोक्तम्॥अज्ञश्चाश्रद्दधानश्चसंशयात्माविन
श्यति॥नायंलोकोस्तिनपरोनसुखंसंशयात्मनः॥इति॥अश्रद्धा
विपर्ययः॥सचोत्तरत्रोदाहरिष्यते॥अज्ञानविपर्ययौमोक्षमात्र
विरोधिनौ॥संशयस्तुभोगमोक्षयोरुभयोरपिविरोधी॥तस्यपरस्प
रविरुद्धकोटिद्वयावलंबित्वात्॥यदासंसारसुखायप्रवृत्तिस्तदामो
क्षमार्गबुद्धिस्तांविरुणद्धि॥यदामोक्षायप्रवृत्तिस्तदासंसारबुद्धि
स्तांप्रतिबध्नाति॥तस्मात्संशयात्मनोनकिंचित्सुखमस्तीतिमुमु
क्षुणासर्वथासंशयाश्छेत्तव्याः॥अतएवश्रूयते॥छिद्यंतेसर्वसंशया
इतिविपर्ययस्यापिनिदाघउदाहरणं॥ऋभुःपरमकरुणयानिदा
घस्यगृहमेत्यतंबहुधाबोधयित्वानिर्जगाम॥बुद्धेपितदुपदिष्टवस्तु
न्यश्रद्दधानोनिदाघःकर्मणिपरमपुरुषार्थहेतुरितिविपर्ययंप्राप्य
कर्मानुष्ठानेयथापूर्वंप्रवृत्ते तेशिष्यस्यपरमपुरुषार्थभ्रंशोमाभूदि
तिकृपयागुरुःपुनरागत्यबोधयामास॥तदापिविपर्ययंनजहौ॥
तृतीयेनतुबोधनेनविपर्ययंपरित्यज्यविश्रांतिमलभत्॥संशयविप
र्ययाभ्यामसंभावनाविपरीतभावनारूपाभ्यांतत्त्वज्ञानस्यफलंप्रति
बध्यते॥तदुक्तंपराशरेण॥मणिमंत्रौषधैर्वह्निःसुदीप्तोपियथेंध
नं॥प्रदग्धुंनैवशक्तःस्यात्प्रतिबद्धस्तथैवच॥ज्ञानाग्निरपिसंजातः
सुदीप्तःसुदृढोपिच॥प्रदग्धुंनैवशक्तःस्यात्प्रतिबद्धस्तुकल्मषम्॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भावनाविपरीतायाश्चासंभावनाश्च ॥ कुरुते प्रतिबंधं सा तत्त्वज्ञा
नस्य नापरमिति ॥ तस्माद्विश्रांतचित्तस्य संशयविपर्ययप्रसंगेन तत्त्व
ज्ञानस्य फलप्रतिबंधलक्षणात् बाधाद्रक्षापेक्ष्यते ॥ विश्रांतचित्त
स्य तु मनोनाशेन यदा जगदेव प्रविलीयते ॥ तदा संशयविपर्ययोः कः
प्रसंगः ॥ जगत्प्रतिभासरहितस्य ब्रह्मविदो देहव्यवहारो विनैव प्रय
त्नं परमेश्वरप्रेरितेन प्राणवायुना निष्पद्यते ॥ अत एव छांदोग्या आम
नंति ॥ नोपजनं स्मरन्निदं शरीरं स यथा प्रयोज्य आचरणे युक्त एवमेवा
यमस्मिञ्छरीरे प्राणो युक्त इति उप जनं जनानां समीपे वर्तमानमिदं
स्वशरीरमिति न स्मरति ॥ प्रयोज्यः ॥ रथशकटादिवहने प्रयोक्तुमर्हः
॥ शिक्षितोऽश्वबलीवर्दादिः स यथा सारथिना मार्गस्याचरणे प्रेरितः
पुनःपुनः सारथिप्रयत्नमनपेक्ष्य स्वयमेव रथशकटादिकं पुरोवर्ति
ग्रामं नयति ॥ एवमेवायं प्राणवायुः परमेश्वरेणास्मिन् शरीरे नियुक्तः
सत्यस्ति वा जीवप्रयत्ने व्यवहारं निर्वहति ॥ भागवतेपि स्मर्यते देहं
च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरू
पं ॥ दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं मदिरामदांध
इति ॥ वसिष्ठोप्याह ॥ पार्श्वस्थबोधिताः संतः पूर्वाचारक्रमागतम् ॥
आचारमाचरंत्येव सुप्तबुद्धवदुत्थिता इति ॥ सिद्धो न पश्यति आचर
माचरंति उभयोः परस्परविरोध इति चेन्न ॥ विश्रांतितारतम्येन व्य
वस्थोपपत्तेः ॥ तदेव तारतम्यमभिप्रेत्य श्रूयते ॥ आत्मक्रीड आत्मर
तिः क्रियावानेष ब्रह्मविदां वरिष्ठ इति ॥ अत्र चत्वारः प्रतीयंते ब्रह्मवि
त्प्रथमः ॥ ब्रह्मविद्वरो द्वितीयः ॥ वरीयांस्तृतीयः ॥ वरिष्ठश्चतुर्थः ॥ त
एते सप्तसु योगभूमिषु चतुर्थीं योगभूमिमारभ्य क्रमेण भूमिचतुष्टयं
प्राप्ता इत्यवगंतव्यं ॥ भूमयश्च वसिष्ठेन दर्शिताः ॥ ज्ञानभूमिः शुभे
च्छाख्या प्रथमा समुदाहृता ॥ विचारणा द्वितीया स्यात्तृतीया तनु
मानसा ॥ १ ॥ सत्त्वापत्तिश्चतुर्थी स्यात्ततोऽसंसक्तिनामिका ॥ पदार्था
भाविनी षष्ठी सप्तमी तुर्यगा स्मृता इति ॥ २ ॥ स्थितं किं मूढ एवास्मि
प्रेक्षेहं शास्त्रसज्जनैः ॥ वैराग्यपूर्वमिच्छेति शुभेच्छेत्युच्यते बुधैः ॥ ३
॥ शास्त्रसज्जनसंपर्कवैराग्याभ्यासपूर्वकं ॥ सद्विचारप्रवृत्तिर्या प्रोच्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तेसा विचारणा॥४॥विचारणाशुभेच्छाभ्यामिंद्रियार्थेष्वसक्तता॥यत्र
सा तनुतामेति प्रोच्यते तनुमानसा॥५॥भूमिकात्रितयाभ्यासाच्चित्तेर्थे
विरतेर्वशात्॥सत्वात्मनि स्थिते शुद्धे सत्वापत्तिरुदाहृता॥६॥दशाच
तुष्टयाभ्यासादसंसर्गफलातु या॥रूढसत्वचमत्कारप्रोक्ताऽसंसक्ति
नामिका॥७॥भूमिकापंचकाभ्यासात्स्वात्मारामतया भृशं॥आभ्यंतरा
णां बाह्यानां पदार्थानामभावनात्॥परप्रयुक्तेन चिरं प्रयत्नेनावबोध
नं॥पदार्थाभावनीनाम षष्ठीभवति भूमिका॥८॥भूमिषट्कचिराभ्यासा
द्भेदस्यानुपलंभनात्॥यत्स्वभावैकनिष्ठत्वं सा ज्ञेया तुर्यगा गतिरिति
॥१०॥अत्र भूमिकात्रितयं ब्रह्मविद्यायाः साधनमेव न तु विद्याकोटा
वंतर्भवति भेदसत्यत्वबुद्धेरनिवारितत्वात्॥अत एवैतज्जागरणमिति
व्यपदिश्यते॥तदुक्तम्॥भूमिकात्रितयं त्वेतद्रामजाग्रदिति स्थितम्॥
यथावद्भेदबुद्ध्येदं जगज्जाग्रति दृश्यते इति॥चतुर्थभूमौ सर्वं जग
दुपादानस्य ब्रह्मणो वास्तवमद्वितीयसत्तास्वभावं निश्चित्य ब्रह्म
ण्यारोपितयोर्जगज्जीवाभिधेययोर्नामरूपयोर्मिथ्यात्वमवगच्छति॥
मुमुक्षोः पूर्वोक्तजागरणापेक्षयेयं भूमिः स्वप्नः तदाह॥अद्वैते स्थैर्यमा
याते द्वैते च प्रशमं गते॥पश्यंति स्वप्नवल्लोकं चतुर्थीं भूमिकामिता॥
विच्छिन्नशरदभ्रांशविलयं प्रविलीयते॥स्वस्वेतरं च सन्मात्रं यस्य
बोधादुपासते॥योगिनः सर्वभूतेषु स दृष्टान्तो मितं हरिं॥सत्तावशे
षएवास्ते चतुर्थीं भूमिकामित इति॥सोयं चतुर्थीं भूमिं प्राप्तो योगी ब्र
ह्मविदित्युच्यते॥पंचम्यादयस्तिस्रो भूमयो जीवन्मुक्तेरवांतरभेदाः
॥ते च निर्विकल्पसमाध्यभ्यासबलेन विश्रांतितारतम्येन संपद्यंते
पंचमभूमौ निर्विकल्पकात्समाधेस्तदा तदा स्वयमेव व्युत्तिष्ठते॥
सोयं योगी ब्रह्मविद्वरः॥षष्ठभूमौ पार्श्वस्थैर्बोधितो व्युत्तिष्ठति॥सोयं
ब्रह्मविद्वरीयान्॥तदेतद्भूमिद्वयं सुषुप्तिर्गाढसुषुप्तिरभिधीयते
॥तदाह॥पंचमीं भूमिकामेत्य सुषुप्तिपदनामिकां॥शांताशेषांशसुषुप्ती
मांस्तिष्ठत्यद्वैतमात्रके॥अंतर्मुखतया नित्यं बहिर्वृत्तिपरोपि सन्॥प
रिश्रांततया नित्यं निद्रालुरिव लक्ष्यते॥कुर्वन्नभ्यासमेतस्यां भूमिका
यां विवासनः॥षष्ठीं गाढसुषुप्त्याख्यां क्रमात्पतति भूमिकां॥यत्र ना

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सन्नसद्रूपोनाहंनाप्यनहंकृतिः॥केवलंक्षीणमनसआस्तेद्वैतैक्य
निर्गतः॥अद्वैतंकेचिदिच्छंतिद्वैतमिच्छंतिकेचन॥समंब्रह्मनजानं
तिद्वैताद्वैतविवर्जितं॥अंतःशून्योबहिःशून्यःशून्यकुंभइवांबरे॥अं
तःपूर्णोबहिःपूर्णःपूर्णकुंभइवार्णवे॥गाढंनिर्विकल्पसमाधिंप्राप्त
स्यसंस्कारमात्रशेषस्यचित्तस्यमनोराज्यंकर्तुंबाह्यपदार्थान्ग्रही
तुंवासामर्थ्याभावादाकाशावस्थितकुंभवदंतर्बहिःशून्यत्वं॥स्व
यंप्रकाशस्यचिदानंदैकरसेब्रह्मणिनिमग्नत्वेनसमुद्रमध्यस्थापि
तपूर्णकुंभवदंतर्बहिःपूर्णत्वं॥तुरीयाभिधांसप्तमींभूमिंप्राप्तस्ययो
गिनःस्वतःपरतोवाव्युत्थानमेवनास्तीति॥ईदृशमेवोद्दिश्यदेहंवि
नश्वरमवस्थितमुत्थितंवेत्यादिभागवतवाक्यंप्रवृत्तं॥असंप्रज्ञात
समाधिप्रतिपादकानियोगशास्त्राण्यत्रैवपर्यवसितानि॥सोयमी
दृशोयोगीपूर्वोदाहृतश्रुतौब्रह्मविद्वरिष्ठइत्युच्यते॥तदेवंपार्थस्यबो
धितःसिद्धोनपश्यतीत्यनयोर्भूमिद्वयोर्व्यवस्थितत्वान्नकोपिविरोधः
॥पंचम्यादिभूमित्रयरूपायांजीवन्मुक्तौसंपाद्यमानायांद्वैतप्रतिभा
साभावेनसंशयविपर्ययप्रसंगाभावादुत्पन्नंतत्त्वज्ञानंअबाधेनर
क्षितंभवति॥सेयंज्ञानरक्षाजीवन्मुक्तेःप्रथमंप्रयोजनं॥तपोद्विती
यंप्रयोजनम्॥योगभूमीनांदेवत्वादिपदप्राप्तिहेतुत्वात्तपस्त्वंद्र
ष्टव्यं॥तद्धेतुत्वंचार्जुनभगवतोः श्रीरामवसिष्ठयोश्च प्रश्नोत्तराभ्याम
वगम्यते॥अर्जुनः॥अयतिःश्रद्धयोपेतोयोगाच्चलितमानसः॥अ
प्राप्ययोगसंसिद्धिंकांगतिंकृष्णगच्छति॥कच्चिन्नोभयविभ्रष्टश्छिन्ना
भ्रमिवनश्यति॥अप्रतिष्ठोमहाबाहोविमूढोब्रह्मणःपथि॥कृष्णउ
पार्थनैवेहनामुत्रविनाशस्तस्यविद्यते॥नहिकल्याणकृत्कश्चिद्दुर्ग
तिंतातगच्छति॥अर्जुनउवाच॥एतन्मेसंशयंकृष्णछेत्तुमर्हस्यशेष
तः॥त्वदन्यःसंशयस्यास्यछेत्तानाह्युपपद्यते॥भगवानउवाच॥
प्राप्यपुण्यकृतांलोकानुषित्वाशाश्वतीःसमाः॥शुचीनांश्रीमतांगेहे
योगभ्रष्टोभिजायते॥अथवायोगिनामेवकुलेभवतिधीमताम्॥ए
तद्धिदुर्लभतरंलोकेजन्मयदीदृशं॥तत्रतंबुद्धिसंयोगंलभतेपौर्व
देहिकं॥यततेचततोभूयःसंसिद्धौकुरुनंदनेति॥ श्रीरामः॥एका

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मथद्वितीयांवातृतीयांभूमिकामुत॥आरूढस्यमृतस्याथकीदृ
शीभगवन्गतिः॥वसिष्ठः॥योगभूमिकयोत्क्रांतजीवितस्यशरीरि
णः॥भूमिकांशानुसारेणक्षीयतेपूर्वदुष्कृतम्॥ततःसुरविमानेषु
लोकपालपुरेषुच॥मेरूपवनकुंजेषुरमतेरमणीसखः॥ततःसु
कृतसंभारेदुःकृतेचपुराकृते॥भोगक्षयपरिक्षीणेजायंतेयोगि
नोभुवि॥शुचिनांश्रीमतांगेहेगुप्तेगुणवतांसतां॥तत्रप्राक्भाव
नाभ्यस्तंयोगभूमिक्रमंबुधः॥दृष्ट्वापरितनाच्चैरुत्तमंभूमिका
क्रमंइति॥अस्त्येवंयोगभूमीनांदेवलोकप्राप्तिहेतुत्वं॥तावतात
पस्त्वंकुतइतिचेत् श्रुतेरितिब्रूमः॥तथाचतैत्तिरीया आमनंति॥
तपसादेवादेवत्तामग्रआयान्तपसार्षयःसुवरन्वविंदन्निति॥त
त्त्वज्ञानात्प्राचीनस्यभूमिकात्रयस्यतत्तपस्त्वेसतितत्त्वज्ञानस्यो
त्तरकालीनस्यनिर्विकल्पसमाधिरूपस्यपंचम्यादिभूमिकात्रय
स्यतपस्त्वंकैमुत्तिकन्यायसिद्धं॥अतएवस्मर्यते॥मनसश्चे
न्द्रियाणांचऐकाग्र्यंपरमंतपः॥तज्ज्यायःसर्वधर्मेभ्यःसधर्मःपर
उच्यतइति।यद्यप्यनेनन्यायेनतपसाप्राप्यंजन्मांतरंनास्ति॥त
थापिलोकसंग्रहार्थेदंतपउच्यते॥अतएवभगवानाह॥लोकसंग्र
हमेवापिसंपश्यन्कर्तुमर्हसीति॥संग्राह्यश्चलोकस्त्रिविधः॥शि
ष्योभक्तस्तटस्थश्चेति॥तत्रशिष्यस्तांतर्मुखेयोगिनिगुरौप्रा
माणिकबुध्यातिशयेनतदुपदिष्टेतत्त्वेपरमंविश्वासंप्राप्यचित्तं
सहसाविश्राम्यति॥अतएवश्रूयते॥यस्यदेवेपराभक्तिर्यथा
देवेतथागुरौ॥तस्यैतेकथिताह्यर्थाः प्रकाशंतेमहात्मनइति॥
स्मर्यतेच॥श्रद्धावान्लभतेज्ञानंतत्परःसंयतेंद्रियः॥ज्ञानंलब्ध्वा
परांशांतिमचिरेणाधिगच्छतिइति।अन्नप्रदाननिवासस्थानक
ल्पनादिनायोगिनंसेवमानोभक्तस्तदीयंतपःस्वयमादत्ते॥तथा
चश्रूयते॥तस्यपुत्रादायमुपयंति॥सुहृदःसाधुकृत्यांद्विषंतः
पापकृत्यामिति॥तटस्थोपिद्विविधः॥आस्तिकोनास्तिकश्चेति
तत्रास्तिकोयोगिनःसन्मार्गाचरणंदृष्ट्वास्वयमपिसन्मार्गेप्रवर्त्त
ते॥तथाचस्मृतिः॥यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः॥सय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्प्रमाणंकुरुतेलोकस्तदनुवर्त्तते इति॥नास्तिकोपियोगिनादृष्टः
पापान्मुच्यते।तदुक्तं।यस्यानुभवपर्यंतातत्त्वेबुद्धिःप्रवर्त्तते॥तद्दृष्टि
गोचराःसर्वेमुच्यंतेसर्वपातकैरिति॥अनेनप्रकारेणसर्वप्राण्यु
पकारित्वंविवक्षित्वाप्युच्यते॥स्नानंतेनसमस्ततीर्थसलिलेसर्वा
पिदत्ताऽवनिर्यज्ञानांचसहस्रमिष्टमखिलादेवाश्चसंपूजिताः॥सं
साराच्चसमुद्धृताःस्वपितरस्त्रैलोक्यपूज्योप्यसौयस्यब्रह्मविचार
णक्षणमपिस्थैर्यंमनःप्राप्नुयात्॥कुलंपवित्रंजननीकृतार्थाविश्वं
भरापुण्यवतीचतेन॥अपारसंवित्सुखसागरेस्मिँल्लीनंपरेब्रह्म
णियस्यचेतइति॥नकेवलंयोगिनःशास्त्रीयव्यवहारस्यैवतपस्त्वं
किंतुसर्वस्यैवलौकिकव्यवहारस्यापि॥तथाचतैत्तिरीयाःस्वशा
खायामामनंतियेनानुवाकेनविदुषोपिमहिमानमामनंति॥तस्मिं
श्चानुवाकेपूर्वभागेयोगिनोवश्यवाद्यत्वांगद्रव्यत्वेनाम्नाताः॥तस्यैवं
विदुषोयज्ञस्यात्मायजमानःश्रद्धापत्नीशरीरमिध्ममुरोवेदिर्लो
मानिबर्हिर्वेदःशिखाहृदयंयूपःकामआज्यंमन्युःपशुस्तपोग्निः
दमःशमयितादक्षिणावाग्घोताप्राणउद्गाताचक्षुरध्वर्युर्मनो
ब्रह्माश्रोत्रमग्नीध्रः इति॥अत्रचदानंदक्षिणेतिपदमध्याहा
र्यं॥अथयत्तपोदानमार्जवमहिंसासत्यवचनमितिचास्यदक्षि
णेति छांदोगैराम्नातत्वात् उक्तानुवाकेमध्यभागेनयोगिव्यवहार
स्तज्जीवनकालाश्चज्योतिष्टोमावयवक्रियारूपत्वेनोत्तरसर्वयज्ञा
वयवक्रियारूपत्वेनचाम्नाताः॥यावद्ध्रियते सादीक्षायदश्नाति।
तद्धविर्यत्पिबतितदस्यसोमपानमितियद्रमतेतदुपसदोयत्संच
रत्युपविशत्युत्तिष्ठतेचसप्रवर्ग्योयन्मुखंतदाहवनीयःयाव्याहृ
तिराहुतिर्यदस्यविज्ञानंतज्जुहोतियत्सायंप्रातरत्तितत्समिधं यत्प्रा
तर्मध्यंदिनंसायंचतानिसवनानिये अहोरात्रेतेदर्शपूर्णमासौयेअ
र्द्धमासाश्चमासाश्चतेचातुर्मास्यानियऋतवस्तेपशुबंधा येसंवत्सरा
श्चपरिवत्सराश्चतेहर्गणाःसर्ववेदसंवाएतत्सत्रंयन्मरणंतदव
भृतइति॰ सर्ववेदसंसर्वदक्षिणाकं॥अनेनानुवाकेनमरणांताहोरात्रा
दिपरिवत्सरांतंसर्वकालसमष्ट्युपलक्षितं॥योगिन आयुर्विवक्षते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यदामुत्तत्सर्वस्वदक्षिणोपेतंसत्रमित्यर्थः॥उत्तरएनुवाकेचरम
भागेनसर्वयज्ञात्मकंयोगिनमुपासीतस्यक्रममुक्तिरूपंसूर्याचं
द्रमसोःकार्यकारणब्रह्मणोस्तादात्म्यलक्षणंफलमाम्नायते॥ए
तद्वैजरामर्यमग्निहोत्रंसत्रंयएवंविद्वानुदगयनेप्रमीयतेदे
वानामेवमहिमानंगत्वादित्यस्यसायुज्यंसलोकतांगच्छति॥अ
थयोदक्षिणेप्रमीयतेपितॄणामेवमहिमानंगत्वाचन्द्रमसःसायु
ज्यंसलोकतामाप्नोति॥एतौवैसूर्याचंद्रमसोर्महिमानौब्राह्मणो
विद्वानभिजयतितस्माद्ब्रह्मणोमहिमानमाप्नोतितस्माद्ब्रह्मणोम
हिमानमित्युपनिषदिति॥जरामरणावधिकंयद्योगिचरितमस्ति
तद्वेदोक्ताग्निहोत्रसंवत्सरसत्रांतंकर्मस्वरूपमित्येवमुपासीनो
भावनातिशयेनसूर्याचंद्रमसोःसायुज्यंतादात्म्यमाप्नोतिभावना
मांद्येनसमानलोकंप्राप्यतस्मिन्लोकेसूर्यचंद्रमसोर्विभूतिमनुभूय
ततऊर्ध्वंसत्यलोकेचतुर्मुखस्यब्रह्मणोमहिमानमाप्नोति॥तत्रोत्प
न्नतत्त्वज्ञानस्ततऊर्ध्वंसत्यज्ञानानंदस्वरूपस्यब्रह्मणोमहिमानंकै
वल्यंप्राप्नोतिइत्युपनिषदित्यनेनयथोक्तविद्यायास्तत्प्रतिपादक
ग्रंथस्यचोपसंहारःक्रियते॥तदेवंजीवन्मुक्तेस्तपोरूपंद्वितीयंप्रयो
जनंसिद्धम्॥विसंवादाभावास्तस्याःतृतीयंप्रयोजनम्॥नखल्वंत
र्मुखेवाह्यव्यवहारमपश्यतियोगीश्वरेलौकिकस्तैर्थिकोवाक
श्चिद्विसंवदतेविसंवादोद्विविधः॥कलहरूपोनिंदारूपश्च॥तत्र
क्रोधादिरहितेनयोगिनासहकथंनामलौकिकःकलहायते॥ष
तद्वाद्विसंचस्मर्यते॥क्रुध्यंतंनप्रतिक्रुध्येदाक्रुष्टःकुशलंवदेत्
॥अतिवादांस्तितिक्षेतनावमन्येतकंचनेति॥ननुजीवन्मुक्तेःप्राची
नोविद्वत्संन्यासस्ततःप्राचीनंतत्त्वज्ञानंतस्मादपिप्राचीनोविविदि
षासंन्यासःतत्रैतेक्रोधादिराहिंसादयोधर्म्माःअत्रकथंस्मृताइ
तिचेत्॥बाढम्॥अतएवजीवन्मुक्तस्यक्रोधादयोप्रांकिंतुप्रशक्याः
अस्त्यर्वाचीनेपदेविविदिषासंन्यासेयथाक्रोधादयोनसंतितथोत्त
मपदेतत्त्वज्ञानेकुतस्तेस्युः॥कुतस्तरांचविद्वत्संन्यासेकुतस्तमांच
जीवन्मुक्तौअतोयोगिनासहनलौकिकस्यकलहःसम्भवति॥ना

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पिनिन्दारूपोविसंवादः प्रांकनीयोनिंद्यस्यानिश्चितत्वात्॥तथाच
स्मर्यते॥यन्नसंतंनचासंतंनाश्रुतंनबहुश्रुतम्॥नसुवृत्तंनदुर्वृत्तं
वेदकश्चित्सवैयतिरिति॥सदसत्वेउत्तमाधमज्ञातीत्ति॥तै र्थिको
पिकिंशास्त्रप्रमेयेविसंवदते किंवायोगिचरिते॥आद्येनतावद्यो
गीपरशास्त्रप्रमेयंदूषयति॥तमेवैकंजानथआत्मानमन्यावाचो
विमुंचथानानुध्यायात्॥बहूनशब्दान्वाचोविग्लपनंहितदित्या
दिश्रुत्यनुरोधात्॥नापिस्वशास्त्रप्रमेयंप्रतिवादिनोग्रेसमर्थय
ते॥पलालमिवधान्यार्थीसजेद्ग्रंथमशेषतः॥परंब्रह्मविज्ञाय
उल्कावत्तान्यथोत्सृजेदित्यादिश्रुत्यर्थपरत्वात्॥यदाप्रतिवादि
नमपिस्वात्मतयावीक्षते॥तदाविजिगीषायांकाकथा॥नापिलो
कायतिकव्यतिरिक्तःसर्वोपितैर्थिकोमोक्षमंगीकुर्वन्॥योगिच
रितेपिविसंवदितुमर्हतीति॥आर्हतकापालबौद्धवैशेषिकनै
यायिकशैववैष्णवशाक्तसांख्ययोगादिमोक्षशास्त्रेषुप्रतिपाद्य
प्रमेयस्यनानाविधत्वेपिमोक्षसाधनस्ययमनियमाद्यष्टांगयो
गस्यैकविधत्वात्॥तस्मादविसंवादेनसर्वसंमतोयोगीश्वरः ए
तदेवाभिप्रेत्यवसिष्ठआह॥यस्येदंजन्मपाश्चात्यंतमश्वेवमहाम
ते॥विशंतिविद्याविमलामुक्तावेणुमिवोत्तमं॥आर्यताहृद्यतामै
त्रीसौम्यतामुक्तताज्ञता॥समाश्रयंतितंनित्यमंतःपुरमिवांगनाः
॥पेशलाचारमधुरंसर्वेवांछंतितंजनाः॥वेणुमधुरनिध्वानंवने
वनमृगाइव॥सुषुप्तवत्स्वशमितभाववृत्तिनास्थितः सदाजाग्र
तियेनचेतसा॥कलान्वितोविधुरिवयःसदाबुधैर्निषेव्यतेमुक्त
इतीहसंस्मृतइति॥मातरीवशमंयांतिविषमाणिमृदूनिच॥विश्वा
समिहभूता निसर्वाणिशमशालिनि॥तपस्विषुबहुज्ञेषुयाज
केषुनृपेषुच॥बलवत्सुगुणाढ्येषुशमवानेवराजतइति॥त
देवमबाधंजीवन्मुक्तेविसंवादाभावरूपंतृतीयंप्रयोजनंसिद्धं
॥दुःखनाशसुखाविर्भावरूपेचतुर्थपंचमेप्रयोजनविद्यानंदना
मकेब्रह्मानंदगतेचतुर्थ्याध्यायेनिरूपिते॥ ॥तदुभयमत्रसंक्षि
प्योच्यते॥आत्मानंचेद्विजानीयादयमस्मीतिपूरुषः॥किमिच्छन्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कस्यकामायशरीरमनुसंज्वरेदित्यादिश्रुत्यादुःखस्यैहि कस्य
विनाशउक्तः॥एतंहवावनतपति किमहंसाधुनाकरवंकिमहंपा
पमकरवमित्यादिश्रुतयः॥आमुष्मिकहेतुपुण्यपापचिंतारूप
स्यदुःखस्यनाशमाहुः॥सुखाविर्भावस्त्रेधा॥सर्वकामावाप्तिः
कृतकृत्यत्वं॥प्राप्तप्राप्तव्यंचेति॥सर्वकामावाप्तिस्त्रेधा॥सर्वसा
क्षित्वं॥सर्वत्राकामहतत्वंसर्वभोक्तृरूपत्वंचेति।हिरण्यगर्भादि
स्थावरांतेषुदेहेष्वनुगतंसाक्षिचैतन्यरूपंयत्ब्रह्मतदेवाह
मस्मीतिजानतःस्वदेहइवपरदेहेष्वपिकामसाक्षित्वमस्ति॥त
देतदभिप्रेत्यश्रूयते॥सोश्नुतेसर्वान्कामान्सहब्रह्मणाविपश्चिते
ति॥लोकेमुक्तेषुभोगेषुअकामहतत्वंयत्कामप्राप्तिरित्युच्यतेत
थाचसर्व भोगदोषदर्शिनस्तत्वविदः सर्वत्राकामहतत्वाद
प्तिसर्वकामावाप्तिः॥अतएवसार्वभौमोपक्रमेषुहिरण्यगर्भपर्य
तेषुउत्तरोत्तरशतगुणेष्वानन्देषु श्रोत्रियस्यचाकामहतस्येतिश्रु
तं।सद्रूपेणचिद्रूपेणानंदरूपेणसर्वत्र चावस्थितंस्वात्मानमनुसं
दधतःसर्वभोक्तृरूपत्वमस्ती त्यभिप्रेत्यैवंश्रूयते॥अहमन्नमहम
न्नमहमन्नं॥अहमन्नादोहमन्नादोहमन्नादइति॥कृतकृत्य
त्वंतुस्मर्यते॥ज्ञानामृतेनतृप्तस्यकृतकृत्यस्ययोगिनः॥नैवास्ति
किंचित्कर्तव्यमस्तिचेन्नसतत्ववित्॥यस्त्वात्मरतिरेवस्यादात्म
तृप्तश्चमानवः॥आत्मन्येवचसंतुष्टस्तस्यकार्यंनविद्यतेइति॥प्र
ाप्तप्राप्यताश्रूयते॥अभयंवैजनकप्राप्तोसीति॥तस्मात्तत्सर्वमभ
वदिति॥ब्रह्मवेदब्रह्मैवभवतीतिच॥नचैतौदुःखविनाशसुखा
विर्भावौतत्वज्ञानेनैवसिद्धत्वान्नजीवन्मुक्तिप्रयोजनतामर्हतः॥
नैवंसुरक्षितयोस्तयोरत्रविवक्षितत्वात्॥यथातत्वज्ञानपूर्वमेवो
त्पन्नमपिजीवन्मुक्त्यासुरक्षितंभवति॥एवमेतावपिसुरक्षितौभ
वतः॥नन्वेवंजीवन्मुक्तेःपंचप्रयोजनत्वेसतिसमाहितोयोगीश्व
रोलोकव्यवहारंकुर्वतस्तत्वविदोपिश्रेष्ठइतिवक्तव्यम्॥तत्ररा
मवसिष्ठयोःप्रश्नोत्तराभ्यांनिर्णीतं॥ श्रीरामः॥भगवन्भूतभव्ये
शकश्चिज्ज्ञातसमाधिकः॥प्रबुद्धइवविश्रांतोव्यवहारपरोपिसन्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥कश्चिदेकांतमाश्रित्य समाधिनियमे स्थितः॥ तयोरेकतरः श्रेया
निति मे भगवन्वद॥ वसिष्ठः॥ इमं गुणसमाहारमनात्मत्वेन पश्यतः
॥अंतःशीतलता यासौ समाधिरिति कथ्यते॥ दृश्यैर्न मम संबंध इ
ति निश्चित्य शीतलः॥ कश्चित्संव्यवहारस्थः कश्चित्ध्यानपरायणः
॥द्वावेतौ परमसुखदावंतश्चेत्परिशीतलौ॥ अंतःशीतलता यास्या
त्तदनंततपःफलमिति॥ नैष दोषः॥ अत्र वासनाक्षयरूपं अंतः
शीतलत्वं अवश्यं संपादनीयमित्येतावदेव प्रतिपद्यते॥ न तु तदं
तर्भाविनो मनोनाशस्य श्रेष्ठत्वं निवार्यते॥ शीतलत्वं तृष्णायाः प्रश
मनमित्येतादृशीं विवक्षां स्वयमेव स्पष्टीचकार॥ अंतःशीतलता
यां तु लब्धायां शीतलं जगत्॥ अंतस्तृष्णोपतप्तानां दावदाहमयं ज
ग दिति॥ ननु समाधिनिंदा व्यवहारप्रशंसा चात्रोपलभ्यते॥ समा
धिस्थानकस्यस्य चेतश्चेद्वृत्तिचंचलं॥ तत्तस्य तु समाधानं सममुन्म
त्ततांडवैः॥ उन्मत्ततांडवस्थस्य चेतश्चेत्क्षीणवासनं॥ तत्तस्योन्म
त्तनृत्यं तु समं ब्रह्मसमाधिनेति मैवम्॥ अत्र हि समाधिप्राशस्त्य
मेवांगीकृत्य वासना निंद्यते॥ इयमत्र वचनव्यक्तिः यद्यपि व्यवहा
रात्समाधिः प्रशस्तस्तथाप्यसौ सवासनश्चेत्तदा निर्वासनात्व्य
वहारादधम एवेति॥ यदा समाहितव्यवहर्तारावुभावपि अतत्त्व
ज्ञौ सवासनौ चेत्तदा समाधेरुत्तमलोकप्राप्तिहेतुपुण्यत्वेन प्राश
स्त्यं॥ यदा तूभौ ज्ञाननिष्ठौ निर्वासनौ च॥ तदापि वासनाक्षयरूपं जी
वन्मुक्तिं परिपालयन्नयं मनोनाशरूपः समाधिः प्रशस्त एव॥ तस्मा
द्योगीश्वरस्य श्रेष्ठत्वात्पंचप्रयोजनोपेताय जीवन्मुक्तेर्न्न कोपि विघ्न
इति सिद्धम्॥ ॥इति जीवन्मुक्तिप्रकरणं स्वरूपप्रमाणसाधनप्रयो
जनैर्जीवन्मुक्तिर्निरूपिता॥ ॥अथ तदुपकारिणं विद्वत्संन्यासं नि
रूपयामः॥ विद्वत्संन्यासश्च परमहंसोपनिषदि प्रतिपादितः॥ तां चो
पनिषदमनूद्य व्याख्यास्यामः॥ तत्रादौ विद्वत्संन्यासयोग्यं प्रश्नमव
तारयति॥ अथ योगिनां परमहंसानां कोयं मार्गस्तेषां का स्थितिरिति
नारदो भगवंतमुपगत्योवाचेति॥ यद्यप्यथशब्दापेक्षितआनंतर्यं
प्रतियोगी न कोप्यत्र प्रतिभाति॥ तथापि प्रष्टव्योत्र विद्वत्संन्यासः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥अस्मिंश्चविदिततत्त्वोलोकव्यवहारैर्विक्षिप्यमाणोमनोविश्रां-
तिंकामयमानोधिकारिलतस्ताहगधिकारसंपत्त्यानंतर्यमथश-
ब्दार्थः॥केवलयोगिनंकेवलपरमहंसंचवारयितुंपदद्वयमुक्तम्॥
केवलयोगीतत्त्वज्ञानाभावेनत्रिकालज्ञानाकाशगमनादिषुयो-
गैश्वर्यचमत्कारेष्वासक्तःसंयमविशेषैस्तत्रोपयुक्तेततःपरमपु-
रुषार्थाद्भ्रष्टोभवति॥अस्मिन्नर्थेसूत्रम्॥पूर्वमेवोदाहृतम्॥तेस-
माधावुपसर्गाव्युत्थानेसिद्धयइति॥केवलपरमहंसस्तुतत्त्ववि-
वेकेनैश्वर्येअसारतांबुध्वाविरज्यति॥तदप्युदाहृतं॥चिदात्मन
इमाइत्थंप्रस्फुरंतीहशक्तयः॥इत्यस्याश्चर्यजालेषुनाभ्युदेतिकुतू-
हलमिति॥विरक्तोप्यसौब्रह्मविद्याभरेणविधिनिषेधावुल्लंघयति
॥तदुक्तम्॥निस्त्रैगुण्येपथिविचरतांकोविधिःकोनिषेधइति॥
तथाचभ्रष्टालवःशिष्टास्तमेवंनिंदंति॥सर्वेब्रह्मवदिष्यंतिसंप्राप्ते
तुकलौयुगे॥नानुतिष्ठंतिमैत्रेयशिश्नोदरपरायणा इति॥योगिनि
तुपरमहंसेयथोक्तंदोषद्वयंनास्ति॥अन्योप्यस्यातिशयःश्रोत-
राभ्यांदर्शितः॥ श्रीरामः॥एवंस्थितेपिभगवन्जीवन्मुक्तस्यसन्म-
ते॥अपूर्वोतिशयःकोसौभवत्यात्मविदांवर॥ वसिष्ठः॥ज्ञस्यक-
स्मिंश्चिदेवांगभवत्यतिशयेनधीः।नित्यतृप्तःप्रशांतात्मासआ-
त्मन्येवतिष्ठति॥मंत्रसिद्धैस्तपःसिद्धैस्तंत्रसिद्धैश्चभूरिशः॥कृत
माकाशयानादितत्रकास्यादपूर्वता॥एकएवविशेषोस्यनसमो
मूढबुद्धिभिः॥सर्वत्रास्थापरित्यागान्नीरागममलंमनः॥एताव
देवखलुलिंगमलिंगमूर्तेःसंशांतसंसृतिचिरभ्रमनिर्वृतस्य॥
तज्ज्ञस्ययन्मदनकोपविषादमोहलोभापदामनुदिनंनिपुणंत-
नुत्वमित्यनेनातिशयेनोपेतानांदोषद्वयरहितानांमार्गस्थितिरी-
क्ष्यते॥वेषभाषादिरूपोहिव्यवहारेमार्गःचित्तोपरमरूपआंत-
रोधर्मःस्थितिः॥भगवांश्चतुर्मुखोब्रह्मायथोक्तंप्रश्नोत्तरमवतार-
यति॥तंभगवानाहेतिवक्ष्यमाणमार्गश्रेष्ठ्यातिशयमुत्पादयितु
मार्गंप्रशंसति॥सोयंपरमहंसानांमार्गोलोकेदुर्लभतरोनतुबा-
हुल्यमिति॥यःएषःसोयमितियोजना॥अयमित्युत्तरग्रंथेचव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ह्यमाण आच्छादनादिस्वशरीरोपभोगेन लोकोपकारेण च निरपेक्षो
मुख्यो मार्गः परामृश्यते। तादृशस्य परमकाष्ठां प्राप्तस्य वैराग्यस्यातिदु
श्चरत्वात्तस्य मार्गस्य दुर्लभत्वं। न चैतावतात्यंताभावः शंकनीय
इत्यभिप्रेत्य बाहुल्यमेव प्रतिषेधति न तु बाहुल्येन इति वक्तव्ये लिं
गव्यत्ययश्छांदसः॥ अयं मार्गो दुर्लभतरश्चेत्तर्हि तदर्थं प्रयासो न क
र्तव्यः॥ तेन प्रयोजनाभावादित्याशंक्याह॥ यद्येकोपि भवति स एव
नित्यपूतस्थः स एव वेदपुरुष इति विदुषो मन्यंत इति॥ मनुष्याणां स
हस्रेषु कश्चिद्यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मां वेत्ति त
त्वतः॥ इति न्यायेन यत्र क्वापि यदा कदाचिद्योगी परमहंसो यदि क
श्चिल्लभ्यते॥ तर्हि स एव नित्यपूतस्थो भवति॥ नित्यपूतः परमात्मा॥
य आत्मा अपहतपाप्मेति श्रुतेः॥ एवकारेण केवलयोगी केवलपर
महंसश्च व्यावर्त्यते॥ केवलयोगी नित्यपूतं जानाति॥ केवलपरमहं
सो जानन्नपि चित्तविश्रांत्यभावाद्बहिर्मुखो ब्रह्मणि न तिष्ठति०॥
वेदप्रतिपाद्यः पुरुषो वेदपुरुषः॥ विदुषो विद्वांसो ब्रह्मानुभवचित्त
विश्रांतिप्रतिपादकशास्त्रपरंगताः योगिनः परमहंसस्य ब्रह्मनि
ष्ठत्वं सर्वज्ञतां मन्यंते॥ यथोक्तविद्वांसस्तु तदप्यसहमाना ब्रह्मत्व
मेव मन्यंते॥ तथा च स्मर्यते॥ दर्शनादर्शनो हित्वा स्वयं केवलरूप
तः॥ यस्तिष्ठति स तु ब्रह्मन्ब्रह्म न ब्रह्मवित्स्वयमिति॥ अतो न प्रयोजना
भावः प्रां किंतु मपि प्राक्यते॥ नित्यपूतस्थत्वं वेदपुरुषत्वं च मुख्यतो
विषयद्वयं त्वर्थात्कास्थितिरिति प्रश्नोत्तरं स्पष्टयति॥ महापुरुषोय
च्चितं तत्सर्वदा मय्येवावतिष्ठते॥ तस्मादहं च तस्मिन्नेवावस्थीयत
इति॥ वैदिकज्ञानकर्माधिकारिषु पुरुषेषु मध्ये योगिनः परमहंस
स्यात्यंतमुत्तमत्वान्महापुरुषत्वम्॥ स तु महापुरुषो यच्चितं स्वकीयं
तत्सदा मय्येवावस्थापयति॥ संसारगोचराणां तदीयचित्तवृत्तीनां
अभ्यासवैराग्याभ्यां निरुद्धत्वात् अत एव भगवान्प्रजापतिः शा
स्त्रसिद्धं परमात्मानं स्वानुभवेन परामृशन्मयीति व्यपदिशति॥
यस्माद्योगी मय्येव चित्तं स्थापयति तस्मादहमपि परमात्मस्वरू
पत्वेन तस्मिन्नेव योगिन्याविर्भूतो वस्थितोस्मि॥ नेतरेषु ज्ञानि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षुतेषामविद्याहतत्वात्॥ तत्वविस्त्वपि अयोगिषु वाह्यचित्तवृ-
त्तिभिरहतत्वान्नास्त्याविर्भावः॥ इदानीं कोयं मार्ग इति पृष्टं मार्ग
मुपदिशति॥ असौ स्वपुत्रमित्रकलत्रबंध्वादीन् शिखायज्ञोप
वीते स्वाध्यायं च सर्वकर्माणि संन्यस्यायं ब्रह्मांडं च हित्वा कौपीन
दंडमाच्छादनं च स्वशरीरोपभोगार्थाय च लोकस्योपकारार्थाय च
परिग्रहेदिति॥ योग्रहस्थः पूर्वजन्मसंचितपुण्यपुंजे परिपक्वे सति
मातृपितृज्ञात्यादिना निमित्तेन विविदिषासंन्यासरूपं परमहंसा-
श्रममस्वीकृत्यैव श्रवणादिसाधनान्यनुष्ठाय तत्वं सम्यगवगच्छ-
ति॥ ततो गार्हस्थ्यमार्गे लौकिकवैदिकव्यवहारसहस्रैश्चित्ते
विक्षिप्ते सति विश्रांतिसिद्ध्यै विद्वत्संन्यासं चिकीर्षति॥ तं प्रति
स्वपुत्रमित्रइत्याद्युपदेशः॥ पूर्वमेव विविदिषासंन्यासं कृत्वा तत्वं
विदितवतो विद्वत्संन्यासं चिकीर्षोः कलत्रपुत्रादिप्रसंगाभावात्
॥ नन्वयं विद्वत्संन्यासः किमितरसंन्यासवत्प्रैषोच्चारणादिवि-
ध्युक्तप्रकारेण संपादनीयः॥ किं वाजीर्णवस्त्रसोपद्रवग्रामत्याग
वल्लौकिकत्यागमात्ररूपः॥ नाद्यः॥ तत्वविदः कर्तृत्वराहित्येन
विधिनिषेधानधिकारात्॥ अत एव स्मर्यते ज्ञानामृतेन तृप्त-
स्य कृतकृत्यस्य योगिनः॥ नैवास्ति किंचित्कर्तव्यमस्ति चेन्न स
तत्ववित्॥ न द्वितीयः॥ कौपीनदंडाद्याश्रमलिंगविधानश्रव-
णात्॥ नैष दोषः॥ प्रतिपत्तिकर्मवदुभयरूपत्वोपपत्तेः॥ ज्यो-
तिष्टोमे दीक्षितस्य दीक्षांगनियमानुष्ठानकाले कंडूयितुं हस्तं
प्रतिषिध्य कृष्णविषाणा विहिता यद्धस्तेन कंडूयेत पामनं-
भावुकाः प्रजाः स्युरिति यस्मयेत नग्नंभावुका इति कृष्णविषा-
णया कंडूयत इति च तस्याश्च कृष्णविषाणायाः समाप्ते नियमे
प्रयोजनाभावाद्वोढुमशक्यत्वाच्च त्यागः स्वत एव प्राप्तः तं च सां
गं सप्रकारं वेदो विदधाति॥ नीतासु दक्षिणासु चात्वाले कृष्ण
विषाणां प्रास्यति॥ तदिदं प्रतिपत्तिकर्म लौकिकं वैदिकं चे-
त्युभयरूपं॥ एवं विद्वत्संन्यासोप्युभयरूपः॥ न च तत्वविदि
कर्तृत्वस्यात्यंताभावः शंकनीयः चिदात्मन्यारोपितस्य कर्तृत्व

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यविद्ययाऽपोहितत्वेपिचिच्छायोपेतेंतःकरणोपाधौविक्षि
प्तसहस्रमुक्तेस्वतःसिद्धस्यकर्तृत्वस्ययावद्द्रव्यभावितया
अनपोहितत्वात्।नचज्ञानमृतेनेत्यादिस्मृतिविरोधःसत्यपि
ज्ञानेविश्रांतिरहितस्यतत्त्वाभावेनविश्रांतिसंपादनलक्षणक
र्तव्यशेषसद्भावेनकृतकृत्यताऽभावात्।नतुतत्त्वविदोविध्यंगीका
रेसतितेनापूर्वेणदेहांतरमारभेत्।मैवम्।तस्यापूर्वस्यचित्तवि
श्रांतिप्रतिबंधवारणरूपदृष्टफलस्यसंभवेसतिअदृष्टफलक
ल्पनायाऽन्याय्यत्वात्।अन्यथाश्रवणादिविधिष्वपिब्रह्मज्ञानो
त्पत्तिप्रतिबंध निवारणरूपंदृष्टफलमुपेक्ष्यजन्मांतरहेतुत्वं
कल्प्येत।तस्माद्विध्यंगीकारेदोषाभावाद्विविदिषुरिवविद्वानपिगृ
हस्थोनांदीश्राद्धोपवासजागरणादिविधिमनुसृत्यैवसंन्य
सेत्।यद्यप्यत्रश्राद्धादिकंनोपदिष्टंतथाप्यस्यविद्वत्संन्यास
स्यविविदिषासंन्यासविकृतित्वात्।प्रकृतिवद्विकृतिःकर्तव्येति
न्यायेनतदीयाधर्माःसर्वेप्यत्रप्राप्नुवंति।यथाग्निष्टोमस्यवि
कृतिष्वतिरात्रादिषुतदीयधर्मप्राप्तिस्तद्वत्।तस्मादितरसंन्या
सवदत्रापिप्रैषमंत्रेणपुत्रमित्रादित्यागंसंकल्पयेत्।बंध्वादी
नित्यादिशब्देनभृत्यपशुगृहक्षेत्रादिलौकिकपरिग्रहादिवि
शेषाःसंगृह्यंते।स्वाध्यायंचेतिचकारेणतदर्थनिर्णयोपयुक्ता
निपदवाक्यप्रमाणशास्त्राणिवेदोपबृंहकाणिइतिहासपुराणा
निसमुच्चिनोति।औत्सुक्यनिवृत्तिमात्रप्रयोजनानांकाव्यनाटका
दीनांत्यागःकैमुतिकन्यायसिद्धः।सर्वकर्माणीतिसर्वशब्देनलौ
किकवैदिकनित्यनैमित्तिकनिषिद्धकाम्यानिसंगृह्यंते।पुत्रादित्या
गेनैहिकभोगःपरिहृतः।सर्वकर्मत्यागेनचामुष्मिकभोगाशावित्त
विक्षेपकारिणीपरिहृता।अयमितिछांदसविभक्तिव्यत्ययेनेदंब्र
ह्मांडमितियोजनीयं।ब्रह्मांडत्यागोनामतत्प्राप्तिहेतोर्विराडुपासन
स्यत्यागः।ब्रह्मांडंचेतिचकारेणसूत्रात्मप्राप्तिहेतोर्हिरण्यगर्भोपा
सनस्यतत्त्वज्ञानहेतूनांश्रवणादीनांचसमुच्चयः।स्वपुत्रादिहिर
ण्यगर्भोपासनांतमैहिकामुष्मिकंचसर्वमेषमात्रोच्चारणेनपरित्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्यकौपीनादिकं परिगृह्णीयात्॥आच्छादनं चेतिचकारेण पादुका
दीनि समुच्चिनोति॥तथा च स्मृतिः॥कौपीनयुगलं वासः कंथा शीत
निवारणी॥पादुके चापि गृह्णीयात् कुर्यान्नान्यस्य संग्रहमिति॥स्व
शरीरभोगो नाम कौपीनेन लज्जा व्याहृतिः॥दंडेन गो सर्पाद्युप
द्रवपरिहारः आच्छादनेन शीतादिपरिहारः॥चकारः पादुकाभ्यां उच्छि
ष्टदेशस्पर्शादिपरिहारं समुच्चिनोति॥लोकस्योपकारो नाम दंडादि
लिंगेनैनं दीयमुत्तमाश्रमं परिज्ञाय तदुचिताभिवंदनभिक्षाप्रदाना
दिप्रवृत्त्या सुकृतसिद्धिः॥चकाराभ्यामाश्रममर्यादायाः शिष्टाचार
प्राप्तायाः पालनं समुच्चिनोति॥कौपीनादिपरिग्रहस्यानुकूल्यत्व
मभिप्रेत्य मुख्यत्वं प्रतिषेधति॥तच्च न मुख्योस्तीति॥यत्कौपीनादि
परिग्रहणमस्ति तदन्यस्य योगिनः॥परमहंसस्य मुख्यः कस्मान्न भव
ति॥किंत्वनुकल्प एव॥विविदिषासंन्यासिनस्तु दंडग्रहणं मुख्यमि
ति कृत्वा दंडवियोगस्य निषेधः स्मर्यते॥दंडात्मनोस्तु संयोगः सर्व
दैव विधीयते॥न दंडेन विना गच्छेदिषुक्षेपत्रयं बुध इति॥प्रायश्चि
त्तमपि दंडनाशे प्राणायामशतं स्मर्यते॥दंडत्यागे शतं चरेदिति॥यो
गिनः परमहंसस्य मुख्यं कल्पं मन्त्राक्षराभ्यां दर्शयति॥कोयं मुख्य इति
चेदयं मुख्यो न दंडं न शिखां न यज्ञोपवीतं नाच्छादनं चरति परमहं
स इति॥न शिखमिति च्छांदसो लिंगव्यत्ययोनुसंधेयः॥यथा विविदि
षुः परमहंसः शिखायज्ञोपवीताभ्यां रहितो मुख्यस्तथा योगी दंडा
च्छादनाभ्यां रहितः सन्मुख्यो भवति॥दंडस्य वैणवत्वादिलक्षणं आ
च्छादनस्य कंथात्वादिलक्षणं च परीक्षितुं दंडादिकं संपादयितुं र
क्षितुं च चित्ते व्याप्रियमाणे सति चित्तवृत्तिनिरोधलक्षणो योगो न सिध्ये
दिति तच्च न युक्तं॥न हि वरविघातायकन्योद्वाह इति न्यायात्॥
आच्छादनाद्यभावे शीतादिबाधायाः कः प्रतीकार इत्याशंक्याह
॥न शीतं न चोष्णं न दुःखं न सुखं न मानावमाने च षड्ऊर्मिवर्जमिति
निरुद्धाशेषचित्तवृत्तेर्योगिनः शीतं नास्ति॥तत्प्रतीत्यभावात्
॥यथा लीलाकामासक्तस्य बालस्य आच्छादनादिरहितस्य हेमंत
शिशिरयोः प्रातःकाले शीतं नास्ति तथा परमात्मनि आसक्तस्य यो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गिनःशीताभावः॥घर्म्मकालेऽष्णाभावश्चतथैवावगंतव्यः॥वर्षा
भावस्समुच्चयार्थश्चकारः॥शीतोष्णयोरप्रतीतौतज्जन्ययोःसुख
दुःखयोरभावउपपन्नः॥निदाघे शीतंसुखजनकंहेमंतेदुःखजा
नकंउक्तविपर्ययउष्णेद्रष्टव्यः॥मानःपुरुषांतरेणसंपादितःस
त्कारः॥अवमानःतिरस्कारः॥यदायोगिनःस्वात्मव्यतिरिक्तंपुरुषां
तरमेवनप्रतीयते॥तदामानावमानौदूरापेतौ॥चकारःशत्रु
मित्ररागद्वेषादिद्वंद्वाभावंसमुच्चिनोति॥षडूर्मयःक्षुत्पिपासेशो
कमोहौजरामरणमेवच॥तेषांत्रयाणांद्वंद्वानांक्रमेणमनोदेहध
र्मत्वादात्मतत्त्वाभिसुखस्ययोगिनस्तद्वर्जनंनविरुध्यते॥ननुअ
स्त्वेवंसमाध्यवस्थायांशीताद्यभावः॥व्युत्थानदशायांतुनिंदाक्ले
शाःसंसारिणमिवैनंबाधेतेवेत्याशंक्याह॥निंदागर्वमत्सरदंभदर्पे
च्छाद्वेषसुखदुःखकामक्रोधलोभमोहहर्षासूयाहंकारादींश्चहि
त्वेति॥विरोधिभिःपुरुषैःस्वस्मिन्नापादितादोषोक्तिर्निन्दा॥अन्ये
भ्योधिकोहंचित्तवृत्तिर्गर्वः॥विद्याधनादिभिःअन्यसदृशोभवामी
तिबुद्धिर्मत्सरः॥परेषामग्रेजपध्यानादिप्रकटनंदंभः॥भर्त्सनादिषु
दृढबुद्धिर्दर्पः॥धनाद्यभिलाषइच्छा॥शत्रुवधादिषुबुद्धिर्द्वेषः॥
अनुकूलद्रव्यादिलाभेनबुद्धिस्वास्थ्यंसुखं॥तद्विपर्ययो दुःखम्
योषिताद्यभिलाषःकामः॥कामितार्थविधानजन्योबुद्धिक्षोभःक्रोधः
॥लब्धस्यधनस्यत्यागासहिष्णुत्वंलोभःहितेषुहितबुद्धिरहितेषु
हितबुद्धिर्मोहः॥चित्तगतसुखाभिव्यंजिकामुखविकासादिहे
तुर्धीवृत्तिर्हर्षः॥परकीयगुणेषुदोषत्वारोपणमसूया॥देहेंद्रिया
दिसंघातेष्वात्मभ्रमोहंकारः॥आदिशब्देनभोग्यवस्तुषुममकारस
मीचीनत्वादिबुद्धयोगृह्यंते॥चकारोपयोक्तनिंदादिविपरीतंस्तु
त्यादिकंसमुच्चिनोति॥एतान्सर्वान्निंदादीन्हित्वापूर्वोक्तवासनाक्ष
याभ्यासेनपरिव्रज्यावतिष्ठेतेतिशेषः॥ननुविद्यमानेस्वदेहेतत्प
रित्यागोनसंभवतीत्याशंक्याह॥स्ववपुःकुणपमिवदृश्यतेयतस्त
द्वपुरपध्वस्तंइति॥पूर्वंयत्स्वकीयंवपुःतदिदानींयोगिनास्वा
त्मचैतन्यात्पृथक्भूतत्वेनकुणपमिवावलोक्यते॥यथाश्रद्धा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्सुःस्पर्शनभीत्याश्वदेहं दूरे स्थितोऽव लोकयति॥ तथाऽयंयोगी तादात्म्यभ्रांत्युदयभीत्यासावधानो देहं चिदात्मनःसकाशान्निरंतरं विविनक्ति॥ यतःकारणात्तद्गुर्वाचार्योपदेशागमानुभवैरपध्वस्तं चिदात्मनःसकाशान्निराकृतं ततश्चैतन्यविमुक्तस्य देहस्य शवतुल्यतयादृश्यमानत्वात्सत्यपिचैतन्ये देहे निंदादिस्यागोघटतइत्यभिप्रायः॥ ननुउत्पन्नो दिग्भ्रमःसूर्योदयदर्शनेन विनष्टोपियथाकदाचिदनुवर्त्तते॥ तथाचिदात्मनि देहात्मत्वसंशयाद्यनुवृत्तौ निंदादिक्लेशः पुनःपुनःप्रसज्येतेत्याशंक्याह ॥संशयविपरीतमिथ्याज्ञानानांयोहेतुस्तेन नित्यनिवृत्त इति॥ आत्माकर्तृत्वादिधर्मोपेतस्तद्रहितोवेत्यादिकंसंशयज्ञानं॥ देहादिरूपएवआत्मेतिविपरीतज्ञानंएतदुभयंभोक्तृविषयं॥ मिथ्याज्ञानंतुभोग्यविषयमत्र विवक्षितं॥ तच्चानेकविधंसंकल्पप्रभवान्कामानित्यत्रस्पष्टीकृतं॥ तद्धेतुश्चतुर्विधः॥ अनित्याशुचिदुःखानात्मसुनित्यशुचिसुखात्मख्यातिरविद्येति सूत्रणात्॥ अनित्येगिरिनदीसमुद्रादौ नित्यत्वभ्रां तिरेका अशुचौपुत्रभार्यादिशरीरेशुचित्वभ्रांतिर्द्वितीया॥ दुःखे कृषिवाणिज्यादौसुखत्वभ्रांतिस्तृतीया॥ गौणमिथ्यात्मनि पुत्रभार्यादौ अन्नमयादिके अनात्मनिमुख्यात्मभ्रांतिश्चतुर्थी॥ एतेषांसंशयादीनांहेतुरद्वितीयब्रह्मतत्त्वावरकमज्ञानंतद्वासनाच॥ तच्चाज्ञानंयोगिनःपरमहंसस्यमहावाक्यार्थवोधेननिवृत्तं॥ वासनातुयोगाभ्यासेननिवृत्ता॥ ऊदाहृतायांदिग्भ्रांतावज्ञाने निवृत्तेपि वासनायाःसद्भावाद्यथापूर्वंभ्रांतिव्यवहारः॥ योगिनस्तुभ्रांतिहेतुद्वयएहि स्यात्॥ कुतःसंशयादीन्यनुवर्तेरन्॥ तमेवमनुवृत्त्यभावमभिप्रेत्यतेन हेतुद्वयेनयोगीनित्यनिवृत्तइत्युक्तम्॥ सत्यामपिअज्ञानतद्वासनानिवृत्तेःउत्पत्तौतस्याःनिवृत्तेर्विनाशाभावान्नित्यत्वंद्रष्टव्यम्॥ तन्नित्यत्वेहेतुमाह॥ तन्नित्यवोध इति॥ सर्वनामत्वात्प्रसिद्धार्थवाचीतच्छब्दोत्रसर्ववेदांतप्रसिद्धं परमात्मानमाचष्टे॥ तस्मिन्परमात्मनियोबोधोमस्ययोगिनःसोयंतन्नित्यवोधः॥ योगीहितमेवधीरोवि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञायप्रज्ञांकुर्वीतेतिश्रुतिमनुसृत्यचित्तविक्षेपान्योगेनपरिहृत्य
नैरंतर्येणपरमात्मविषयामेवप्रज्ञांकरोति॥अतोबोधस्यनित्य
त्वात्बोधविनाश्ययोरज्ञानतद्वासनयोर्निवृत्तिर्नित्येत्यर्थः॥बुध्यमा
नस्यपरमात्मनस्तार्किकेश्वरवत्तटस्थत्वशंकांवारयति॥तत्त्वमे
वावस्थितिरिति॥यदिदंतद्वेद्यंपरंब्रह्मास्तितत्त्वमेवनतुस्वस्मा
दन्यदित्येवंनिश्चितस्ययोगिनोवस्थितिर्भवति॥तस्ययोगिनोब्रह्मानु
भवप्रकारंदर्शयति॥तंशांतमचलमद्वयानंदंविज्ञानघनएवा
स्मितदेवममपरमंधामेति॥तमित्यादिपदत्रयेद्वितीयाप्रथमा
र्थेद्रष्टव्या॥यःपरमात्माशांतःक्रोधादिविक्षेपरहितः॥अचलःग
मनादिक्रियारहितः॥स्वगतसजातीयविजातीयद्वैतशून्यःसच्चिदा
नंदैकरसोस्तिसएवाहमस्मितदेवब्रह्मतत्त्वंममयोगिनःपरमंधा
मवास्तवस्वरूपं॥नत्वेतत्कर्तृत्वभोक्तृत्वादियुक्तं॥एतस्यमायाक
ल्पितत्वात्॥नन्वात्मनःपरब्रह्मत्वेआनंदावाप्तिरिदानींकुतोनेत्यत्रा
नंदावाप्तिःसदृष्टांतमुक्ताऽभियुक्तैः॥गवांसर्पिःशरीरस्थंनकरोत्यं
गपोषणं॥तदेवकर्मरचितंपुनस्तस्यैवभेषजम्॥१॥एवंसर्वशरीर
स्थःसर्पिवत्परमेश्वरः॥विनाचोपासनांदेवोनकरोतिहितंनृणां
॥२॥यदियोगिनःपूर्वाश्रमप्रसिद्धाआचार्यपितृभ्रात्रादयःकर्मिणःब्र
ह्मजडाःशिखायज्ञोपवीतसंध्यावंदनराहित्येनपाषंडत्वमारोप्य
व्यामोहयेयुस्तदाव्यामोहनिवृत्तयेयोगिनोवर्तमानंनिश्चयंदर्श
यति॥तदेवशिखाच॥तदेवोपवीतंचपरमात्मात्मनोरेकत्वज्ञानेन
तयोर्भेदएवविभग्नःसासंध्येतियदिदंतद्वेद्यंपरब्रह्मणोज्ञानं
तदेवकर्मांगभूतबाह्यशिखायज्ञोपवीतस्थानीयं॥अन्येचमंत्रद्र
व्यलक्षणेकर्मांगभूतेचकारात्समुच्चीयते॥शिखाद्यंगसाध्यैःक
र्मभिरुत्पन्नंयत्स्वर्गादिसुखंतत्सर्वंब्रह्मज्ञानेनैवलभ्यते॥वि
षयानंदस्यसर्वस्यब्रह्मानंदलेशत्वात्॥एतस्यैवानंदस्यान्यानि
भूतानिमात्रामुपजीवंतीतिश्रुतेः॥एतदेवाभिप्रेत्याथर्वणिकाब्रह्मो
पनिषद्यामनंति॥सशिखंवपनंकृत्वाबहिःसूत्रंत्यजेद्बुधः॥यद
क्षरंपरंब्रह्मतत्सूत्रमितिधारयेत्॥सूचनात्सूत्रमित्याहुःसूत्रं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नामपरंपदम्॥तत्सूत्रंविदितंयेनसविप्रोवेदपारगः॥येनसर्वमि
दंप्रोतंसूत्रेमणिगणाइव॥तत्सूत्रंधारयेद्योगीयोगवित्तत्त्वदर्शि
वान्॥बहिःसूत्रंसजेद्विद्वान्योगमुत्तममाश्रितः॥ब्रह्मभावमिदं
सूत्रंधारयेद्यःसचेतनः॥धारणात्तस्यसूत्रस्यनोच्छिष्टोनाशुचिर्भ
वेत्॥सूत्रमंतर्गतंयेषांज्ञानयज्ञोपवीतिनां॥तेवैसूत्रविदोलोके
तेचयज्ञोपवीतिनः॥ज्ञानशिखिनोज्ञाननिष्ठाज्ञानयज्ञोपवीतिनः
॥ज्ञानमेवपरंतेषांपवित्रंज्ञानमुच्यते॥अग्नेरिवशिखानान्यायस्य
ज्ञानमयीशिखा॥सशिखीत्युच्यतेविद्वान्नेतरेकेशधारिणः॥कर्म
ण्यधिकृतायेतुवैदिकेब्राह्मणादयः॥तैर्धार्यमिदंसूत्रंकर्मांगं
तद्धिवैस्मृतं॥शिखाज्ञानमयीयस्योपवीतंचापितन्मयं॥ब्राह्मण्यं
सकलंतस्यइतिब्रह्मविदोविदुः॥इदंयज्ञोपवीतंचपरमंयत्परा
यणं॥विद्वान्यज्ञोपवीतीस्यात्तज्ज्ञास्तंयज्विनंविदुरिति॥तस्माद्योगि
नःशिखायज्ञोपवीतेविद्येते॥तस्यैवसंध्यापिविद्यते॥यःशास्त्र
गम्यःपरमात्माप्रत्यक्षादहंप्रत्ययगम्योजीवात्मातयोरेकत्वज्ञानेनम
हावाक्यजन्येनभ्रांतिप्रतीतोभेदोविशेषेणभग्नएवपुनर्भ्रांत्यनु
दयोभंगस्यविशेषः॥येयमेकत्वबुद्धिःसेयमुभयोरात्मनोःसंधौ
जायमानत्वात्संध्योच्यते॥अहोरात्रयोःसंधावनुष्ठेयाक्रियायथा
संध्यातद्वत्॥एवंचसतियोगीब्रह्मजडैर्नैवव्यामोहयितुंशक्यः॥
कोयंमार्गइतिमत्वासौस्वपुत्रेत्यादिनोत्तरस्वकंकास्यतिरिक्ते
तस्यमहापुरुषइत्यादिनासंक्षिप्योत्तरमुक्तासंशयविपरीतेत्या
दिनातदेवप्रपंच्येदानीमुपसंहरति॥सर्वान्कामान्परित्यज्याऽ
द्वैतेपरमास्थितिरिति॥क्रोधलोभादीनांकामपूर्वकत्वात्का
मपरित्यागेनचित्तदोषाःसर्वेपरित्यज्यंते॥तदेवाभिप्रेत्यवाजस
नेयिभिराम्नातं॥अथोखल्वाहुःकाममयएवायंपुरुषइति॥अ
तोनिष्कामस्ययोगिचित्तस्याद्वैतेनिर्विघ्नास्थितिरुपपद्यते॥ननु
दंडग्रहणविधिवासनोपेताःविविदिषासंन्यासिनोयोगिनंदंड
रहितंपरमहंसंनाभ्युपगच्छंतीत्याशंक्याह॥ज्ञानदंडोधृतोयेन
एकदंडीसउच्यते॥काष्ठदंडोधृतोयेनसर्वाशीज्ञानवर्जितः॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यातिनरकान्घोरान्महारौरवसंज्ञितान्॥तितिक्षाज्ञानवैराग्यश
मादिगुणवर्जितः॥भिक्षामात्रेणयोजीवेत्सपापीयतिवृत्तिहा॥इद
मंतरंज्ञात्वासपरमहंसस्ययोयमेकदंडःसद्विविधःज्ञानदंडःका
ष्ठदंडश्चेतियथात्रिदंडिनोवाग्दंडमनोदंडकायदंडश्चेतित्रैविध्यं
तद्वत्॥वाग्दंडादयोमनुनास्मर्यंते॥वाग्दंडोथमनोदंडःकर्मदंड
स्तथैवच॥यस्यैतेनियताबुद्धौसत्रिदंडीतिचोच्यते॥त्रिदंड
मेतन्निक्षिप्यसर्वभूतेषुमानवः॥कामक्रोधौतुसंयम्यततःसि
द्धिंनिगच्छतीति॥तेषांस्वरूपंदक्षःस्मरति॥वाग्दंडोथमनोदंडःक
र्मदंडस्तथैवच॥यस्यैतेनियतादंडास्त्रिदंडीतिसउच्यते॥वाग्दं
डेमौनमातिष्ठेत्कर्मदंडेत्वनीहतां॥मानसस्यतुदंडस्यप्राणाया
मोविधीयतेति॥कर्मदंडोल्पभोजनमितिस्मृत्यंतरपाठः॥ईदृशं
त्रिदंडित्वंपरमहंसस्याप्यस्ति॥तदेतदभिप्रेत्यपितामहःस्मर
ति॥यतिःपरमहंसस्तुतुर्याख्यःश्रुतिचोदितः॥यमैश्चनियमै
र्युक्तोविष्णुरूपीत्रिदंडभृदिति॥एवंसतिमौनादीनांवागादिदम
नहेतुत्वाद्यथादंडत्वंतथैवाज्ञानतत्कार्यदमनहेतोर्ज्ञानस्यदंड
त्वं॥अयंज्ञानदंडोयेनपरमहंसेनधृतःसएवमुख्यएकदंडी॥
त्युच्यते॥मानसस्यज्ञानदंडस्यकदाचित्चित्तविक्षेपेणविस्मृतिः
प्रसज्येतेतितन्निवारणार्थंस्मारकःकाष्ठदंडोध्रियते॥तदेत॥
च्छास्त्रार्थरहस्यमबुध्वावेषमात्रेणपुरुषार्थसिद्धिमभिप्रेत्यका
ष्ठदंडोयेनपरमहंसेनधृतः सपुरुषोबहुविधसंतापोपेतत्वा
त् घोरान्महारौरवसंज्ञितान्नरकानाप्नोति॥तत्रहेतुरुच्यते॥
परमहंसवेषंदृष्ट्वाज्ञानित्वभ्रांत्यासर्वेजनाःस्वस्वगृहेभोजयंति
तं॥स्वयंचजिह्वालंपटोवर्ज्यावर्ज्यविवेकमकृत्वासर्वमन्नम॥
श्नातितेनप्रत्यवायंप्राप्नोति अज्ञानीयानितुनान्नदोषेणम॥
स्करीति॥चातुर्वर्ण्यंचरेद्भैक्ष्यंइत्यादिस्मृतिवचनानिज्ञानिवि
षयाणि अयंचज्ञानवर्जितइतिमुख्योस्यनरकः अतएवज्ञानही
नस्ययतेर्भिक्षानियममाह॥ मनुः ॥नचोत्पातनिमित्ताभ्यांनन
क्षत्रांगविद्यया॥नानुशासनवादाभ्यांभिक्षांलिप्सेतकर्हिचित्॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

।।एककालंचरेद्भैक्ष्यंनप्रसज्जेतविस्तरे।।भैक्ष्येप्रसक्तोहियतिर्वि
षयेष्वपिसज्जति इति।।ज्ञानाभ्यासिनंप्रतितुएवंस्मर्यते।।एक
वारंद्विवारंवाभुंजीतपरहंसकः।।येनकेनप्रकारेणज्ञानाभ्यासो
भवेत्सदेति।।एवंचसतिज्ञानदंडकाष्ठदंडयोर्यदंतरंतत्तमत्वाध
मत्वरूपंतदिदमवगत्यउत्तमंज्ञानदंडंयोधारयति।।सएवमुख्यः
परमहंसइत्यभ्युपगंतव्यः।।नन्वस्त्वभिज्ञस्यपरमहंसस्यज्ञानदंड
माभूत्काष्ठदंडनिर्बंधःइतरानुचर्य्यासर्वाकीदृशीत्याशंक्याह०।।
आशांबरेननमस्कारोनस्वधाकारोननिंदानस्तुतिर्यादृच्छिकोभवे
द्भिक्षुर्नावाहनंनविसर्जनंनमंत्रंनध्यानंनोपासीतंवानलक्ष्यंनपृ
थक्नापृथगहंनत्वंनसर्वंचानिकेतस्थितिरेवसभिक्षुःसौवर्णादी
नांनैवपरिग्रहेतन्नलोकंनावलोकंचेति।।आशादिशःताएवांबरंव
स्त्रमाच्छादनंयस्यासावाशांबरः।।यत्तुस्मृतिवचनं।।जानोरूर्ध्वम
धोनाभेःपरिधायैकमंबरं।।द्वितीयमुत्तरंवासःपरिधायगृहान
टेदिति।।तदिदमयोगिविषयम् अतएवपूर्वंतत्त्वंनमुख्योस्तीत्यु
क्तं।।यद्यपिस्यात्संतरं।।योभवेत्पूर्वसन्यासीतुल्योवैधर्मतोयदि।।
तस्मैप्रणामःकर्त्तव्योनेतरायकदाचनेति।।तस्याप्ययोगिविषयत्वा
त्नास्यनमस्कारःकर्त्तव्योस्ति।।अतएवब्राह्मणलक्षणेनिर्नमस्का
रमस्तुतिमित्युदाहृतं।।गयाप्रयागादिषुब्रह्मज्ञाउपप्राप्तस्वधा
निषिध्यतेपूर्वत्रनिंदागर्वेत्यादिवाक्येनपरस्कृत तथास्वनिंद्याज्ञे
यो निवारितःअत्रतुस्वकर्तृकेअन्यविषयेनिंदास्तुतिर्निषिध्यते
।।यादृच्छिकत्वंनिर्बंधराहित्यं।।नकचिदपिव्यवहारेनिर्बंधंकुर्यात्
।।यस्तुदेवपूजायांनिर्बंधःस्मर्यते।।भिक्षाटनंजपःशौचंस्नानंध्या
नंसुरार्च्चनं।।कर्त्तव्यानिषडेतानिसर्वथानृपदंडवदिति।।तस्या
प्ययोगिविषयत्वमभिप्रेत्यनावाहनमित्याम्नातं।।सकृत्स्मरणंध्या
नं।।नैरंतर्येणानुस्मरणमुपासनमितितयोर्भेदः।।यथायोगिनस्तु
तिनिंदादिलौकिकव्यवहाराभावःयथावादेवपूजादिधर्मशास्त्र
व्यवहाराभावःतथालक्ष्यत्वालक्ष्यत्वादिज्ञानशास्त्रव्यवहारोपि
नास्ति।।यत्साक्षिचैतन्यमस्तितदिदंतत्त्वमसीतिवाक्येत्वंपदेनल

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्ष्यं देहादिविशिष्टं चैतन्यं लक्ष्यं न भवति॥ किंतु वाच्यम्॥ त्वं वाच्यं
त्वंपदार्थात् पृथक् लक्ष्यत्वं पृथक् स्वदेहनिष्ठो वाच्योऽर्थोऽहमिति व्य
वहारार्थः॥ परदेहनिष्ठस्त्वमिति व्यवहारार्हः लक्ष्यं वाच्यमित्युभय
विधचैतन्योपेतमन्यज्जडं जगत्सर्वमिति॥ व्यवहारार्हमित्ये
तादृशो विकल्पो न कोपि योगिनोस्ति तदीयचित्तस्य ब्रह्मणि विश्रां
तत्वात्॥ अत एव स भिक्षुरनिकेतस्थितिरेव॥ यदि नियतनिवासा
र्थं कंचिन्मठं संपादयेत् तदानीं तस्मिन्ममत्वे सति तदीयहानिवृ
द्धी चिंतं विक्षिप्येत॥ तदेवाभिप्रेत्य गौडपादाचार्या आहुः॥ निस्तु
तिर्निर्नमस्कारो निःस्वधाकार एव च॥ चलाचलनिकेतश्च यतिर्या
दृच्छिको भवेदिति॥ यथा मठो न परिग्रहीतव्यः॥ तथा सौवर्णरज
तादीनां भिक्षा चमनादिपात्राणामेकमपि न गृह्णीयात् तदाह
यमः॥ हिरण्मयानि पात्राणि कृष्णायसमयानि च॥ यतीनां तान्यपा
त्राणि वर्जयेत्तानि भिक्षुक इति॥ मनुरपि॥ अतैजसानि पात्राणि
तस्य स्युर्निर्व्रणानि च॥ तेषां मृद्भिः स्मृतं शौचं चमसानामिवाध्वरे॥
अलाबुदारुपात्रं वा मृन्मयं वैणवं तथा॥ एतानि यतिपात्राणि मनुः
स्वायंभुवोऽब्रवीदिति॥ बौधायनोपि॥ स्वयमाहृतपर्णेषु स्वयं शी
र्णेषु वा पुनः॥ भुंजीत न वटाश्वत्थकरंजानां च पर्णके॥ आपद्यपि
न कांस्येषु मलाशी कांस्यभोजनः॥ सौवर्णे राजते ताम्रे मृण्मये त्रपु
सीसयोरिति॥ तथा लोकंजनं शिष्यवर्गं न गृह्णीयात्॥ तदाह मनुः
॥ एक एव चरेन्नित्यं सिद्ध्यर्थमसहायकः॥ सिद्धिमेकस्य पश्यन्
हि तज्जहाति न हीयत इति॥ मेधातिथिरपि॥ आसनं पात्रलोप
श्च संचयः शिष्यसंग्रहः॥ दिवास्वापो वृथालापो यतेर्बंधकराणि
षट्॥ एकाहात्परतो ग्रामे पंचाहात्परतः पुरे॥ वर्षाभ्योन्यत्र यत्स्था
नमासनं तदुदाहृतम्॥ उक्तालाब्वादिपात्राणामेकस्यापि न संग्रहः॥
भिक्षोर्भैक्ष्यभुजश्चापि पात्रलोपः स उच्यते॥ गृहीतस्य तु दंडादेर्द्वितीय
स्य परिग्रहः॥ कालांतरोपभोगार्थं संचयः परिकीर्तितः॥ शुश्रूषालाभ
पूजार्थं यशोर्थं वा परिग्रहः॥ शिष्याणां न तु कारुण्यात्स ज्ञेयः शिष्यसं
ग्रहः॥ विद्या दिनं प्रकाशत्वादविद्या रात्रिरुच्यते॥ विद्याभ्यासे प्रमा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्व्यः स दिवास्वाप उच्यते॥ आध्यात्मिकां कथां मुक्त्वा भैक्षचर्यां सुरस्तु-
तिं॥ अनुग्रहं पथि प्रश्नं वृथालापः स उच्यते॥ लोकं शिष्यजनरूपं न
गृह्णीयादिति तावदेव न भवति॥ किंतु तस्य लोकस्यावलोकं दर्शनम
पि न कुर्यात्॥ तस्य बंधहेतुत्वात्॥ न चेत्यनेनान्यदपि स्मृतिनिषि
द्धं न कुर्या— दित्यभिमतं॥ तत्र निषिद्धं मेधातिथिर्दर्शयति॥ स्थाव
रं जंगमं बीजं तैजसं विषमायुधं॥ षडेतानि न गृह्णीयाद्यतिर्मूत्रपुरी
षवत्॥ रसायनं क्रियावादं ज्योतिषं क्रयविक्रयम्॥ विविधानि च शि
ल्पानि वर्जयेत्परदारवत् इति॥ योगिनो लौकिकवैदिकव्यवहार
गतानि बाधकानि यानि संति तेषां वर्जनमभिहितं अथ प्रश्नोत्तराभ्यां
असंतबाधकं प्रदर्श्य तद्वर्जनमाह॥ आबाधकः क इति चेत्॥ आ
बाधको स्त्येव॥ यस्माद्भिक्षुर्हिरण्यं रसेन दृष्टं चेत्स ब्रह्महा भवेत्॥
यस्माद्भिक्षुर्हिरण्यं रसेन स्पृष्टं चेत्स पौल्कसो भवेत्॥ यस्माद्भिक्षुर्हि
रण्यं रसेन ग्राह्यं चेत्स आत्महा भवेत्॥ तस्माद्भिक्षुर्हिरण्यं रसेन न दृ
ष्टं न स्पृष्टं च न ग्राह्यं चेति॥ आकारो भिव्याप्त्यर्थः॥ आङीषदर्थेभिव्या
प्तावित्यभिहितत्वात्॥ आबाधको स्त्यंतबाधकः तस्य सद्भावं प्रतिज्ञा
य हिरण्यस्य तथाविधबाधकत्वमुच्यते रसेनाभिलाषयुक्तेनादरेण
हिरण्यं यदि दृष्टं स्यात्तदानीं स द्रष्टा भिक्षुर्ब्रह्महा भवेत्॥ हिरण्यास
क्त्या तत्संपादनरक्षणयोः सर्वदा प्रयतमानस्य द्वैपथ्यपरिहारा
य प्रपंचमिथ्यात्वप्रतिपादकान्वेदांतान्दूषयित्वा तत्सत्त्वमव
लंबते॥ ततः शास्त्रसिद्धमद्वितीयं ब्रह्म तेन भिक्षुणा हतमिव भवति
तस्माद्सौ ब्रह्महा भवेत्॥ तथा च स्मर्यते॥ ब्रह्म नास्तीति यो ब्रूया
त् द्वेष्टि ब्रह्मविदं च यः॥ अभूतब्रह्मवादी च त्रयस्ते ब्रह्मघातका इति
॥ ब्रह्महा स तु विज्ञेयः सर्वधर्मबहिष्कृतः॥ अभिलाषपूर्वकं [illegible]ण्यं
स्पृष्टं चेत् तदा तत्स्पृष्टा भिक्षुः पतितत्वात्पौल्कसो म्लेच्छसदृशः॥ भ
वेत्॥ पातित्यं च स्मर्यते॥ पतत्यसौ ध्रुवं भिक्षुर्यस्य भिक्षोर्द्वयं भवे
त्॥ धीपूर्वं रेतउत्सर्गो द्रव्यसंग्रह एव चेति॥ अभिलाषपुरःसरं हि
रण्यं न ग्राह्यं गृहीतं चेत्तदा स भिक्षुर्देहेंद्रियादिसाक्षिणमसंगं चि
दात्मानं हतवान्भवेत्॥ असंगत्वमपोह्य स्वात्मनो हिरण्यादि द्रव्यं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रतिभोक्तृत्वेनप्रतिपन्नत्वात्॥तस्याश्चान्यथाप्रतिपत्तेःसर्वपापरूप
त्वंस्मर्यते॥योन्यथासंतमात्मानंयोन्यथाप्रतिपद्यते॥किंतेननकृ
तंपापंचोरेणात्मापहारिणेति॥किंचात्मघातिनःसुखलेशेनापिर
हिताबहुविधदुःखेनावृताःलोकाःश्रूयंते॥असूर्यानामतेलो॥
काअंधेनतमसावृताः॥तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोज
नाइति॥दृष्टंचेत्यनेनचकारेणश्रुतंचेतिसमुच्चीयते॥स्पृष्टंचेत्यने
नकथितंचेतिसमुच्चयः॥ग्राह्यंचेत्यनेनव्यवहृतंचेतिसमुच्चयः॥
दर्शनस्पर्शनग्रहणवदभिलाषपूर्वकाहिरण्यवृत्तांतश्रवणतद्गुण
कथनतदीयक्रयादिव्यवहारा अपिप्रत्यवायहेतवइत्यर्थः॥य
स्मात्साभिलाषहिरण्यदर्शनादयोदोषकारिणस्तस्माद्भिक्षुणाहि
रण्यदर्शनादयोवर्जनीयाइत्यर्थः॥हिरण्यवर्जनस्यफलमाहस
र्वकामामनोगताःव्यावर्ततेदुःखेनोद्विग्नःसुखेनिस्पृहस्त्यागेरा
गेसर्वत्रशुभाशुभयोरनभिस्नेहोनद्वेष्टि॥नमोदतेचसर्वेषामिंद्रि
याणांगतिरुपरमतेयआत्मन्येवावस्थीयतइति॥पुत्रभार्यागृह
क्षेत्रादिकामानांसर्वेषांहिरण्यमूलत्वाद्धिरण्येपरित्यक्तेसतितेका
मामनोगताःमनस्यवस्यानाद्याः वर्तंते॥व्यावृत्ताभवंति॥कामनि
वृत्तौसत्यांकर्मप्राप्तयोर्दुःखसुखयोरुद्वेगस्पृहेनभवतःएतच्च॥
स्थितप्रज्ञप्रस्तावेप्रपंचितं॥ऐहिकयोःसुखदुःखयोरधिक्षेपक
त्वेसत्यामुष्मिकविषयरागेपिरागोभवति॥ऐहिकसुखस्पृहा॥
युक्तोहितदृष्टांतेनानुमितेआमुष्मिकेसुखेरागवान्भवति॥तस्मा
दैहिकेनिस्पृहस्यामुष्मिकेरागाभावोयुज्यते॥एवंसतिसर्वत्र॥
लोकद्वयेपियौशुभाशुभावनुकूलप्रतिकूलविषयौतयोरनभि
स्नेहःएतच्चद्वेषराहित्यस्याप्युपलक्षणम्॥तादृशोविद्वानशु
भकारिणंकंचिदपिपुरुषंनद्वेष्टि॥शुभकारिणिचमोदंनप्रा॥
प्नोति॥द्वेषमोदरहितोयःपुमानात्मन्येवसर्वदावतिष्ठते ॥६
तस्यसर्वेषामिंद्रियाणांगतिःप्रवृत्तिरुपरमते॥इंद्रियोपरतौ
नकदाचिदपिनिर्विकल्पकसमाधेर्विघ्नोभवति॥तेषांकास्थि
तिरितिप्रश्नस्यसंक्षेपविस्तराभ्यांउत्तरंपूर्वमुक्तम्॥तदेवात्रपु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्नरपि हिरण्यनिधेधर्मसंगेनस्पष्टीकृतं॥ अथविद्वत्संन्यासमुप संहरति॥ यस्तूर्णानंदैकबोधस्तद्ब्रह्माहमस्मीतिकृतकृत्योभवतीति॥ यत्तुब्रह्मवेदांतेपूर्णानंदैकबोधःपरमात्मेतिनिरूपितं॥ तद्ब्रह्माहमस्मीत्येवंसर्वदानुभवन्न यंयोगीपरमहंसःकृतकृत्योभवतीति॥ तथाचस्मर्यते॥ ज्ञानामृतेनतृप्तस्यकृतकृत्यस्ययोगिनः॥ नैवास्तिकिंचित्कर्तव्यमस्तिचेन्नसतत्त्वविदिति॥ जीवन्मुक्तिविवेकेनबंधंहार्दंनिवारयन्॥ पुमर्थमखिलंदेयाद्विद्यातीर्थमहेश्वरः॥ ॥ॐ॥ ॥इतिश्रीविद्यारण्यविरचितोजीवन्मुक्तिविवेकःसमाप्तः॥ ॥ शुभम्भूयात्॥ श्रीरस्तु॥ भेदाभेदौसपदिगलितौपुण्यपापेविशीर्णेमायामोहौक्षयमधिगतौनष्टसंदेहवृत्तिः॥ शब्दातीतंत्रिगुणरहितंप्राप्यतत्त्वावबोधंनिस्त्रैगुण्येपथिविचरतांकोविधिःकोनिषेधः॥१॥ तीर्थानितोयपूर्णानिदेवान्पाषाणमृन्मयान्॥ योगिनोनप्रपद्यन्तेआत्मज्ञानपरायणाः॥२॥ अग्निर्देवोद्विजातीनांमुनीनांहृदिदैवतं॥ प्रतिमास्वल्पबुद्धीनांसर्वत्रविदितात्मनां॥३॥ सर्वत्रावस्थितंशांतंनप्रपद्येज्जनार्दनं॥ ज्ञानचक्षुर्विहीनत्वादंधःसूर्यमिवोदितं॥४॥ ॥ ॥वाराणसीप्रसादस्यनियोगेनप्रयत्नतः॥ काशीसंस्कृतमुद्रायामङ्कितोयंशिलाक्षरैः॥१॥ श्रीकाशीजीमे ज्ञानवापीके पूर्वफाटकेपर श्रीविश्वनाथजीकेपास महाराज शिवलाल दुबेजीकेमकानमे काशीसंस्कृत मुद्रायंत्रमेछपी जिनकोलेनाहोय उनकोइसकार्यके संपादक श्रीबाबू वाराणसीप्रसाद जीके पास याक चौरीगलीमे भाईप्रतापसिंहजीके दुकानपरमिलेगी॥ ॥सम्वत्॥ १९३७ ॥ ॥शाके॥ १८०२॥ ।

लें
स्तं
नम्को
मोति
तस्य
नकदाचिदा
तिरितिप्रश्न

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri